Sans. MS.
294.1
S774

MS-34

श्रीमद्भागवत् ॥
अस्सं० पत्र ॥ १५ पं० प्र० पू०
खंडित तथा कीट भक्षित

ह० ल०

Sans. MS.
CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

34

1673

भागवतस्कंधमस्ते
ग्रंथसंख्या २००० पत्रं ८३

पत्र ३४४ ५२

तत्रोडुपतिश्चंद्र...

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

॥ ६ ॥ श्रीकृष्ण ॥ स्वस्ति श्रीगणेशाय नमः ॥ ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदायभक्तजनमानसनि[illegible]वासाय श्रीरामाय ॥ अथातः पंचमस्कंधव्याख्याने कविशेषवान् । प्रियव्रतान्वयो यत्र सप्रपंचः प्रपंच्यते ॥ १ ॥ षड्विंशत्याध्यायैः पंचमे स्थानमीरितं । लोकद्वीपादिमर्यादापालनं यन्महेकधा ॥ २ ॥ पृथिव्युपर्यधोलोकेषु मर्यादा त्रिविधामता । पुनश्चैकैकशस्तेषु मर्यादा बहुधामता ॥ ३ ॥ भुवि द्वीपादिमर्यादापाल्यते राजभिः पृथक् । अमेरुपरि देवाद्यैस्तत्तश्चाधो सुरादिभिः ॥ ४ ॥ तत्राध्यायैस्त्रिविंशत्या प्रियव्रतपुरःसरैः । भुवि द्वीपादिमर्यादापालिता इति वर्ण्यते ॥ ५ ॥ त्रिभिस्सूर्यादिभिर्ज्योतिश्चक्रादिस्थितिकीर्त्यते । अतलादिषु दैत्याद्यैः पालनं वततस्त्रिभिः ॥ ६ ॥ तत्र तु प्रथमेध्याये ज्ञानिनो राज्यनिर्वृतिः । पुनश्च

ॐ नमो भगवते वासुदेवाय ॥ ॥ श्री ॥ रा ॥ जो ॥ वा ॥ प्रियव्रतो भागवत आत्मारामः कथं मुने । गृहेऽरमत यन्मूलः कर्मबंधः पराभवः ॥ १ ॥ न नूनं मुक्तसंगानां तादृशानां द्विजर्षभ । गृहेष्वभिनिवेशोयं पुंसां भवितुमर्हति ॥ २ ॥ श्रीकृष्ण ॥ ० ॥ राम ॥ ॥

श्रीकृष्णाय नमः

ज्ञानिनिष्ठेति प्रियव्रतकथाद्भुता ॥ ७ ॥ वंशे प्रियव्रतस्यापि विवोधन्तपसत्तमा योनारदादात्मविद्यामधिगम्य पुनर्महीं ॥ ८ ॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदमिति पूर्वस्कंधाते प्रियव्रतस्य प्रथमं आत्मविद्या ततो गृहाश्रमः । ततः सर्वसंगत्यागेन मोक्ष इत्युक्तं ॥ तत्र विस्मितः पृच्छति प्रियव्रतो भागवतः अत एवात्मारामः गृहे कथमर[illegible]मत ॥ रमतां को दोष इति वेदत आह ॥ कर्मणा बंधः पराभवश्च स्वरूपतिरस्कारो यन्मूलो भवति यस्मिन् गृहे मूलं यस्य ॥ गृहेषु रतिश्च तत्राभिनिवेशात्स्यात् ॥ स च भागवतानां न संभवतीत्याह ॥ न नूनमिति ॥ २ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

॥ अथ व्रतस्य ब्रह्मज्ञे वांतरायत्वपावकत्वेवति सत्रसंगमाह ॥ यर्हीत्यादिना विमुक्तसंगः प्रकृतिनिर्जस्येत्यपेतेन । यर्हि वाव ह वयर्ह यदा र्हि वावेति निपातसि
द्धा दोह इति वसः स्वपित्रा मनुनाश्रविनितलपरिपालनायोपामंत्रितो नियुक्तो नैवाभ्यनंदत् नैच्छत् । अथ ह तं देवं भगवानादिदेवो ब्रह्मा
भवनादवततारेत्यन्वयः ॥ उपामंत्रणे हेतुः । आम्नाताः राज्ञां शास्त्रेणोक्ता ये प्रवराः श्रेष्ठा गुणास्तेषां गणस्य कांतं भाजनं तया नियतौ स्तय
च्चेनाश्रवनि च्छायां हेतुः ॥ परमार्थसतत्वं आत्मयाथात्म्यं अवगा तंतद्येन सतथा । अत ४ ब्रह्मसत्रेणात्मध्यानेन कार्येण दीक्षिष्यमाणः नियमं
यर्हि वाव ह राजन् स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयांऽजसावगतपरमार्थसतत्वो ब्रह्मसत्रेण दीक्षिष्यमाणो
वनितलपरिपालनायाम्नातप्रवरगुणगणैकांतभाजनतया स्वपित्रोपमंत्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावे
शितसकलकारकक्रियाकलापो नैवाभ्यनंदद्यपि तदप्रत्याम्नातव्यं तदधिकरण आत्मनोऽन्यस्मादसतोऽपि पराभवमन्वीक्षमाणः ॥ ६ ॥
अथ हभगवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजगणपरि
वेष्टितः स्वभवनादवततार ॥ ७ ॥ स तत्र तत्र गगनतल उडुपतिरिव विमानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथि पथि च व
रूथशः सिद्धगंधर्वसाध्यचारणमुनिगणैरुपगीयमानो गंधमादनद्रोणीमवभासयन्नुपससर्प ॥ ८ ॥ ३ मरीच्याद्यैः
...भगवति वासुदेव एवाव्यवधानसमाधियोगेन चित्तैकाग्रेण समावेशितः समर्पितः सकलकारकाणामिंद्रियाणां याः क्रियास्तासां कलापो येन सः
यद्यपि तत्पित्रोक्तं न प्रत्याख्येयं तथापि तदधिकारे राज्याधिकारे असतो मिथ्याभूतात् अपि राज्यप्रपंचात् आत्मनः पराभवमालोचयन् नाभ्यनंदत् गुणवि
सर्गस्य गुणविसृष्टेः परिबृंहणं समृद्धिस्तदनुचिंतया व्यवसितः सकलजगत्प्रमिप्रायो नाम यथा राजा स्वारे मंडलेश्वराणामभिप्रायो निश्चीयते
तन्निगमैरखिलैर्निगमैर्मूर्तिमद्भिर्वेदैर्निजगणैश्च मरीच्यादिभिः परिवृतः सत्यलोकादवतीर्णः ॥ स च ब्रह्मा तत्र तत्रोडुपतिश्चंद्र इव ... नो गं
...दाय दृष्टिमकुर्वत ॥ ... ॥ १ ॥ ... थसंघातिनः ॥ ... ॥ श्री ॥ ... ॥

क्तेः कुडंवादिस्वह [illegible] तस्येत्याह। महतामिति। उत्तमश्लोकपादयोः छायाकामादिसंतापप [illegible]
स्पुत्रमतिर्नास्तिदा [illegible] कस्यतु मोसः श्रीह [illegible] स्खलितामतिश्चान्न्दितियतो अपंचमहान्संशय इत्याह। संशयइति। [illegible] गीकृत [illegible] पंच
हरति। बाढं। अन्निनि [illegible] नास्तीतिसत्यमेव। तथापिविघ्नवशेनतेषांप्रकृतिः पूर्वाभ्यासवलेन तुनर्निवृत्तिश्चसंगच्छत इत्याह। भगवत् पाल

कर
महतां खलु विप्रर्षे उत्तमश्लोकपादयोः। छायानिर्वृत्तचित्तानां नकुटुंवेस्पृहामतिः॥३॥ संशयोयंमहान्ब्रह्मन्
दारागारसुतादयस कस्यघन्तसिद्धिरभूत्कृष्णेचमतिरच्युता॥४॥ श्रीशुक उवाच॥ ॥वाढमुक्तंभगवत उत्तम
श्लोकस्य श्रीमच्चरनारविंदमकरंदसत्रावेशितचेतसोभागवतपरमहंसदयितंकथांकिंचिदंतरायविहतांस्वांशिव
तमांपदवी र नप्रायेणहिन्वंति॥५॥ किं२

श्रीमच्चरणारविंदमकरंदरूपोयोरसस्तस्मिन्नावेशितुंचेतोयैस्तेपिकेचिदंतरायेणविघ्नेनविहितामपिस्वांपदवींमार्गंनहिन्वंतिनत्यजं
तिकांभागवताएवपरमहंसास्तेषांदयितस्यप्रियस्यहरेःकथां॥५॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१० पं०

हृतो निजः स्वीय इत्यर्थः तो येन ॥ योष यां तत्स्व दिन्न ॥ फलनं व्रकादिभ्यो रक्षणं ॥ प्रीणनं कंडूयनादिना ॥ लालनं चुंबनादिना ॥ एतैर्यद्वनुध्यानं मा सक्लिसेने
आत्मनेति यमनाः स्नानादयः यमाः प्रहिंसादयस्तत्पाद्विता ईश्वरपरिचर्य्यादयश्च प्रत्यहमेकैकशो विप्रयुज्यमानाः सतः कतिपयैर्नाहर्गणैर्न सर्वेऽ
सन्नावरुधुः ॥८॥ आसक्तिं प्रपंचयति प्रहोदृत्यादिना इति कृतानुषंगः इत्येतत्पर्यंतेन ॥ ईश्वरस्य रथवरणं कालचक्रं तस्य परिभ्रमणवेगेन स

तस्य हवारणाकुर्णाके रुद्धे रे तस्मिन्कृतानि जाभिमानस्याहरहस्तत्पोषणपालनप्रीणनलालनानुध्यानैवात्मनियमाः सहयमाः पुरुषपरिचर्य्या
दयएकैकशः कतिपयैर्नाहर्गणैर्नविप्रयुज्यमानाः किंत्वसर्वे एवोरवसन् ॥८॥ प्रहोवता यं हरिणकुणकः कृपणेश्वररथवारणपरिभ्रमण
रैयेण स्वगणसुहृद्बंधुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव माता पितरौ भ्रातृ ज्ञातीन्यौथिकांश्चैवोपेयाय नान्यं कंचन वेदमय्यतिविस
घब्धं ॥९॥ अत एव मया त्वया दारणं स्वयोषणपालनप्रीणनलालनमनसूयनाः प्रनुक्षेमं शरणोपवेशमादेषां विदुषा ॥१०॥ नूनं ह्यार्याः सा
धवः उपशमशीलाः कृपणसुहृद एवं विधार्थे स्वार्थानपि गुरुतरानुपेक्षंते ॥११॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

गणादिभ्यो विभ्रंशितः आश्रितः मां च शरणं प्रापितः मामेव माता पितरौ बुध्वा उपेयाय प्राप्तः ॥ यौथिकान्यूथसंघातिनः ॥९॥ अनसूयना
ताच्चिमित्तमम स्वार्थं भ्रश्यतीति दोषदृष्टिमकुर्वता ॥१०॥ तदेव कथन् तं नेहीति ॥११॥ ॥ ॥ ॥ ॥श्री॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भ्रश्रमे भजतो विष्णु तस्य कर्मांतरायतः येनरज्ञा प्रसक्तस्य जातमेमात्व मीर्ष्यते ॥ कृपया पिकृतः संगःपतन्नायेवयोगिनः ॥ इति प्रदर्शयान्नाह्म भरतस्येणपोषितां नैय
मिकंनित्यमैतोनित्यकं विधि प्राप्तं ॥ भ्रावस्यकं प्रयं प्राप्तं मज्ञोत्सर्गादि कृतमभिषेकादिकं येन ॥ ब्रह्माक्षरं पृणानं जपन् ॥ उदकांते नद्यास्तीरे ॥ १ ॥ जलाशया भ्यासे
नद्यासमीपे ॥ २ ॥ पिपीयमाने पृत्याश पापीयमाने सति ॥ तादेवतत्क्षणामेव अविदूरेण सन्निधौ मृगपतेः सिंहस्य ॥ उन्नादो महानादः उद्भूतः ॥ ३ ॥ प्रकृत्या स्वभावात
एवविक्लवा व्याकुला ॥ सुतरांतु हरेर्भयस्याभिनिवेशेन व्यग्रं व्याकुलं हृदयं यस्याः परिप्लवद्दृष्टिः परिभ्रांतनेत्रा ॥ नगतातृषायस्याः उच्चक्रामनदीमुत्तीर्णितव

श्रीशुक उवाच ॥ एकदातु महानद्यां कृताभिषेकनैयमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्तत्रयमुदकांत उपविवेश ॥ १ ॥ तत्रतदाराजन्हरिणीपिपास
याजलाशयाभ्यासमेकैवोपजगाम ॥ २ ॥ तयापेपीयमान उदके तावदेवाविदूरेण नदतो मृगपतेरुन्नादो लोकभयंकरउदपतत् ॥ ३ ॥ तमुपश्रुत्य सामृ
गवधूः प्रकृतिविक्लवा चकिततिरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्रहृदया परिप्लवदृष्टिरगततृषा भयात्सहसैवोच्चक्राम ॥ ४ ॥ तस्याउत्पतंत्या
अंतर्वत्न्या उरुभयावगलितो योनिनिर्गतो गर्भः स्रोतसि निपपात ॥ ५ ॥ तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियुज्यमाना कस्यांचिद्दर्यां कृष्णसारसती
निपपाताथ चममार ॥ ६ ॥ तं त्वेणकुणकं कृपणं स्रोतसानूह्यमानमभिवीक्ष्यापविद्धं बंधुरिवानुकंपया राजर्षिर्भरत आदाय मृतमातरमित्याश्रम
पदमनयत् ॥ ७ ॥

ती ॥ ४ ॥ अंतर्वत्न्या गर्भिण्याः उरुभयेन स्थानाद्विचलितो योनेर्निर्गतः सन् स्रोतसि प्रवाहे निपपात ॥ ५ ॥ तत्प्रसवो गर्भपातः ॥ उत्सर्पणमुल्लंघनं भ
यं चएतैः खेदेनातुरा पीडिता ॥ दर्यां गिरिगुहायां हरिणवधूः पपात अथानंतरं मृताच ॥ ६ ॥ एणकुणकं हरिणबालकं ॥ अपविद्धं बंधुभिस्त्यक्तं ॥ इति
तैः कृपाकः त्वादिहेतुभिः स्वांकं पातयाश्रमनयत् ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पं.टी. ६ | त स व दि

उ इति विस्मये। आहेति प्रसिद्धौ। वेति निश्चये॥ आत्मनासमानैः शीलादिभिरूदारान्महतो दशपुत्राञ्जनयामास॥ तानेवाह॥ आग्नीध्रः इध्म
जिह्वः यज्ञबाहुः महावीरः हिरण्यरेतो घृतपृष्टः सवनः मेधातिथिः वीतिहोत्रः कविश्चेति॥ अग्नीनां नामानि येषां ते॥ अर्भकभावात् वाल्यात्

अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम॥ तस्यामु ह वा आत्मजानात्मसमानशीलगुणकर्मरूपवी
र्योदारान् दश भावयांबभूव॥ कन्यां च यवीयसीं ऊर्जस्वतीं नाम॥ २४॥ आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृ
ष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः॥ २५॥ एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसस्त आ
त्मविद्यायामर्भभावादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन्॥ २६॥ तस्मिंश्च ह वा उपशमशीलाः परमर्षयः सक
लजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविंदाविरतस्मरणाविगलितपरमभ
क्तियोगानुभावेन परिभावितांत हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मनि तादात्म्यमविशेषेण स
मीयुः॥ २७॥ अन्यस्यामपि भार्यायां त्रयः पुत्रा आसन् उत्तमस्तामसो रैवत इति ते मन्वंतराधिपतयः॥ २८॥

दारभ्य इति। तस्मिंश्च पारमहंस्याश्रमे श्रीमच्चरणारविंदयोरविरतस्मरणेनाविगलितः अखंडितो यः परमो भक्तियोगस्तस्यानुभावेन विशोधितां
तःकरणे प्रतीतो यो भगवांस्तस्मिन्नात्मनस्त्वंपदार्थस्य तादात्म्यमविशेषेण विशेषो देहाद्युपाधिस्तदपोहेन प्रापुः॥ २८॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उपशमाश्रयेषु सत्सु [illegible] दशस्को टिभिरेकमर्बुदं ता निवर्षाणामेकादशार्बुदानि जगतीं बुभुजइत्यन्वयः। राज्ञो धर्मपालनाविषयभोगप्रभावे
हिनाब्धी। तत्रानायासेनैव धर्मपालनमाह॥ अव्यहता अखिलाः पुरुषकाराः पौरुषाणि यस्मात्तेन सारेण बलेन संभृतौ पूर्णौ दोर्दंडौ तयो
र्युगलं तेनापीडित आकृष्टो मौर्वी। गुणस्तस्य स्तनितं टंकारः तेनैव युद्धं विना विरमिता निरस्ता धर्मप्रतिपत्त्या येन। भोगातिशयमाह॥ वा
भ्रूलताः स्वभार्याया अनुदिनमेधमानैः प्रमोदादिभिः पराभूयमानविवेक इव॥ अत एव विषयासक्त्या आत्मानमनवबुध्यमान इव बु
भुजे॥ तत्र प्रमोदः आयांतं पतिं दृष्ट्वा हर्षः ततः प्रसराणामभ्युत्थानादिलीलातः तोयेोषण्यं योषित्स्वभावः कृतशृंगारानुभवप्रकाशनं॥

एवमुपूर्सिमाश्रयेषु सत्सु तनयेष्वथ स जगतीमर्बुदान्येकादशपरिवत्सराणामव्याहताखिलपुरुषकारसारसंभृतदोर्दंडयुगलेपी
डितमौर्वीगुणस्तनितविरमितधर्मप्रतिपत्तो वर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरयौषण्यव्रीडाप्रमुषितहासावलोकरुचि
रक्ष्वेल्यादिभिः पराभूयमानविवेकोनवबुध्यमान इव महामना बुभुजे॥२९॥ यावदवभासयति सुरगिरिमनुपरिक्रामन् भगवानादि
त्यो वसुधातलमर्द्धेनाच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनंदन् समजवेन रथेन ज्योतिर्मयेन र
जनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामन् द्वितीय इव पतंगः॥३०॥

ततो व्रीडया प्रमुषिताः संकोचिता हासावलोकाः ततो रुचिरक्ष्वेल्यादयश्च परिहासवाक्यादीनि तैः प्रभावातिशयमाह॥२९॥ यावद्व
सुधातलं लोकालोकपर्यंतमवभासयति मेरुं प्रदक्षिणी कुर्वन्नादित्यस्तस्मिन्नर्द्धे नैवोपलक्षितं प्रतपति प्रकाशयति। अर्द्धे नैवाच्छा
दयति॥ तमसा आवृणोति तदा द्वितीयश्च पतंगः॥ सूर्य एव परिपरि[illegible]मन्। न वेदमसंभाविते॥ यतो भगवदुपासनोपचितः। अतिपुरुषः
पुरुषानतिक्रांतः प्रभावो यस्य॥३०॥ ॥छ॥

५

पं॰टी॰
६

तस्य पराक्रममुपसंहरन्निर्वृत्तिक्रममाह॥ सएवमिति॥ देवर्षिचरणयोरनुश्रयनमनुपसत्तिः तदनुपतितोयोगुणविसर्गोराज्यादिप्रपंचस्तत्सं
सर्गेण आत्मनिमनसिनिर्वेदो यस्य॥ मयाऽसाध्वनुष्ठितं यद्यतो निनिवेशितः तन्नतः अलमलं विषयैः विनोदमृगंमर्कटं॥ परदे
वतायाः हरेः प्रसादेनाधिगतः प्राप्तो यः आत्मप्रत्यवमरद्गो विवेकस्तेननारदस्यपदवीतेनोपदिष्टमार्गमेव पुनरनुसंसारेत्यन्वयः॥
किंकृत्वा अनुगतेभ्यः इमांपृथ्वीं विभज्य भुक्तोभोगोयस्यास्तांवमह्। विभूतिः साम्राज्यसंपत् तत्सहितां महिषीं मृतशरीरवत्॥ परित्य

सएवापरिमितपराक्रम एकदातुर्देवर्षिचरणानुशयनानुप[?]तितगुणविसर्गसंसर्गेणानिर्वृतमिवात्मानंमन्यमान
आत्मनिर्वेद इदमाह॥३५॥ अहो असाध्वनुष्ठितंयदभिनिवेशितोहमिंद्रियैरविद्यारचितविषमयांधकूपे॥ तदल
मलममुष्यावनितायाविनोदमृगंमांधिग्धिगितिगर्हयांचकार॥३६॥ परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृ
त्तेभ्यः इमां यथादायं विभज्य भुक्तभोगांवमाहिषींमृतकमिवसहमहाविभूतिमपहाय स्वयंनिहितनिर्वेदोहृ
दिगृहीतहरिविहारानुभावोभगवतोनारदस्यपदवीं पुनरेवानुससार॥ तस्य हवाएतेश्लोकाः॥३७॥ प्रियव्रतकृतंक
र्मकोनुकुर्याद्विनेश्वरं॥ योनेमिनिम्नैरकरोत् छायांघ्नन्सप्तवारिधीन्॥३८॥ तमे. निर स्पर्न
द्या तत्रहेतुः हृदिनिहितो निर्वेदोयेनहृदीत्यस्योत्तरप्राप्यन्वयः इतिगृहीतोनिश्चितोहरिविहारस्तेनानुभावोत्पागसामर्थ्यं यस्यत
स्यमाहिमोपनिबंधनश्लोकाः पूर्वसिद्धाः कथ्यंतेयथावेदेतदप्येषश्लोकोभवतीतितदपीति॥ कोनुकोनामकुर्यात् छायांघ्नन्तमोनिर

६

येवैउह आतिप्रसिद्धाः तस्यरथचक्राग्रहताः परिखातागर्त्ताः यतः येरेवकृतातेषांपरिमाणंमाह एवेतिशेषः पूर्वस्ययद्विस्तारोमानं उत्तरस्ततो द्विगुणेन विस्तारमाने नेत्येवं सिंधुभ्यो वहिः समंततः उपक्लृप्ताः रचिताः यथावसिंधुभ्योवहिरेकैकशोद्वीपाः एवं द्वीपानामपि वहिः सिंधव इत्याह। क्षीरोदेति। दधिमंडो मथितंदधि एतेसप्तजलधयः सप्तद्वीपानां परिखाइव अभ्यंतरे तैः संवेष्टिताः द्वीपाः तैः समाना विस्ता रतो वहिर्नीतः पृथक् असंकीर्णतया॥ जिताः षड्गुणाइंद्रियाणिषडूर्मयोवायेस्तेषामेवंविधः पुरुषकारश्शतिनवित्रं नासंन्नावितं।

येवाउहतद्रथचरणनेमिपरिखातास्तेसप्तसिंधवआसन्॥ यतएवकृताः सप्तभुवोद्वीपाः जंबूप्लक्षशाल्मलिकुशक्रौं चशाकपुष्करसंज्ञास्तेषांपरिमाणंपूर्वस्माउत्तरोयथासंख्यंद्विगुणेनवहिः समंततः उपक्लृप्ताः।३१। क्षारोद [इक्षु] रसोदसुरोद घृतोदक्षीरोददधिमंडोदशुद्धोदाः सप्तजलराशयः सप्तद्वीपसमाना एकैकश्येन यथापूर्वं सप्तस्वपि वहिर्द्वी पेषुपृथक्पृथक्परितउपकल्पिताः।३२। तेषुजंब्वादिषु सप्तवर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिर ण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्यथासंख्येनएकैकस्मिन्नेकमेवाधिपतिंदधौ॥ दुहितरंचोर्जस्वतींनामोशनसेप्राय च्छद्यस्यामासीद्देवयानीनामकाव्यसुता।३३। अहो आश्चर्यंराज्ञः सामर्थ्यमितिपरीक्षिदभिप्रायज्ञोभगवान्बादरायणिराहनैवंवि धः पुरुषकार उरुक्रमस्यपुंसांतदंघ्रिरजसाजितषड्गुणानां चित्रंविदूर विगतः सकृदादधीत यन्नामधेयमधुनासजहातिवंधं॥

षड्गुणानां प्रत्यज दी

चित्रं विगत अंत्यजो पियस्योरुक्रमस्यनामसकृदुच्चारयेद्यः सत्रधुनातत्क्षणमेववंधसंसारं। तत्ववमितिपाठेप्ययमेवार्थः। पाठांतरेतत्त्वंवा डालत्वंजहातिशुद्धोभवतीत्यर्थः।।३४।।

परिखाइ अभ्यंतरे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नः संस्थानं द्वीपैः कृतासीरिद्गिरिवनादिभिः सीमा च येन कृता भूतानां निर्वृत्यै सुखाय परस्पराविवादाय॥ भौमं पाताल जं दिव्यं स्वर्ग जं मानुषं मर्त्य
लोकजं महिमहित्वं वैनं च यो निरयतुल्यमेन पुरुषानुजनाः विष्णुभक्तास्त एव प्रियाय स्येति॥ ॥इति पंचमे प्रथमोध्यायः॥ ॥॥ ॥ ॥ ॥ ॥०
द्वितीये प्रोक्तमाग्नीध्रचरित्रं सूत्रेण संमतं॥ पत्न्यां हि पूर्वचित्त्यां यो नाभिमुख्यानजीजनत्॥ १॥ अस्मिन्वंशे प्रसिद्धोयमाग्नीध्रस्त्रैणपुंगवः॥
विहसन्निव तस्येदं चरितं मुनिरब्रवीत्॥ जंबूद्वीपमोको यासां ताः प्रजाः पुत्रवत्पालयामास धर्मावेक्षमाणः धर्ममवेक्षमाण इत्यर्थः। पित्र

रि

भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः॥ सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः २९॥ भौमं दिव्यं मानुषं च महित्वं योगकर्मजं।
यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः॥ ५०॥ इति श्रीभागवते महापुराणे शुकनकोशे प्रियव्रतविजये प्रथमोध्यायः॥ ॥ ॥ ॥१
श्रीशुक उवाच॥
एवं पितरि संवृत्ते तदनुशासने वर्तमान आग्नीध्रो जंबूद्वीपौकसः प्रजा [illegible] औरसवद्धर्ममवेक्षमाणः पर्यगोपायत
॥१॥ स च कदाचित्पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवंतं विश्वसृजां पतिमाभृतपरिचर्योपकरण आत्मैकाग्र्येण
तपस्व्याराधयां बभूव॥ २॥ तदुपलभ्य भगवानादिपुरुषः सदसि गायंतीं पूर्वचित्तिं नामाप्सरसमभियापयामास॥ ३॥ ।

मंदराचलपर्वत

लोककाम पुत्रकामः सुरवराणां वनितास्तासामक्रिडाचलो मंदरस्तस्य द्रोण्यां आभृतानि संपादितानि परिचर्योपकरणानि पुष्पादीनि ये
न तदुपलभ्य ज्ञात्वा अभियापयामास संभोगार्थं प्रस्थापयामास॥ ३॥ ॥॥॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा च तदा आश्रमं उपवनग्रामे त्यन्वयः। रमणीयत्वमेवाह॥ विविधाश्चये विटपिनस्तेषां निकटिताः संश्लिष्टा पुरटलताः तत्स्वर्णवल्ल्यः तास्वारूढाः स्खलविहंगाः मयूरादयस्तेषां मिथुनैः श्रोच्यमानानिश्रुतिभिरुच्चार्यमाणैः षड्जादिभिः स्वरैः प्रतिबोध्यमाना ये सलिलकुक्कुटा दयस्तैर्विचित्रं यथा तथोपकूजिता नादिता अमलाजलाशयास्तेषु कमलानि तेषामाकरमुपवनं। सुलालिते गमने ये पदविन्यासाः तैर्गतौ विलासो यस्याः॥ बकारस्तस्याश्चेत्येकवाक्यत्वापरखणरवणेति ध्वनिं कुर्वतो रुचिरस्य वरणाभरणस्य स्वनं॥ आमीलिते नव

सा च तदाश्रमोपवनमतिरमणीयं विविध निवि[illegible]विटपिविटपनिकटितपुरटलतारूढ स्खलविहंगमिथुनैः श्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारंडवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपवनग्राम॥
॥४॥ तस्याः सुललितगमनविन्यासगतिविलासायाश्चानुपदं खणरवणायमानरुचिरवरणाभरणस्वनमुपाकर्ण्य न रदेवकुमारः समाधियोगेनामीलितनयन[illegible]युगलमुकुलमीषद्विकचय्यमवष्ट॥५॥ तामेवाविदूरेमधुकरीमिवसु मनसमुपजिघ्रंती दिविजमनुजमनोनयनाह्लादादुद्वेगतिविहारविनायावलोकनविलासससुस्वरात्तरावपवैर्म्मनसि
नणांकुसुमायुधस्याविदधतीविवरां॥ ॥ ६ ॥

यने एव नलिनमुकुलेतयो युगलमीषद्विकचय्यकिंचिदुन्मील्यमवष्टददर्श॥ तामेवदेवीमकरस्य ध्वजस्यवशामुपनीतः सन् जडवदिति स्वच्छमाणान्दशाश्लोकानुवाद॥ जाघ्यानुकरणं वैदग्ध्येन तद्दर्शीकारार्थं। दिविजानां देवानां मनुजानां नयानि मनां सिनयनाभि वतेषामाह्लादद उद्वेगत्यादिभिर्वर्णानां मनसि कामस्य विवरं प्रवेशद्वारं विदधंतीगतिश्च विहारश्च बीच विनियमुक्तोवलोकश्च सुस्व ॥३॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निजमुखाद्विगलितममृतमिवस्वादु आसवइवमादकं यत्सहासं भाषणं वतस्मिन् आमोदो निश्वासगंधः तेनमदांधायेमधुकरनिकराः
तैरूपरोधः आवरणं तेनयत् द्रुतः शीघ्रः यः पादन्यासः तेन वल्गु स्पंदनं किं विवलनं स्तनयोः कवरभारे ॥ रचनायाह्न यस्याः तां ॥ तस्यावले
कनेनविहृतावसरस्य दत्तावकाशस्या । कात्वं शैले गिरावस्मिन् किं विकीर्षसि ॥ मु॥ नेवर्ये त्यादि पुंस्त्वेन संबोधना निजाग्यानुकरणार्थं ॥
नूनं भगवतः परदेवता रूपभूतस्य माया सि ॥ कवा बालक्ष्या हहे सुरु त्सरव विक्षेनिर्गुणो ॥ धनुषी विभर्षि ॥ किमात्मनोर्थे तवैवान्यां किं कार्य

निजमुखविगलितामृतासवसहासभाषणामोदमदांधमधुकरनिकरोपरोधेनद्रुतपदविन्यासेनवल्गुस्पंदनस्तनकलशाकवरभा
रसत्रानां देवीतदवलोकनेन विहृतावसरस्य भगवतो मकरध्वजस्य वशमुपनीतो जडवदितिहोवाच । कात्वं विकीर्षसि वाकिं मुनि
वर्यशैले मायासि कापि भगवत्परदेवतायाः विज्ञेपविभर्षि धनुषी सुहृदात्मनोर्थे किं वाम्य मान्मृगयसे विपिने श्रमभार
॥८॥ वाणा विभौ शतपत्रपत्रौ शांतावपुंखरुचिरावतितिग्मदंतौ । कस्मैयुयुंत्तसि वने विवरन्नविघ्नः क्षेमायनोजडधियां तवविक्र
मोस्तु ॥८॥

विनार

मस्ति । किं वाप्रमत्तान्जितेंद्रियान्मृगतुल्यान्समदादिन्मृगयसे तान्वशीकर्तुं धनुषी धारयसीत्यर्थः । करान्त्वावालक्ष्याहवाणा वि
भौ ॥ शतपत्रे नेत्रकमले ते एव पत्राणि विद्धानि ययोः ॥ शांतौ विभ्रमेण मंथरौ पुंखाभ्यां रुचिरौ ॥ पत्रतयाकल्पितनेत्राझ्गांपरमभागस्य
पुंखस्थानीयस्यानवार ॥९॥

चुबो

भा॰पं॰
८

तदंगपरिमललोभेनानुगच्छतो भ्रम[illegible]रानालक्ष्याह॥ अजस्रं संततं। पुष्पभरशिखातो विलुलिता विगलिताः सुमनसामभितो वृष्टीः गलि
तानि कुसुमानि मंजंतीत्यर्थः। श्रुतत्वेनोपमा वेदशाखा इवेति॥ नूपुरस्वनमाकर्ण्याह वाचमिति॥ तुभ्यं तव चरणपंजरयोः नूपुरयोः स्त्रि
त्रिरीणां अंतर्गभरत्नानां परं केवलं वावं शृणुमः॥ कथंभूतां॥ अनूपां अदृष्टवक्तृकां मुखरं अतिप्रकर्षं तां वताव॥ पीतं परिधानवस्त्रं नि
तंवकांति त्वेन प्रकल्प्याह॥ कदंबकुसुमस्य रुविर्द्दीप्तिः चंकाविं कांविं वेनितं वस्य सुंदर मं[illegible]ले [illegible] लघा पाठांतरे॥ अंगे तिसंवोधनं॥ मेषास्त्री

शिष्याइमे भगवतः परित ऊपठंति गायंति साम सरहस्यमजस्रमीशं॥ पुष्प[illegible]विलुलिताः सुमनो भिवृष्टीः सर्वे
भजं त्यृषिगणा इव वेदशाखाः॥ ॥१०॥ वाचं परं चरणपंजरतित्रिरीणां ब्रह्मन्न[illegible]रांशृणवाम तुभ्यं॥ लब्धाक
दंबरुचिरं कविटंकविंवे यस्यामलातपरिधिः क्व च वल्कलं ते॥ ॥११॥ किं संभृतं रुचिरयोर्द्विज शृंगयोस्ते मध्ये कृशो
वहसि यत्र दृशिः श्रितामे। पंकोरुणः सुरभिरात्मविषाण ईदृक् येनाश्रमं सुभग मे सुरभीकरोषि॥ ॥१२॥

क्व च ते वल्कलमिति॥ स्तनावाल क्ष्याह॥
मालक्ष्याह॥ यस्यामलातपरिधिवर्त्तते॥ वस्त्रं नितंबकांतित्वेन प्रकल्प्य वस्त्रम दृष्ट्वैव पृच्छति॥ क्व च ते वल्कलमिति॥ यत्र च मे दृशिर्दृष्टिः श्रिता
शृंगयोः स्तनयोः किं संभृतं पूर्णमास्ति मनोहरं॥ किं विदस्तीत्येतावक्तुं जानामि॥ यतो मध्ये कृशोपि कृच्छ्रेण वहसि॥ यत्र च मे दृशिर्दृष्टिः श्रिता
संलग्ना। स्ति। अन्यथेदं कृच्छ्रेण वहत इति भावः॥ स्तनगतं कुंकुममालक्ष्याह॥ पंकोरुण आत्मनस्तव विषाणोः स्तने ईदृक् अत्यल्पः सर्वः। कुतः
॥ त्पतत्राह॥ येन पंकेन॥ ॥१२॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लोकंस्थानं॥ यत्रलोजनउरसाइत्थमपूर्वावयवो विभर्त्ति॥ मनसउन्नयनेोद्दीपकौ॥ पाठांतरेइत्थंभूतलक्षणेतृतीया॥ वक्त्रेवक्रच्युतं विभर्त्ति
कं तदाह॥ रसोमधुरलापःसासेविलासःतास्यांसाहितासुधा॥ अधरामृतं आदिशब्दात्स्मितनर्मादि॥ कावातवलोके आत्मनोदेहस्यदंतिः
आहारः॥ अंगहेसखेअदनाद्बर्वाणद्वाहिरितितत्सं वंधीगंधो वातिआगच्छती तितां वूलानिप्रायं॥ अदनाद्वहिरंगभातीतिपाठे॥ ममतावक्त्रो
जनाद्वहिर्न्नैतवदन्निर्न्नीतीत्यर्थः॥ यतस्त्वंविष्णो४ कलासिविष्णुश्चनाप्नोति॥ अनल्पन्निति न्यनन्पोअश्निवाकशी॥ तीतिश्रुतेः॥ विष्णोःक

लोकंप्रदर्शपसुहृत्तमतावमेकेयत्रत्यइत्थमुरसावजवावपूर्वौ॥ चस्माद्दि घस्यमनउन्नयनोविभर्त्तिवक्रच्युतंसरससार
दि२ सुधांवक्त्रेकावात्मदंतिरदनाद्बहिरंगभातिविष्णो४कलास्यनिमिषोन्मकरोवकर्णौ॥ उद्धिन्नमीनयुगलंद्विजपं
क्तिशोविरासन्नभृंगनिकरंसरउन्मुखंतो॥१३॥ योसौत्वयाकरसंस्पर्शतगोदिक्ष्वभ्रमन् भ्रमतएजयतेक्षणीमे॥ मुक्तंनतेस्मर
सिवक्त्रेजयावरूथंकष्टोनिलोहरतिलंघटएषनीवीम्॥१४॥ संपत

लासीत्यत्रहेतुःतवकर्णौ विष्णोरिवानिमिषोत्मकरौ अनिमिषोरत्ननेत्रत्वेननिमेषशून्यौ॥ उल्लसंतौमकरौतदाकारे कुंडलेययोः तौकिंच॥॥
तवमुखंसरवत्सरस्वतदेवाह॥ उद्धिन्नंवंवलंमीनयुगलमेवनेत्रद्वयंयास्मिन् द्विजाःदंताःतेषांपंक्त्याशो विशेशोभायस्मिन्सरसितुद्विज
हंसाः॥ आसन्नोभृंगनिकरइवकेशस्तोम४ परिमललुब्ध४भृंगस्तोमोवायस्मिन्॥ पतंगश्चकं उकःभ्रमतश्रमविन्नस्यमे अक्षिणीए
जयतेवंवलतांनयति॥ वक्त्रंकेशसमूहंमुक्तंवंधनंनस्मरसिनसंभालयसिकिंकष्टःधूर्त्तोनीवीहरतिएतद्वनस्मरसिकिम्॥१४॥

त्वं भार्यां कल्पयतीतित्यर्थः

उपलब्धं प्राप्तं॥ मत्सखं ममहे ममित्रमयासहतपश्चर्तुमर्हसि॥ किंवासंभवभावनः संसृतिविस्तारकोब्रह्मामेप्रसीदति॥ सविप्रस्तवसखो विप्रशिवाऽत्र

द्विजदेवेनब्रह्मणादत्तं हग्मनश्चलमंभसत्॥ नापयाति॥ हे वारुश्टंगियतस्तेवित्तं ततोमांत्वदधीनं नेतुमर्हसि॥ सविप्रस्तवसखो विप्रशिवाऽत्र

वर्न्तुतपोर्हसिमयासहमित्रमत्सखं किंवाप्रसीदतिसर्वेभवभाव

रूपंतपोधनतपश्चरतां तपोब्रह्मस्येतत्तुकेनतपसासंभवतोपलब्धं॥ वर्न्तुतपोर्हसिमयासहमित्रमत्सखं किंवाप्रसीदतिसर्वेभवभाव

नोमे॥१५॥ नत्वांत्यजामिदयितां द्विजदेवदत्तं यस्मिन्मनोहृगपिनोनवियातिलग्नं॥ मांवारुश्टंगपर्हसिनेतुमनुव्रतंते वित्तंय

तः प्रतिसरंतु शिवाः सविप्रः॥१६॥ श्रीशुकउवाच॥ इतिललनानुनयातिविशारदोग्राम्यवैदग्ध्ययापरिभाषयातां

विबुधवधूं विबुधमतिरधिसभाजयामास॥१७॥ सावततस्तस्यवीरयूथपते बुद्धिशीलरूपवयः श्रियौदार्येणपराक्षिप्तमनास्तेन

सहायुतायुतपरिवत्सरोपलक्षणंकालं जंबूद्वीपपतिनाभौमस्वर्गभोगात् बुभुजे॥१८॥ तस्यामुहवाऽआत्मजान्सराजवरा

ऽग्नीध्रोनाभिकिंपुरुषहरिवर्षइलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नवपुत्रानजनयत्॥१९॥ सासूत्वाथसुतान्न

वानुवत्सरंगृहएवापहायपूर्वचित्तिर्भूयएवाजंदेवमुपतस्थे॥ ॥२०॥

॥

उक्लासत्वः मांप्रतिसरंतु अनुवर्त्ततां॥ यद्वा॥ एतावत्पर्यंतमियाः॥ सविप्रः सरव्यः शिवाः फेरवताः प्रतिसरंतु निर्यांतु यद्वावनवासेसहचर्यौ॥

हरिणप शिवाः प्रातिसरंतु प्रदक्षिणंगछंतु॥ ग्राम्येषुवैदग्ध्यं यस्याः बुध्यादीनां द्वंद्वैक्यं॥ सूत्वापसत्य उपतस्थेत्रभजत्॥ ॥

८ ५

त्रैत्पत्तिकेनैवस्वभावेन। सहननं दृढंगवां॥ कामानांभोगैः अधि अधिकं मन्यमानः अतिनिर्वेदोक्तैः कर्म्भनिरवारुंधत्त्वापमादयंतेमो
दंतो इति एवंभूताः संज्ञायासोताः परिणीतवंतः ॥पंचमे द्वितीयोऽध्यायः॥ २ ॥ तृतीयेचरितं नाभेः परं मंगलवीर्यतो॥ यस्यय ज्ञेप्रतीतः
सन्नुतोः दृषभोहरिः॥१ नाभिरात्मीध्रसुतः अप्रजया मेरुदेव्याभार्ययासह। अपवर्गसंगेषु कर्मसु ह्रूयमाणेषु॥ इत्यादयः स

आग्नीध्रसुतास्तेमातुरनुग्रहादौत्पत्तिकेनैवसंहननबलोपेताः पित्राविभक्ताआत्मतुल्यनामानियथाविभागंयंबूद्वीप
वर्षाणिबुभुजुः॥१॥ आग्नीध्रोराजात्पन्नकामोऽप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतांश्रुतिभिरवरुरुधेयं
त्रपितरोमोदयंते॥२॥ संपरेते पितरि नवभ्रातरो मेरुदुहितृर्मेरुदेवींप्रतिरूपामुग्रदंष्ट्रीं लतां रामां रम्यामां नारीं भद्रां
देवीमितिसं ज्ञान वोदवहन्॥३॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कंधेजंबूद्वीपस्यनववर्षविभजनोनामद्वितीयोऽध्या
यः॥२॥ ॥श्रीशुकउवाच॥ ॥नाभिरपत्यकामोऽप्रजायामेरुदेव्याभगवंतंयज्ञपुरुषमविहतात्मायजत॥ तस्यहवावश्रद्धया
विशुद्धभावेनयजतः प्रवर्ग्येषुप्रचरत्सु द्रव्यदेशकालमंत्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोपिभगवान्भाग
वतवात्सल्यतयासुप्रतीकआत्मानमपराजितंनिजजनाभिप्रायत्सविविक्षयागृहीतहृदयोहृदयंगमंमनोनयनानंदनावय
वाभिराममाविश्चकार॥ ॥

आरभेयोगा उपायास्तेषामुपपत्त्यासंपत्त्या दुरधिगमो दुःप्रापोपिभागवतेषुकृपालुतयासुप्रतीकः शोभनावयवः सन्नात्मानमाविश्चकार॥
अपराजितंस्वतंत्रंनिजजनानांयेअभिप्रेतार्थास्तेषांविवित्सयागृहीतमाकृष्टंहृदयंयस्य॥ हृदयंगमंसुखकरंयतोमनोनयनान्यानंदयंतितियेअव
विन्नं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पं-टी-
१०

अथहेत्यादिभिः पातवाहुल्यंवाक्यालंकारया॥ आविःकृतंभुजानांयुगलद्वयंयेन हिरण्मयंतेजोमयं॥ पुरुषेषुविशिष्यतइतितथापुरुषो
त्तममित्यर्थः॥ अर्हणेनार्घ्येणसहोपतस्थुः अनजाअनित्यन्वयः॥ विलसत्श्रीवत्सएवललामंचिह्नंयस्य॥ दरवरःशंखःवनरुहंपद्मं॥ अलंकृ
रिष्णौ॥ अमृतमणिःकौस्तुभएवमादिभिः॥ स्फुटकिरणायेप्रवरामणयस्तन्मयानियानिमुकुटादीन्यंगभूषणानितैर्विभूषितौ॥ वक्षमाने
दृष्ट्वांतः॥ अथमाद्यवोत्तमंधनंनिधिं॥ अर्हसीत्यादिनानिगदेनस्तुवंति॥ हे अर्हत्तमपरिपूर्णोपित्वंअनुपथानांभृत्यानामस्माकं अर्हणांमु

अथ अतमाविष्कृतमनुजयुगलद्वयंहिरण्मयंपुरुषविशेषंकपिशकौशेयांबरधरमुरसिविलसत्श्रीवत्सललामंदर १०
वरवनरुहवनमालाच्छूर्य्यमृतमणिगणादिभिरुपलक्षितंस्फुटकिरणप्रवरमणिमयमुकुटकुंडलकटककटिसूत्र
हारकेयूरनूपुराद्यंगविभूषणविभूषितमृत्स्वक्षसदस्यगृहपतयोऽधनाइवोत्तमधनमुपलभ्यसबहुमानमर्हणेनावनत
शीर्षाणउपतस्थुः॥ २॥ अर्हसिमुहुरर्हत्तमार्हणामस्माकमनुपथानांनमोनमइत्येतावत्सदुपशिक्षितंकोर्हतिपुमान्प्र
कृतिगुणव्यतिकरमतिरनीशईश्वरस्यपरस्यप्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभीरूपनिरूपणं॥ ३॥
भुः॥ स्वयमेवस्वीकर्तुमर्हसि॥ ननुवयंस्तोतुंशक्ताइत्याहुः॥ नमोनमइत्येतावदेवास्माकंसद्भिरुपशिक्षितंत्वद्रूपस्यदुर्ज्ञेयत्वात्॥ तदेवा
हुः॥ कोर्हतीति॥ प्रकृतिगुणानांव्यतिकरःप्रपंचस्तस्मिन्नेवमतिर्यस्य॥ अतएवानीशः॥ प्रकृतिपुरुषयोःपरस्य॥ अतएवेश्वरस्य॥
अर्वाक्तनाभिस्त्वामस्पृशंतीभिःप्रपंचांतर्गताभिःनामवद्रूपंचआकृतिश्चआकारस्ताभिस्तवस्वरूपनिरूपणंकर्तुंकोनामपुमान्
नर्हति॥ ३॥ श्रीः॥ ॥

अन्यद्यप्रार्थनीयमस्तीतिआहुः॥ किंचेति॥ आशिषामैहिकानां स्वर्गापवर्गयोरपीश्वरं त्वामुपधावति॥ प्रजायामेव पुरुषार्थ इति प्रत्य
योयस्य अश्वनीयथाफलीकरणं तुषकण्डनादिकमाशासानो धनदमुपधावति इदं च नातिचित्रमित्याहुः॥ इह संसारे ते अपराजित त्वया
मायया अनवसितपदव्या अलक्षितमार्गया अपराजितः को वै न कोपि॥ अतस्तया नाहतमतिकः। अतएव विषयाएव विषं तस्य वेरया
वेगास्तैरनावृतात्मप्रकृतिर्यस्य सकः। यद्यनुपासितमहच्चरणः अतस्त्वन्मायामोहितस्यैवमाशंसा घटत इत्यर्थः। अदभ्रकर्तः हे बहुकार्य
यौवायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भगवंतमुपधावति प्रजायामर्थप्रत्ययो धनमि
वाधनः फलीकरणं॥१०॥ को वा इह तेऽपराभितोऽपराजितया मायया अनवसितपदव्या नावृतमतिः विषयविषरयानावृत आत्मौति
रनुपासितमहच्चरणः॥११॥ यदु ह वाव पुनरदभ्रकर्तरिहै समाहूतस्तदर्थधियां मंदानां नस्त्वं देवहेलनं देवदेवार्हसि साम्येन
सर्वान्प्रतिप्रतिबोद्धुमविदुषां॥१२॥ अतिनिगदेन अभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवंदितचरणः सदय
मिदमाह॥१३॥ अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादितिम
माहमेवाभिरूपः कैवल्यात्। अथापि ब्रह्मवादो नम्मृषा भवितुमर्हति ममैव हि मुखं यद्द्विजदेवकुलं॥१४॥
कारिन् अल्पीयसे कार्याय त्वं यद्यस्मादिह समाहूतोसि॥ तत्र प्रजायामर्थधीर्येषां मंदानां तेषां नो यद्देवहेलनं अवज्ञातं तत् सर्वान्प्रति तव
साम्येन हेतुना प्रतिबोद्धुं सोढुमर्हसि॥ इतिनिगदेन अध्यात्मकस्तोत्रेण वर्षधरो भारतवर्षपतिर्नाभिः ते नाभिवादिता ये ऋत्विजस्तैरभि
वंदितो वरणीयस्य असुलभत्वे हेतुः॥ ममाहमेवाभिरूपः सदृशः कैवल्यात् अद्वितीयात् [illegible] देवा इव ब्राह्मणास्तेषां कुलं॥१४॥

आग्नीध्रीयेनाभौ । पतिं नाभिं हे विष्णुदत्त ॥ तस्यावरोधे अंतःपुरे मेरुदेव्यां शुक्लायां शुद्धसत्वमूर्त्या अवतार ॥ केषां धर्मान् ॥ वातरसनानां
दिग्वाससां ॥ पारवंडिव्या ह्य स्यार्थमाह ॥ श्रमणानां तपस्विनां ऋषीणां ज्ञानिनां ॥ ऊर्ध्वमंथिनां नैष्ठिकब्रह्मचारिणाम् ॥ ॥३॥ इति श्री
पंचमे तृतीयोध्यायः ॥ ॥ चतुर्थादि त्रिभि ४ प्रोक्तो मृषभस्येहितं महत् । लोकार्थ्य येन सत्कर्म्म
नैष्कर्म्य वनि दार्शितौ । चतुर्थे शतपुत्रस्य राज्यं तस्योपवार्णते । तस्य राज्ञो जनः सर्वः संतोषामृत निर्वृतः ॥ अभिव्यज्यमानिन भगवल्ल
ततः आग्नीध्रीयें शाकलयावतरिष्यामि आत्मतुल्यमनुपलभमानः ॥ इति निशामयंत्यां मेरुदेव्याः पतिमभिधार्यातद्द धेन्न भगवान्र्व १२
हिर्षितस्मिन्नेव विष्णुदत्त । भगवान्परमार्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधजने मेरुदेव्यां धर्मान्दर्शयि
तुंकामो वातरसनानां श्रमणानामृषीणामूर्द्ध्वरेतसां शुक्लया तनुवावततार ॥ ॥१५॥ इति श्रीभागवते महापुराणे पंचमस्कं
धे तृतीयोध्यायः ॥ श्रीशुक० । अथ तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिः सर्वसंपद्भि
रनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा देवताश्चावनितलसमवनाया तितरां जगृधुः ॥ ॥१॥ तस्य ह वा इत्थं वर्ष्मणा व
रीयसा बृहत्श्लोके नौजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदमेव नाम चकार ॥ ॥२॥
त्ताणानि पादतला दिषु वज्राङ्कुशादितियस्य । महाविभूतिः सर्वसंपत्तिसाम्यादिभिः सह वर्द्धमानप्रभावं ॥ प्रकृतयो मात्यादयः जगृधुः ॥ अ
भिकांक्षंति स्म ॥ वर्ष्मणा देहेन । तस्य विशेषणद्वयं वरीयसा श्रेष्ठतमेन बृहतः श्लोकाः पद्यानि कवीनां यस्मिन् तेन च ॥ ओजस्तेवीर्यं शक्ता
वा शौर्यमुत्साहः ॥ एतैर्गुणैरति श्रेष्ठत्वादृषभः श्रेष्ठ इति नाम चकार ॥ ॥२॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्यवर्षेमंडले॥ अवरुध्यप्राप्य। स्वैरमिच्छयागृहीतोनरलोकसमानधर्मामनुष्याकारोयेनतं॥ अतएवमाययास्वपुत्रइतिवि
लसितामतिर्यस्य॥ आपौरप्रकृतिपौरान्प्रकृतीश्चाभिव्याप्यविदितोनुरागोयस्मिन्॥ कथंभूतोनाभिः जनपदोजनाःपौरादयः
पदंप्रापणंयस्यसः। आत्मजधर्ममर्यादारक्षार्थमभिषिच्यब्राह्मणानामुत्संगेनिधाय॥ विशालायांबदरिकाश्रमे॥ प्रसन्नंपरा

यस्यहीद्रःस्पर्द्धमानोभगवान्वर्षेनववर्षतदवधार्यभगवान्ऋषभदेवोयोगेश्वरःप्रहस्यात्मयोगमाययास्ववर्षमजनाभं
नामाभ्यवर्षत्॥३॥ नाभिस्तुयथाभिलाषितंसुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलोगद्गदाक्षरयागिरास्वैरंगृहीतनर
लोकसधर्मंभगवंतंपुराणपुरुषंमायाविलसितमतिर्वत्सतातेतिसानुरागमुपलालयन्परांनिर्वृतिमुपगतः॥४॥ वि
दितानुरागमापौरप्रकृतिजनपदोराजानाभिरात्मजंसमयसेतुरक्षायामभिषिच्यब्राह्मणेषूपनिधायसहमेरुदेव्यावि
शालायांप्रसन्ननिपुणे[illegible]पसासमाधियोगेननरनारायणाख्यंभगवंतंवासुदेवमुपासीनःकालेनतन्महिमानम
वाप॥ यस्यपांडवेयश्लोकावुदाहरंति॥५॥ कोनुतत्कर्माराजर्षेर्नाभेरन्वाचरेत्पुमान्॥ अपत्यतामगाद्यस्यहरिःशुद्धेनकर्मणा
॥ ॥ब्रह्मण्योन्यःकुतोनाभेर्विप्रामंगलपूजिताःयस्यबर्हिषियज्ञेसंदर्शयामासुरोजसा॥ ॥ अथहभगवानृषभदेवःस्ववर्षं
कर्मक्षेत्रमनुमन्यमानःप्रदर्शितगुरुकुलावासउपलब्धवरैर्गुरुभिरनुज्ञातोगृहमेधिनांधर्माननुशिक्षमाणोजयंत्यामिंद्र
दत्तायामुभयलक्षणंकर्मसमाम्नायाम्नातमभियुंजन्नात्मजानामात्मनोनूनंशतंजनयामास॥६॥

उद्वेगकरंनिपुणंवातीव्रंतेनउपासीनःसेवमानः॥ नाभेस्तत्त्वसिद्धंकर्मअनुतदनंतरंकोनुपुमानाचरेत्॥ मंगलैर्दक्षिणा[illegible]भिःपूजिताःसंतःऊ
जसामंत्रबलेन अन्येषांग्रहणायप्रदर्शितोगुरुकुलावासोयेन॥ अनुशिक्षमाणः॥ अनुशिक्षयन्॥ उभयविधंश्रौतिस्मार्त्तिलक्षणंकर्म

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा॰ पं॰ १२

तं भरतमनु कुशावर्तादयो नव पुत्रा नवतेः प्रधाना ज्येष्ठा॥ तदनंतरं कविप्रमुखा नव पुत्रा भागवतधर्मप्रदर्शकाः॥ वसुदेवनारदयोः सं
वादोयस्मिन्॥ उपरिष्टात् एकादशो महाशालीनाः अतिविनीताः॥ केवलशुद्धः विपरीतवत् अनीश्वरवत्॥ कर्माणि कुर्वन् न्यपय
मयत्॥ नियममितं वा॥ पाठांतरे॥ नितरामरमयत्॥ कर्मकरणे हेतुः॥ अनुगतमनुवृत्तं धर्मस्य यं भावरणेनात द्विदामुपशि

येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत्॥ येनेदं वर्षं भारतमिति व्यपदिशंति॥ ॥७॥ तमनुकुशावर्त इला
वर्त्तब्रह्मावर्त्तमलयः केतुर्भद्रसेन इंद्रस्पृक् विदर्भः कीकट इति नवनवति प्रधानाः॥ ॥८॥ कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पल =१३
यनः आविर्होत्रोथ द्रुमिलश्चमसः करभाजन इति भागवतधर्मप्रदर्शका नव महाभागवतास्तेषां सुचरितं भगवन्म
हिमोपबृंहितं वसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः॥ ॥९॥ यवीयांस एकाशीतिर्जायंतेयाः पितु
रादेशकरा महाशालीनाः श्रोत्रियाः यज्ञशीलाः कर्मशुद्धा ब्राह्मणा बभूवुः॥ ॥१०॥ भगवानृषभसंज्ञ आत्मतंत्रः स्व
यं नित्यनिवृत्तानर्थपरंपरः केवलानंदानुभव ईश्वर एव विपरीतवत्कर्माण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोप
शिक्षयन्नतद्विदां सम उपशांतो मैत्रः कारुणिको धर्मार्थयशः प्रजानंदामृतावरोधेन गृहेषु लोकान्नियमयत्यद्यच्छी
र्षण्याचरितं तत्तदनुवर्त्तते लोकः॥ ॥१२॥ यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायै

सकलयश॥ कथं॥ धर्मादीनामविरोधेन संग्रहेण॥ आनंदो भोगः॥ अमृतं मोक्षः॥ शीर्षण्यश्रेष्ठः॥ तेनाचरितं तत्तदनुवर्त्तते यतः॥ ॥१३॥ ॥
लोधर्मो यस्मिन् तत् ब्राह्मं गुह्यं वेदरहस्यं यद्यपि स्वेनैव विदितं तथापि ब्राह्मणान् दृष्ट्वैव करोतीत्यर्थः॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मोक्ष [illegible] योर्निदानमाह॥ महत्सेवामिति॥ तमसः संसारस्य। योषितां ये संगिनस्तेषां संगं॥ महतां लक्षणमाह॥ सार्द्धेन महांत इति
साधवः सदाचाराः। मयि ईशे कृतं सौहृदमेव अर्थः पुरुषार्थो येषां वा। वादे नान्यनिरपेक्षस्यैव लक्षणत्वं दर्शयति॥ देहंभरेती
ति देहंभरा विषयासक्तस्तद्वार्त्तैव॥ न धर्मविषया येषु जनेषु जायादियुक्तेषु गृहेषु वा। रातिर्मित्रं धनं वा पाठांतरे॥ जायादिमत्सु
यावदर्थाश्च यावदर्थमेवार्थो येषु। इति मध्यमपदलोपी समासः। देहनिर्वाहाधिकस्पृहाशून्या इत्यर्थः। कामान्नार्हंतीति यद्वा

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां संगिसंगं। महांतस्ते समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये॥ २॥ ये
वा मयीशे कृतसौहृदार्था जनेषु देहंभरवार्त्तिकेषु॥ गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके॥ ३॥ नूनं
प्रमत्तः कुरुते विकर्म यदिंद्रियप्रीतय आपृणोति। न साधु मन्ये यत आत्मनोयमसन्नपि क्लेशद आस देहः॥ ४॥ पराभवस्ता
वदबोधजातो जावन्न जिज्ञासत आत्मतत्वं॥ यावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबंधः॥ ५॥

क्तं तदुपपादयति॥ नूनमिति। यत् यदा इंद्रियप्रीतये आपृणोति व्याप्रियते तदा प्रमत्तः सन् विकर्म पापं नूनं कुरुते॥ यतो विकर्मणः
प्राचीनात् अयं क्लेशदो मे देहो जातः तस्यैव पुनः कारणं साधु मन्ये। देहादेर्नश्वरत्वात् क्रियानयनमनर्थ इत्याशंक्याह॥ पराभ
वो देहादिना स्वरूपविभवः॥ अज्ञानकृतस्तावद्भवति॥ तत्र हेतुः॥ यावत्क्रियाः स्युस्तावदिदं मनो हि कर्मस्वभावमेव स्यात्॥
। येन कर्मात्मकेन मनसा॥ ५॥ ॥छ॥ ॥

द्रव्यादिभिर्निरूपयितैर्यज्ञैरिष्टवान्॥ तत्र वयो यौवनं॥ युवैव धर्ममन्विच्छेदिति वचनात्॥ विविधो देशाना नादेवतोद्देशाः। यथोपदेशं
यथाविधि॥ अन्यस्मात्सकाशादात्मनः कश्चिदपि किमपि कथं च नापि नवांछति॥ इच्छां तु दयेद्दृष्टांतः॥ अविद्यमानं खपुष्पादिकमिव॥ न
वान्यदीयमवेक्षित इत्यर्थः॥ भर्त्तरि ऋषभे प्रतिक्षणमुल्लसितस्नेहोद्रेकं बिनान्यं न वांछति॥ अवहितात्मनः संयतचित्तान पित्र जानुरा
द्रव्यदेशकालवयः श्रद्धर्त्विक् विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज॥ २॥ भगवतर्षभेणैरि
रक्षमाणे एतस्मिन्वर्षे न कश्चित्पुरुषो वांछत्यविद्यमानमिवात्मनोऽन्यस्मात्कथंचन किमपि कर्हिचित् पतिं भर्त्तर्यनुस
वनविजृंभितस्नेहातिशयमंतरेण॥ ३॥ स कदाचिदटमानो भगवानृषभो ब्रह्मावर्त्तगतो ब्रह्मर्षिप्रवरसभायां प्रजानां
निशामयंतीनामात्मजानवहितात्मनः प्रश्रयप्रणयसुयंत्रितानप्युपशिक्षयन्निति होवाच॥ ४॥ ॥इति श्रीभागवते म
हापुराणे पंचमस्कंधे ऋषभदेवानुचरिते चतुर्थोऽध्यायः॥ ॥४॥ ऋषभ उवाच॥ नायं देहो देहभाजां नृलोके कष्टान् कामानर्हते विड्भुजां
ये॥ तपो दिव्यं पुत्रका येन सत्त्वं शुद्ध्येद्यस्माद्ब्रह्मसौख्यं त्वनंतं॥ १॥ ॥अनष्टवाव॥ २४
६
सनार्थमुपशिक्षयन्निति होवाच॥ ॥इति पंचमे चतुर्थः॥ ४॥ ॥ पंचमे मोक्षधर्मोपदेशैः पुत्रानुशासनं॥ उक्तं पारमहं
स्यं च यस्य ह तितिक्षया॥ विड्भुजामपि ये संति तान् कष्टान् दुःखदान् कामान् विषयान् नार्हते॥ तद्योग्योऽयं मनुष्यदेहो भवति॥ दिव्यमुत्कृ
ष्टं॥ येन तपसा यस्मात् शुद्धात्सत्वात् अनंतं ब्रह्मसुखं भवति॥ १॥ ॥

उक्तमुपसंहरति॥ एवं पूर्वकृतं कर्मकर्तृभूतं मनः कर्म्मभूतं वशं प्रयुक्ते पुनः कर्म निर्बंधं करोति॥ जीवन्मुक्तकर्म्मव्यावृत्त्यर्थमाह॥ अविद्यये
ति॥ न केवलं देहयोगमात्रं अनर्थान्तरं चेत्याह॥ यदा गुणानामिंद्रियाणां चेष्टां अयथा मिथ्या आत्मीन भवतीति विपश्चिदविवेकी
सन्न पश्यति॥ नुपश्यतीति पाठो॥ अपथा आत्मीयत्वेनेत्यर्थः॥ तत्र तदा सहसा गतस्मृतिः स्वरूपस्मृतिशून्यः स अज्ञो मूढः मैथुनसुखप्रधा
नं गृहं प्राप्य तापान् विंदति॥ ननु यथोपयोगं स्त्रियामिथुनीभूय सुखमात्रमनुभवतः कुतस्तापाः स्युस्तत्राह॥ पुंस इति॥ प्रत्येकं तयोरेकैको

एवं मनः कर्म्मवशं प्रयुक्ते अविद्ययात्मन्युपधीयमाने॥ प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत्॥६॥ यदान
पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित्॥ गतस्मृतिर्विंदति तत्र तापानासाद्य मैथुन्यमगारमज्ञः॥७॥ पुं
सः स्त्रिया मिथुनीभावमेवं तयोर्मिथो हृदयग्रंथिमाहुः॥ अतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोयमहं ममेति॥८॥
यदा मनोहृदयग्रंथिरस्य कर्मानुबंधो दृढ आश्लथेत॥ तदा जनः संपरिवर्त्तते स्मान्मुक्तः परं यात्यतिहाय हेतुं॥९॥ ॥

हृदयं ग्रंथिरस्त्येव॥ एवं मिथः स्थूलमन्यं हृदयजयोर्ग्रंथिं दुर्भेद्यं वदंति॥ कुत इत्यत आह॥ अथो अस्मान्मिथुनीभावात्॥ प्रत्येकं
हृदयग्रंथिना तु देहेंद्रियमात्रं ऽहं ममेति मोहः॥ अस्मात्तु गृहादिभिर्विषयजन्तैर्महामोहो भवेदित्यर्थः॥ कदा तर्हि तस्य निवृत्तिरिति
आह॥ यदास्य जनस्य कर्म्मभिरनुबद्धो दृढो मनोरूपो हृदयग्रंथिः शिथिलो भवेत्॥ तदा तस्मान्मिथुनीभावान्निवर्त्तते ततश्च हेतु
(महंकारं त्यक्त्वा मुक्तः सन् परं पदं याति॥ ॥८॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा॰पं॰
१५

हेतुमतिस्तयेत्युक्तौ। तत्र पंचविंशतिसाधनान्याह॥ चतुर्भिः। हंसे गुरौ मयि भक्तिश्च सेवा अनुवृत्तिस्तत्परता वितृष्णया सर्वलोकां
तरे व्यसनावगत्या॥ दुःखानुसंधानेन। इहानुवृत्त्या काम्यकर्मत्यागेन। मदर्थैश्च कर्मभिः अहमेव देवो येषां तैः संगात्॥ हे पुत्राः देहगे
हयोरात्मबुद्धेरहं ममेति बुद्धेः॥ अध्यात्मयोगेन अध्यात्मशास्त्राभ्यासेन। सध्र्यक् सम्यक्। असंप्रमादेन कर्त्तव्यस्यापरित्या
गेन। सर्वत्र मद्भावना तत्र विचक्षणेनातिनिपुणेन विज्ञानविराजितेन अनुभवपर्यंतेन ज्ञानेन। योगेन समाधिना॥ धृत्युद्यमसत्व १५

२

हंसे गुरौ मयि भक्त्यानुवृत्त्या वितृष्णया द्वंद्वतितिक्षया च॥ सर्वत्र जंतोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या॥१०॥ म
त्कर्मभिर्मत्कथया च नित्यं मद्देवसंगाद्गुणकीर्तनान्मे॥ निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः॥११॥ अ
ध्यात्मयोगेन विविक्तसेवया प्राणेंद्रियात्माभिजयेन सध्र्यक्॥ सच्छ्रद्धया ब्रह्मचर्येण शश्वदसंप्रमादेन यमेन वाचां॥१२॥
सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन॥ योगेन धृत्युद्यमसत्वयुक्तो लिंगं व्यपोहेत् कुशलोहमाख्यम्॥१३॥ कर्मा
शयं हृदयग्रंथिबंधमविद्ययासाधितमप्रमत्तः॥ अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात्॥१४॥

युतो धैर्य प्रयत्न विवेकैः युक्तः सन्नहंकाराख्यमुपाधिं व्यपोहेत् निरस्येत्॥ ततश्च साधनाद् उपरमेदित्याह॥ कर्म्मणामाशेरते यस्मिन्॥ योगेन
उपायेन यद्यपि फले सिद्धे साधनोपरमः सिद्ध एव तथापि यावद्देहपातं तदभ्यासशंकावारणायोक्तं॥ ॥१४॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंच॥ उत्तानृपिताशिष्यानृगुरुः॥ नृपश्च प्रजाः एवमनुशिष्येत्। ममत्लोकं यश्च कामयतयक्ष। मदनुग्रह एवार्थेयस्य। विमन्युः शिष्टि
तस्याकरोपिको मिश्रन्यश्च॥ अतज्ञानृतत्वमविदुषः॥ श्रेयोबुध्याकर्मसुमूढनरा॥ मनुजः काम्यकर्मसुपुरुषं योजनजनृगर्ते संसारकू
पेतं पातयन्सुमनुजः कंत्वर्थं पुरुषार्थं नयते नकोपीत्यर्थः॥ नयोजयेदित्येवमनुपपादयति॥ लोकइतित्रित्रिभिः॥ यइतिनिकामं अति
तृष्येन कामोयस्य॥ तमीदृशं कुबुद्धिं दृष्ट्वान्तेवकस्तं प्रवर्त्तयेत्॥ नकोपि॥ उत्पथेनगच्छंतं अंधं यथा तेनैवगच्छति॥ कोब्रूयात्॥ समुपेतश्च
सेप्राप्तो मृत्युः संसारो येन तं॥ अतो भक्तिमार्गोपदेशेन मोक्षोनमोचयेत्॥ सगुर्वादिनभवतीत्यर्थः॥ यक्ष॥ यस्तं मोचयितुं नशक्नुयात्तस्य
पुत्रांश्च शिष्यांश्च नृपोगुरुर्वा मुमुक्षोक कामोमदनुग्रहार्थश्च॥ इच्छं विमन्युरनुशिष्येतदज्ञान्नयोजयेत्कर्म्मसुकर्ममूढान्॥ किंयोज
यन्मनुजोर्थं लब्धेत निपातयन्नेवदृशं हिगर्ते॥ १५॥ लोकः स्वयं श्रेयसिनष्टदृष्टि र्योर्थान्समीहेतनिकामकामः॥ अन्योन्यवैर
सुखलेशहेतोरनंतदुःखं न चवेदमूढः॥ १६॥ कस्तं स्वयंतदभिज्ञो विपश्चिदविद्यायामंतरेवर्त्तमानं॥ दृष्ट्वा पुनस्तं सघृणः कुबु
द्धिं प्रयोजयेदुत्पथगं यथान्धं॥ १७॥ गुरुर्न्नसः स्यात्स्वजनोनसस्यात्पिता नसः स्याज्जननी नसा स्यात्॥ दैवं नतत्स्यान्नपति
श्च सस्यान्नमोचयेद्यश्च समुपेतमृत्युं॥ ॥ ॥ इदं शरीरं मम दुर्विभाव्यं सत्वं हि मे हृदयं यत्र धर्म्मः॥ पृष्टे हतो मेयदधर्म आराद तोहि
मामृषभं प्राहुरार्याः॥ १८॥ ॥
दैवं देवतानस्यादितिपूजानग्राह्येत्यर्थः॥ एवमन्यदपिद्रष्टव्यं॥
गुर्वादिर्न्नस्यादितिनिषेधः॥ ततश्च पितानस्यादितिपुत्रोत्पत्त्रीयत्नोनकार्यइत्यर्थः॥ दैवं देवतानस्यादितिपूजानग्राह्येत्यर्थः॥ एवमन्यदपिद्रष्टव्यं॥
गुर्वादिर्न्नस्यादितिनिषेधः॥ ततश्च पितानस्यादितिपुत्रोत्पत्त्रीयत्नोनकार्यइत्यर्थः॥ इदं मनुष्याकारं शरीरं मम दुर्वि
एवं मोक्षधर्मानुपदिशन्नात्मशुश्रूषालक्षणं धर्मं स्पर्द्धा नि[illegible]वृत्तयेतेषां जन्मकथनपूर्वकमाह द्वाभ्यां॥ इदं मनुष्याकारं शरीरं मम दुर्वि
भाव्यमवितर्क्यमिदिच्छाविलसितं नत्वदं प्राकृतो मनुष्य इत्यर्थः॥ मे हृदयं तु सत्वं॥ किंतद्धृदयं यत्र धर्मः॥ तत् शुद्धं सत्वमित्यर्थः॥ कुतश्च यद्य

स्मात्मयोधर्मोद्राद्देवदृष्टे हतश्च उत्सरित अत एवमाह षज्ञे श्रेष्ठ

प्राकृः॥ २८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा॰पं॰ भवतेश्च हृदयेनसत्त्वमयेनजाताः तस्मात्मत्सरांहित्वामहत्तमंसनाभंसोदरंभजध्वं॥ननुत्वत्पुत्रत्वात्॥ त्वांवयंभजेम॥ राजपुत्रत्वा
१९ त्प्रजाश्चपालयामितिचेदतआह॥ तदेवमेसुश्रूषाणं प्रजानांचपालनंभरतानुवृत्तैवसर्वं कृतं स्यादितिभावः॥ इदानींचब्राह्म
णाश्चसेव्याइत्याशयेनतेषांसर्वेभ्यः श्रेष्ठ्यमाहपंचभिः॥ भूतेषुचेतना चेतनेषुविरोहंतीतिवीरुधः स्थावराः उत्तउद्येरतिश
येनोत्तमाः॥ तेभ्योपियेसरीसृपासर्पंतीतिजंगमास्ते उत्तमाइतिसर्वत्रानुषंगः॥ तेष्वपिसुबोधानिष्ठाइतियेषांपश्वादी
नांतेकादकादिभ्यस्ततस्तेष्वपिमनुष्याः ततोपिप्रमथाभूतादयः ततोपिगंधर्वाः ततः सिद्धाः ततोन्येविबुधानुगाः किंनरादयः॥ ते १६
तस्माद्भवंतोहृदयेनजाताः सर्वेमहीयांसममुंसनाभं॥ अक्लिष्टबुध्याभरतंभजध्वं सुश्रूषणंतद्भरणंप्रजानां॥२०॥ भूते
षुवीरुद्भ्यउदुत्तमायेसरीसृपास्तेषुसुबोधनिष्ठाः॥ ततोमनुष्याः प्रमथास्ततोपिगंधर्वसिद्धाविबुधानुगाये॥२१॥ दे
वासुरेभ्योमघवान्प्रधानोदक्षादयोब्रह्मसुतास्ततोपि॥ तेषांभवः सोथविरंचिवीर्यः समत्परोहंद्विजदेवदेवः॥२२॥ न
ब्राह्मणैस्तुलयेभूतमन्यत्पश्यामिविप्राः किमतः परंतु॥ यस्मिन्नृभिः प्रहुतंश्रद्धयाहमश्नामिकामंनतथाग्निहोत्रे॥२३॥
भ्योसुरादेवाः असुरेभ्यः संधिराष्टुः॥ देवाश्चमघवान्प्रधानोदेवेभ्यइंद्रः श्रेष्ठइत्यर्थः॥ ततोपिब्रह्मसुतादयः तेषांमध्येभवः श्रेष्ठः सभवः विरिं २
चिर्येश॥ कैः कारणंयस्यसः॥ विचारंवीर्यः॥ अतस्तज्ज्ञानकत्वा [illegible] रविरिंच्यस्ततःपरइत्यर्थः॥ सोपिविरिंच्योमत्परः॥ अहंपरोयस्य॥ द्विजदे
वाब्राह्मणाएवदेवापूज्यायस्यसोहं॥ ब्राह्मणैरन्यद्भूतंनतुलये॥ समंनपश्यामि॥ अतोब्राह्मणात्परंनुभूतंकिंपश्यामिनकिंचित् वि
प्राइतितत्पत्रेब्राह्मणानांसंबोधनं॥ समस्यैवाभावादधिकंकुतस्यामित्यर्थः॥ तत्रहेतुनाहसार्धाभ्यांयस्मिन्ब्राह्मणैश्रद्धया
प्रकर्षेणहुतंअन्नादिकामंयथेष्ठमहम ——— श्नामि॥२३॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मितन्नूर्द्धत्रिर्वेदाख्यायेनब्राह्मणेनईह्लोकेधृतायत्रचब्राह्मणेसत्वादयोऽष्टौगुणाः [illegible] ततःपरंकिंपश्यमीत्यन्वयः।निस्पृहत्वमाह॥ ॥
मत्तोपियेषांनकिंचित्प्रार्थनीयमस्तितेषामितरेणराज्यादिना किमुतस्यात्नाकिमपि।तदेवंब्राह्मणसमानंविधायेदानींसर्वभूतसंम
नंविधायेदानींसर्वभूतसमानंविधत्ते॥हेसुताःसर्वाणिजंगमानिस्थावराणिचभूतानिमदधिष्ठानतयावोयुष्माभिःसंमाननीयानिपदेपदेस्तो

तारा१

धृतास्तनूरुशतीर्मम्पुरार्यैनेह सत्वंपरमंपवित्रं॥शमोदमःसत्यमनुग्रहश्चतपस्तितिक्षानुभवश्चयत्र।२४।मत्तोप्यनं
तात्परतःपरंनस्वर्गापवर्गाधिपतेर्नाकिंचित्।येषांकिमुस्यादितरेणतेषांत्रकिंचनानांमयिभक्तिभाजां।२५।सर्वाणिमद्धि
ष्ण्यतयाभवद्भिश्चराणिभूतानिसुताध्रुवाणि।संभावितव्यानिपदेपदेवोविविक्तदृग्भिस्तदुहार्हणंमे।२६।मनोवचो
दृक्करणेहितस्यसाक्षात्कृतंमेपरिवर्हणंहि।विनापुमान्येनमहाविमोहात्कृतांतपाशान्नविमोक्तुमीशेत्।॥२७॥

लहणेविविक्तापूतामत्सरादिरहितादृष्टिर्येषान्तैःतदेवमहार्हणंसर्वकर्म्मणांईश्वरार्पणं विधत्तेमनोवचोदृक्शामन्येषांचकर
णानामीहितस्यव्यापारस्यामेपरिवर्हणंआराधनमेवसाक्षात्कृतंफलं।येनपरिवर्हणेनविनाकालपाशाद्विमोक्तुंनईशेत्नसम
र्थोभवेत्॥ ॥२७॥

५

स्वतएवप्रवृत्तितानपिलोकानुशासनार्थमनुशास्यमुनीनांपारमहंस्यंधर्ममुपशिक्षयिष्यन्भरतमभिषिच्यऋषभइत्यपदेशोनामयस्यस
भगवान्ब्रह्मावर्तात्स्वदेशात्प्रवव्राजेत्यन्वयः॥उर्वरितोवशिष्टःशरीरमात्रपरिग्रहोयस्य।अभिज्ञाप्यमाणोपिजनानांमध्येजडा
दिवद्वर्तमानस्तूष्णींबभूव॥अवधूतस्येववेषोयस्य॥तत्रतत्रपुरादिष्वनुपथंमार्गेअवनिचरापसदैर्दुर्जनैस्तर्जनादिभिःपरिभूय
माणोपितदविगणय्यैकैकचरएकाकीपृथिवींपरिबभ्रामेत्यन्वयः॥तत्रपुरंपत्तनं॥ग्रामाहट्टवंतः आकरःखानिःखेटःकृषीवलग्रामः
शुष्मादिवाटिकाःशिबिरंसैन्यानामावासस्थानंव्रजोगवांस्थानं॥घोषोगोपालानाम्॥सार्थोयात्रिकजनसंघातःआश्रमोऋषीणां।तर्जनंभ

श्री शुक उवाच॥ ॥ सएवमनुशास्यात्मजान्स्वयमनुशिष्टानपिलोकानुशासनार्थंमहानुभावःपरमसुहृद्भगवानृषभापदेशउ
पशमशीलानामुपरतकर्मणांमहामुनीनांभक्तिज्ञानवैराग्यलक्षणंपारमहंस्यधर्ममुपशिक्षमाणःस्वतनयशतज्येष्ठंपरमभा
गवतंभगवज्जनपरायणंभरतंधरणिपालनायाभिषिच्यस्वयंभवनएवोर्वरितशरीरमात्रपरिग्रहः॥उन्मत्तइवगगनपरिधा
नःप्रकीर्णकेशआत्मन्यारोपिताहवनीयोब्रह्मावर्तात्प्रवव्राज॥ ॥२८ जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषोभिभा
ष्यमाणोपिजनानांगृहीतमौनव्रतस्तूष्णींबभूव॥२९ तत्रतत्रपुरग्रामाकरखेटवाटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथ
मवनिचरापसदैःपरिभूयमानोमक्षिकाभिरिववनगजस्तर्जनताडनावमेहननिष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरु
क्तैस्तदविगणयन्नेवासत्संस्थानएतस्मिन्देहोपलक्षणेसदपदेशउभयानुभवस्वरूपेणस्वमहिमावस्थानेनासमारोपिताहंममा
भिमानत्वादविखण्डितमनाःपृथिवीमेकचरःपरिबभ्राम॥ ॥३०॥ ॥ यज्जननोताडनंप्रहारः।मेहनंउपरिमूत्रणं।ष्ठीवनं श्लेष्मप्रक्षेपः।ग्रावा
शकृतोरजसश्चप्रक्षेपःपूतिवातोधोवायुः।दुरुक्तंशापः।एतैःअगणनेदृष्टान्तःमक्षि
काभिरिवेति॥ तत्रैवहेतुः असतिमिथ्याभूतेसंस्थानेसन्निवेशेदेहइत्युपलक्षणमाकारोयस्य॥सदितिअपदेशमात्रंयस्यतस्मिन्निरभिमानत्वात्

कैर्निर्दिष्टाना [illegible] सदसतोः [illegible] ७ तस्मिन् [illegible]
वस्थानेनेतानारोपिताहंकारममाभिमानोयस्यसः परिबभ्राम॥ ३०॥

सवदाग्रहगृहीतइवादृश्यत॥ तत्र हेतुः॥ पराक्रपुरतोवलंबमानाश्च कुटिलाश्च केशास्तेजांम्बूरिर्न्नारोयस्यसः॥ अवधूतंअनादृतं अतए
वमालिनंनिजंशरीरं तेन॥ कथंभूतोप्येव मदृश्यत॥ अतिसुकुमाराणि करचरणोरस्थलानि तथा विपुलवाक्कादयस्तएवावयवास्तेषां
विशिष्टोन्यासः॥ तन्निवेशोयस्यसः॥ तथाप्रकृत्येवसुंदरः स्वभावशुद्धोहासस्तेन शोभनंमुखंयस्य॥ तथानवनलिनदलवद्दावरंतीये
शिशिरतारेतापहारकनीनिके अरुणेआयते नयनेताभ्यांरुचिरः तथासदृशा अन्यूनाधिकाः सुभगाश्च कपोलकर्णकंठनासिकायस्य॥

इतिसुकुमारकरचरणोरस्थलविपुलवाक्कसगलवदनाद्यवयवविन्यासः प्रकृतिसुंदरस्वभावहाससुमुखः नवनलिन
दलायमानशिशिरताराऽरुणायतनयनरुचिरसदृशसुभगकपोलकर्णकंठनासोविगूढस्मितवदनमहोत्सवेनपुरव
नितानांमनसिकुसुमसराशनमुपदधानः परागवलंबमानकुटिलजटिलकपिशकेशभूरिभारोवधूतमलिननिजशरी
रेणग्रहगृहीतइवादृश्यत॥ ३१॥ यर्हिवावसभगवांल्लोकमिमंयोगस्याद्धाप्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्मबीभत्सि
तमितिव्रतमाजगरमास्थितः शयानएवाश्नाति पिवति खादत्यवमेहति हदति स्मचेष्टमानउच्चरितआदिग्धोद्देशः॥ ३२

तथानर्णस्मितंयद्वदनंतस्यमहोत्सवेन विभ्रमेण पुरांगणानांमनसिकाममुद्दीपयन् एवंभूतोपितथा॥ दृश्यतेलक्ष्यजः॥ यर्हियदालोकंजनोयोग
स्यप्रतिपद्तमवक्षाणः पश्यतकृत्वा॥ तस्यप्रतिक्रियाकरणंचनिंदितमित्यावक्षाणः तथा आजगरं व्रतमास्थितः सन् शयानएवाश्नाति स्मेत्यथ
यः॥ आजगरंव्रतंनामेकत्रैवस्थित्वाप्रारब्धकर्मोपभोगः॥ अवमेहति मूत्रयति॥ हदति पुरीषमुत्सृजति॥ उच्चरितेपुरीषेवेष्टमानोविलुंठन्नेते

नैवादिग्धाआलिप्ताउद्देशादेहप्रदेशायस्यसः। ॥३२॥

भाग. १८ वीभत्समिवाङ्गं क्थाह॥ तस्येति॥ पुरीषस्य सुरभिना गंधेन सौगंध्यं यस्य॥ स वायुः॥ एवं गवादिचर्ययापानादिकरोतीत्याह तदेवाह॥ व्रजन्निति
तथा दिकाकमृगगवामिवान्यदपि चरितं हस्तितिर्यक्स्थानानायोगचर्याश्चचरीतितथा॥ लोकयात्रापरिहाराययोगिभिरेवं वर्तितव्यमिति
प्रदर्शनाय तथा कृतवाननुवस्तुतस्तु भगवान्यतः अविरतः परममहानन्दत्वरोत्तरत्रातगुणत्वेनोक्तोपश्चानंदः तदनुभवस्वरूपः किंच॥१०

एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः
तस्य पुरीषसुरभिसौगंध्यवायुस्तं देशं दशयोजनं समंतात्सुरभिं चकार॥ एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः १८
शयानः काकमृगगोचरितः पिबत्यत्ति मेहति स्म॥३३॥ इति नानायोगचर्याचरणो भगवान्कैवल्यपतिरृषभोऽविर
तपरममहानंदानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेवे आत्मनोऽव्यवधानानंतरोदरभावेन
सिद्धसमस्तार्थपरिपूर्णो योगैश्वर्याणि वैहायसमनोजवांतर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगता
नि नांजसा नृप हृदयेनाभ्यनंदत्॥३४॥ ॥इति श्रीभागवते महापुराणे पंचमस्कंधे ऋषभदेवानुचरिते पंचमोऽध्यायः॥

वासुदेवेन आत्मनोऽव्यवधानेन अभेदेन विद्यते अन्येषामिवांतरामध्ये उदरस्य देहोपाधेर्भावस्तेन॥ नित्यनिवृत्तोपाधित्वेनोक्तस्यार्थः॥
स्वत एव सिद्धैः समर्थैरर्थैः फलैः परिपूर्णत्वाद्योगैश्वर्याणि नाभ्यनंदत्॥ वैहायसं खेचरत्वं मनोजवं मनसः वदेहस्य वेगः॥ दूरं ग्रहणं
दूरे दर्शनं॥ हे नृप॥ हृदयेन मनसा॥ ॥३४॥ ॥इति पंचमे पंचमोऽध्यायः॥ ॥५॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अथोली नाम्नि मानस्य देहत्यागकर्मा नित्था। अदहंतं दयार्द्रियः पतत्पन्नपि न पतत्पति। १ योगैश्वर्याणि नाम्यनंददिदित्युक्तौ तत्र पृच्छति नेति॥
भगवः हे भगवन् योगेन समीरितमुद्दीपितं यत् ज्ञानं तेनावभर्जितानि दग्धानि कर्मबीजानि रागादीनि यैस्तेषां यदृच्छया प्राप्तानि योगैश्व
र्याणि पुनः क्लेशदानि भवितुं नार्हति॥ अतः किमिति नाभ्यनंददित्यर्थः। अंगीकृत्य परिहरति॥ सत्यमिति। एके बुद्धिमंतः अनवस्थान
स्य चंचलस्य मनसो विश्वासं न गच्छंतो न संप्रयच्छंति॥ शठकिरातो यथा श्वते पदि मृगेषु। शठे किराते यथा मृगा इति सम्बंधं हंवा॥

श्री राजोवाच॥ ॥ ननु नूनं भगवन् आत्मारामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणि पुनः क्लेशदानि भवितु
मर्हति॥ यदृच्छयोपगतानि॥ १॥ श्रीशुक उवाच॥ सत्यमुक्तं किंत्विह वाव एके न मनसोऽद्धा विश्रंभमनवस्थानस्य शठकिरात
इव न संगच्छति॥ २॥ न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते॥ यद्विश्रंभाच्चिराच्चीर्णं चस्कंद तप ऐश्वरं॥ ३॥

पाठांतरे शठे वंचके किराते वणिक् व्यवहर्तरि यथा। तस्मिन् व्यवहर्तरि यथा॥ विश्वासं न यातीत्यर्थः॥ पाद्मिकोऽपि दोषो वर्ज
नीय इत्युपदेष्टुं नाभ्यनंदतादिति भावः॥ यद्विश्रंभात् यस्य विश्वासात् चिराच्चीर्णं चिरकालसंचितं तपश्चस्कंद अस्रवत्। ऐ
श्वरं विष्णोर्मोहिनीरूपदर्शनेन॥ यद्वा॥ ईश्वराणां समर्थानामपि सौभरि प्रभृतीनां तपः॥ ३॥ १

श्री भा॰ पं॰
१८

तत्रहेतुः॥ नित्यमिति॥ कृतविश्वासोयोयोगीतदीयंमनः कामस्यतमनुयेरयस्तेषांचछिद्रमवकाशंददाति॥ यथाकृतविश्वासस्य
संपत्युः पुंश्चलीजायाजाराणामवकाशंदत्वातपातितथामनोपिकामादिभिर्योगिनंभ्रंशयतीत्यर्थः॥ अरीन्कथयन्नुपसंहरति॥
कामइति॥ यन्मूलः यन्निमित्तोभवति तन्मनः कोनुबुधस्वीः कुर्यात्॥ स्वाधीनमितिमन्येत॥ प्रासंगिकं समाप्य॥ प्रस्तुतमाह॥
अथेति॥ अखिलानां लोकपालानांललामोमंडनभूतोपि उपरतावाधितादेहाभिमानवृत्तिर्यस्मात्सउपररामदेहाभिमा
नित्यंददातिकामस्यछिद्रंतमनुयेऽरयः। योगिनः कृतमैत्रस्यपत्युर्जायेव पुंश्चली॥ ॥४॥ कामोमन्युर्मदोलोभः शोक
मोह भयादयः॥ कर्मबंधश्चयन्मूलः स्वीकुर्यात्कोनुतद्बुधः॥ ॥५॥ अथैषमाखिललोकपालललामोपिविलक्ष
णैर्जनैर्क्रीडवदवधूतवेषभाषाचरितैर विलक्षितभगवत्प्रभावोयोगिनांविविधमनुशिक्षयन्स्वकलेव
रंजिहासुरात्मन्यात्मानमसंव्यवहितमनर्थांतरभावेनान्वीक्षमाणउपरतानुवृत्तिरुपरराम॥ ॥६॥ तस्य
हवाएवंमुक्तलिंगस्यभगवतऋषभस्ययोगमायावासनयादेहइमांजगतीमभिमानाभासेन [illegible]वंक्रममाणः॥ ७
नंजहौ॥ विलक्षणैरनेकैः प्रकारैरवधूतवेषादिभिर्नविलक्षितोभगवत्प्रभावोयस्मिन्॥ सांपरायविधिंदेहत्यागप्रकारं अाधारा
धेयभावव्यावृत्त्यर्थमाह॥ अनर्थांतरभावेनअभेदेन॥ उपासनाव्यावृत्त्यर्थमाह॥ असंव्यवहितं॥ मनसा स्वयंत्यक्तेऽप्यभि
मानेकेनापिसंस्कारेणदेहः प्रवलीतियथाकुलालचक्रंसोयमभिमानाभासः तेन सह जीवन्मुक्तानामविद्यावासनयाऽव

२८

कौकादीन्देशान्गतःसन्।कयापिवासनयाऽऽस्येकृतअश्मकवलोयेन॥असंवीतोनग्नः॥समीरवेगेनविधुतानांकंपितानांवेणूनां
संघर्षणेनजातउग्रोदवानलः॥आलेलिहानःसर्वतोग्रसन्॥अवधूतवेषेणऋषभदेवस्तत्रगतइत्येतस्यश्लोकमाह॥यस्य

॥ कोंकवेंककुटकान्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतःकुटकाचलोपवनआस्यकृताश्मकवलउन्मादइ
वमुक्तमूर्द्धजोऽसंवीतइवविचचार॥अथसमीरवेगविधुतवेणुविकर्षणजातोग्रोदावानलस्तद्वनमालेलिहानःसहतेन
ददाह॥ ॥८॥ यस्यकिलानुचरितमुपाकर्ण्यकोंकवेंककुटकानांराजार्हन्नामोपशिक्ष्यकलावधर्मउत्कृष्यमाणे
भवितव्येनविमोहितस्वधर्मपथमकुतोभयमपहायकुपथपाखंडमसमंजसंनिजमनीषयामंदःप्रवर्त्तयिष्यति॥
॥९॥ येनहवावकलौमनुजापसदादेवमायाविमोहिताःस्वविधिनियोगशौचचारित्रहीनादेवहेलनान्यपव्रतानिनि
जेच्छयागृह्णानाअस्नानानाचमनाशौचकेशोल्लुंचनादीनिकलिनाधर्मबहुलेनोपहतधियोब्रह्मब्राह्मणयज्ञपुरुषलोकवि
दूषकाःप्रायेणभविष्यंति॥१०॥

किलाश्रमातीतमनुचरितंतद्देशवासिभ्यउपाकर्ण्यअर्हन्नितिनामयस्यसराजास्वयंतत्रउपशिक्ष्यशिक्षित्वाकुपथंआसोपाखंडंच
तन्निजमनीषयासंप्रवर्त्तयिष्यतइत्यन्वयः॥तत्रहेतुः॥कलावित्यादि॥भवितव्येनप्राणिनांपूर्वसंचितपापफलेनयेनप्रवर्त्तकेन॥मनु
जेष्वपसदानिकृष्टाःस्वविधिनानियोगोयस्मिन्शौचचारित्रेतद्विहीनाःदेवावज्ञारूपाण्यस्नानादीनिकुव्रतानिगृह्णानावेदादी
नांविदूषकाभविष्यंति॥१०॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा०पं० २०

तत्फलं वा धंतमः प्राप्स्यंतीत्याह्यान्ते वेति॥ अर्वाक्तनया अवेदमूलया निजलोकयात्रयास्वेच्छया यत्कृतं प्रवृत्त्या। आम्ब
स्ताः कृतविश्वासाः। ननु तर्ह्यनर्थकारी किमर्थोयमृषभावतारस्तत्राह॥ रजोव्याप्तानां मोक्षमार्गोपशिक्षणार्थः।
तत्र कैवल्योपशिक्षणस्यानुरूपाः श्लो अधिकं पुण्यं यस्मिन्। एतद्भारतं वर्षं ऋषभाद्यवतारयुक्तानि कर्माणि॥ प्रियव्रतस्य
वंशः अवदातः शुद्धः यत्र वंशे। यस्मादकर्म मोक्षस्तद्धेतुं धर्मं चचार। अपरः कोनु योगी। अस्य काष्ठां दिशां मनसाप्यनुगच्छेत्। यो २०

तेस्त्वर्वाक्तनया निखिललोकचर्यया परंपरया अतएवाश्रद्धस्तास्तमस्यंधे स्वयमेव पतिष्यंति॥११॥ अयमवतारो रजसोप
प्लुतकैवल्योपशिक्षणार्थः। तस्यानुगुणाञ्श्लोकानुगायंति॥१२॥ अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्य
मेतत्। गायंति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवंति॥१३॥ अहो नु वंशो यशसावदातः प्रैयव्रतो यत्र पुमान्पुराणः
कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुं॥१४॥ को न्वस्य काष्ठामपरोनुगच्छेन्मनोरथेनाप्यभवस्य योगी।
यो योगमायाः स्पृहयत्युदस्ता ह्यसत्तया येन कृतप्रयत्नाः॥१५॥ इति ह स्म सकलवेदलोकदेवब्राह्मणगवां परमगुरोर्भग
वतः ऋषभाख्यस्य विशुद्धाचरितमीरितं पुंसां समस्तदुश्चरिताभिहरणं परममहामंगलायनमिदमनुश्रद्धयोपचितयानु
शृणोति आश्रावयाति वा वासुदेवे एकांततो भक्तिरनयोरपि समनुवर्त्तते॥१६॥॥

योगी येन ऋषभेण असत्तया अवस्तुत्वेन उदस्ता निरस्ता योगमायाः सिद्धीर्वांछंति। कथंभूताः कृतः प्रयत्नो यासु तदर्थं प्रयत्नं चक्रे
तीत्यर्थः। विशुद्धाचरितं यत् ईरितं कथितं तत्समस्तदुश्चरितममितो हरतीति तथा परममहामंगलानामयनं वा। अवहितः सन् न
योरपि श्रोतृश्रावयित्रोरविशेषेण भक्तिः सम्यगनुवृत्त्या भवतीत्यर्थः॥ ॥ ॥१६॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भक्तेः परमपुरुषार्थत्वमाह ॥ यस्यां भक्तौ विवनतु योगादिषु ॥ अनुसवनमविरतं आत्मानं स्नापयंतः स्वयमासादितं भगवता स्वयमे
व दीयमानमपि अनादरे हेतुः ॥ भगवदीयत्वेनैव परितः समाप्ताः सम्पूर्णाः प्राप्ताः सर्वे पुरुषार्था यैस्ते ॥ ननु भगवतोतिसुलभत्वे
दर्शनाभ्यो स्यवाति दुर्लभत्वादिभमतिरक्ततिरवेत्याशंक्याह ॥ हे राजन् भवतां पांडवानां यदूनां च पतिः पालकः गुरुरुपदेष्टा ॥
प्रियः सुहृत् ॥ कुलस्य पतिर्नियंता किं बहुना ॥ क्वचकदाचित् दौत्यादिषु वः पांडवानां किंकरोपि ॥ आज्ञावर्त्ती ॥ अस्त्वेवमेवं ॥ तथा

यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयंतस्तयैव परया निर्वृत्या ह्यपव
र्गमात्यंतिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियंते ॥ भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः ॥१७॥ राजन्प
तिर्गुरुरयं भवतां यदूनां दैवं प्रियः कुलपतिः क्वच किंकरो वः ॥ आसीत्स्वेदेव भगवान्भजतां मुकुंदो मुक्तिं ददाति कर्हि
चित्स्म न भक्तियोगं ॥१८॥ नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः ॥ लोकस्य यः करुणयाभ
यमात्मलोकमाख्यान्नमो भगवते ऋषभाय तस्मै ॥१९॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ऋषभानुचरिते षष्ठोध्यायः ॥६॥

प्यत्रेषां नित्यं भजतामिति मुक्तिं ददाति न तु क्वचिदपि सप्रेमभक्तियोगं वर्णितमृषभावतारं नमस्करोति ॥ नित्यमनुभूतं स्वरूपं स एव ला
भः तेन निर्वृत्ता तृष्णा यस्य सः अतद्रचनया देहाद्यर्थमनोरथेन श्रेयसि विषये चिरं सुप्ता बुद्धिर्यस्य तस्य जनस्य करुणया निर्भय
मात्मस्वरूपं य आख्यातवान् तस्मै नमः ॥१९॥ इति पंचमे षष्ठोध्यायः ॥६॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा०पं०
२९

अध्यायानां त्रयेणैवमृषभाख्यानमीरितं॥ अष्टाभिर्भरताख्यानमतः प्रस्तूयतेऽमृतं॥१॥ सप्तमे भरतो राज्ये चिरं यज्ञैर्हरिं जयन्॥ आ
रब्धकर्म निर्वाणो हरिक्षेत्रे भजन्हरिं॥१॥ संचिंतितः संकल्पेनैव राज्यादौ नियुक्तः आत्मनो निरूपात्॥ भूतादिरहंकारस्तद्वद्भूतसूक्ष्मा
णीति संततिर्हद्वैदृशंतं। भारतमिति स्वनाम्नाख्यापकत्वेन धर्माद्युतिशाय॥ स्वचितः। बहुवित्सर्वतः। यज्ञाश्चरूपाः क्रतवः सयू

श्री शुक उवाच॥ ॥भरतस्तु महाभागवतो यदा भगवतावनितलपरिपालनाय संचिंतितस्तदनुशासनपरः पंच
जनीं विश्वरूपदुहितरमुपयेमे॥१॥ तस्यामु ह वा आत्मजान्कार्त्स्न्येनानुरूपानात्मनः पंच जनयामास भूतादिरिव स्व
सूक्ष्माणि सुमतिं राष्ट्रभृतं सुदर्शनमावरणं धूम्रकेतुमिति॥ अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशंति॥२॥
स बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया स्वे स्वे कर्मण्यनुवर्त्तमानाः प्रजाः स्वधर्ममनुवर्त्तमानः पर्यपालयत्
॥३॥ ईजे च भगवंतं यज्ञक्रतुरूपं क्रतुभिरुच्चावचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिवि
कृतिभिरनुसवनं चातुर्होत्रविधिना॥४॥

पाः तद्रूपं उच्चावचैः महद्भिरल्पैश्च क्रतुभिः कर्मभिः श्रद्धया ईजे चातानेवाह॥ आहृतास्वाधिकारेणात्मसात्कृताः ये अग्निहोत्रादयः
तेषां प्रकृतिविकृतिभिः अग्निहोत्रादयः षड्विधाः सकलांगयुक्ताः प्रकृतयः विकलांगा विकृतय इति तैर्विविधैरपीष्टवान् नित्यर्थः
अनुसवनमित्यंतं वा चातुर्होत्रविधिनेत्यंतं वागाद्यां॥४॥

२१
पंचक

किं॥सत्प्रवरत्स्ति॥प्रवर्त्तमानेषुनानायोगेषु विरचिता अनुष्ठिताश्चंगक्रियायेषांतेषुयदपूर्वंतद्वासुदेवएवभावजमानश्च्रि
त्रसत्रसयजमानोयत्तनायोयेदेवाःसूर्यादयःतान्पुरुष सवासुदेवस्यावयवेषुवक्षरादिष्वभ्यधायन्॥नतुपृथत्वेनेत्यन्वयः॥
अपूर्वंपत्तक्ष्यंमीमांसकानां।तदानीमेववस्तुत्त्म त्वेनोत्पन्नंफलमेवापूर्वंकालान्तरफलोत्पादिकाकर्मशक्तिर्वेतितदुक्तं यागा
देवंफलंतद्धिशक्तिद्वारेणसिध्यति।सूत्त्मशक्त्यात्मकंवापि फलमेवोपजायतइतितदेवाह॥क्रियाफलंधर्माख्यमितिवा।
ननुपद्यंग देवताःकर्मप्रधानमितिमतं तर्हिकर्मनिष्ठमपूर्वंस्यात्।तदुक्तं॥कर्मभ्यःप्रागयोग्यस्यकर्मणःपुरुषस्यवा॥यो

संप्रवरत्स्वनानायोगेषुविरचितांगक्रियेष्वपूर्वंयत्तत्क्रियाफलंधर्माख्यंपरेव्रलणियज्ञपुरुषेसर्वदेवतालिंगानां
मंत्राणामर्थनियामकतयासाक्षात्कर्तरिपरदेवतायांभगवतिवासुदेवएवभावयमानःआत्मनैपुण्यमृदित
रूषायोऽविघ्नध्वर्युनिर्गृह्यमाणेषुसयजमानोयज्ञभाजोदेवांस्तान्पुरुषावयवेष्वभ्यध्यायत्।१४॥॥

योग्यताशास्त्रगम्यायापरासापूर्वमिष्यतइति॥अथदेवताप्रधानंकर्मतुदेवताराधनार्थंतदादेवताप्रसादरूपत्वादपूर्वस्यदे
वताश्रयत्वमेवयुक्तं॥प्रोक्षणाद्यपूर्वस्येवव्रीह्याद्याश्रयत्वंकुतोवासुदेवाश्रयत्वपूर्वंभावयति॥उच्यतेयदिकर्म निष्ठम
पूर्वंतर्हिवासुदेवस्यांतर्यामिणःप्रवर्त्तकत्वेनमुख्यकर्तृत्वात्तदाश्रयमेवापूर्वंननुतत्प्रयोज्यसयजमानाश्रयंशास्त्रफलंप्रयोक्तरीति
न्यायात्॥अन्यथाऽचेतनानामप्यपूर्वाश्रयत्वप्रसंगप्रस्यात्।तदेवाह॥साक्षात्कर्त्तरीति देवतापिवासुदेवाश्रयत्वमेवंत्याहि।परदे
वतायामिति॥परदेवतात्वेहेतुःसर्वदेवतालिंगानांतत्तद्देवताप्रकाशकानांमंत्राणांयेऽर्थाइंद्रादिदेवतास्तेषांनियामकतयातस्यै
वप्रसादयनीत्वात्।फलदातृत्वाद्युक्तमेवापूर्वाश्रयमित्यर्थः।एवंभावनमेवात्मनोनैपुण्यंकौशलंतेनमृदिताक्षीणाकषा

प्रायेन ॥१४॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं कृतया कर्मविशुद्ध्या विशुद्धसत्वस्य भक्तिरजायतेत्यन्वयः॥ कः अंतर्हृदयेय आकाशः स एव शरीरं अभिव्यक्तिस्थानं यस्मिन्
न् ब्रह्मणि कीदृशे॥ महापुरुषरूपस्योपलक्षणमाकारो यस्य स तस्मिन्॥ किंच॥ श्रीवत्सादिभिरुपलक्षितेन निजपुरुषाणां
नारदादीनां हृदि लिखितवन्निश्चलतया स्थितेन उक्तेन पुरुषेण आत्मनि स्वमनसि विरोचमाने॥ कीदृशी भक्तिः अत्यंत
मतिशायेन एधमानो रयो वेगः प्रकर्षो यस्याः। एवमनुवृत्ता वर्षाणामयुतानि तेषां सहस्रं तत्पर्यंतं काले अवसितो निश्चि

एवं कर्मविशुद्धि विशुद्धसत्वस्यांतर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपलक्षणे
श्रीवत्सकौस्तुभवनमालारिगदादिभिरुपलक्षितेन निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण विरोचमा
नऊर्ध्वे स्तरां भक्तिरनुदिनमेधमान रयाजायत॥ ॥५॥ एवं वर्षायुतसहस्रपर्यंतावासितकर्म निर्वाणावसरो धि
भुज्यमानं तनयेभ्य ऋक्थं पितृपैतामहं यथादायं विभज्य स्वयं सकलसंपन्निकेतात्॥ स्वनिकेतात् पुलहाश्र
मं प्रवव्राज॥ ॥६॥ यत्र ह वाव भगवान् हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन संनिधाप्यते इच्छारूपेण॥ यत्राश्रम
पदान्युभयतो नाभिभिर्दृषच्चक्रैश्चक्रनदी नाम सरित्प्रवरा सर्वतः पवित्रीकरोति॥ ॥७॥

तच्च कर्मनिर्वाणावसरो राज्यभोगादृष्टसमाप्तिरमयो येन सः अधिक्रियमाणं भुज्यमानं रिक्थं धनं यथा विभागं विभज्य सकलसं
पदां निकेतात् आश्रयात् स्वगृहात् पुलहाश्रमं हरिक्षेत्रं प्रवव्राज॥ यत्र क्षेत्रे विद्याधरकुंडो वात्सल्यं कर्तुं तेषु संनिहि
तः क्रियते॥ भक्ता नाम पेक्षितेन रूपेण संनिहितो भवतीत्यर्थः। आश्रमस्थाना नि उभयत उपर्यधश्च नाभिर्येषां तैः दृषच्चक्रैः
(शिलामध्यगतैः श्चक्रैश्च नदी गंडकी सरितां श्रेष्ठा पवित्रीकरोति॥ ॥७॥

एकलः एकः आराधनं समीहमानः कुर्वाण॥ विविक्तः शुद्धः॥ अत एवउपरतो विषयाभिलाषोयस्य सः॥ उपभृतश्च संवृद्धः उपशमोयस्य प्रवर्द्धमानानुरागस्य भरेण तद्रुतं द्रवीभूतं हृदयं तस्मिन् शैथिल्यमनुद्यमो यस्य आत्मनि देहे उद्भिद्य मानेन रोमकुलं रोमांचवृंदं यस्य कःकारः समासान्तः॥ औत्कंठ्यात् प्रवृत्तेन प्रणयबाष्पेण निरुद्धो वलोकोपयोः तेन यत्नेयस्य

तस्मिन्नेव किल स एकलः पुलहाश्रमोपवने विविध कुसुम किशलय तुलसिकांबुभिश्च कंदमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्त उपरत विषयाभिलाष उपभृतोपशमः परां निर्वृतिमवाप॥ तयेत्थमविरतं पुरुषपरिचर्यया भगवति प्रवर्द्धमानानुरागभरद्रुत हृदयशैथिल्यः प्रहर्षवेगेनात्म न्युद्भिद्यमानरोमपुलककुलक औत्कंठ्य प्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं ॥९॥ निजरमणारु णचरणारविंदानुध्यानोपचित भक्तियोगेन परिप्लुत परमाह्लादगंभीर हृदयह्रदावगाढ धिषणस्तामपि क्रियमाणां भगवत्परिचर्यां न सस्मार॥१०॥

सः। एवं वर्त्तमानस्तामपि भगवत्सपर्यां न सस्मारेत्यन्वयः॥ तत्र हेतुः॥ निजरमणस्य स्वप्रीतिदातुर्ये अरु णे चरणारविंदे तयोरनुध्यानेन परिचितः समृद्धो भक्तियोगः तेन परिप्लुतः। सर्वतो व्याप्तः॥ परम आह्लादः प रमानंदो यस्मिन् गंभीरहृदयह्रदे तस्मिन्नवगाढा निमग्ना धिषणा यस्य॥१०॥

भागवं ५ धतानि भगवद्व्रतानि येन स भगवंतं सूर्यमंडलोपस्थितं पतिष्ठन्नेत द्वहोवावच ... यः। कीदृशः। एण्याहरिण्याजिनं येन सोयं तद्देववा स्पत।
सस्तेनच्छन्नःसवनानि षेकोणार्द्रीक पिशाश्च याः कुटिलाः जटास्ता ... कलापेन वावरोचमानः। सूर्यप्रकाशिकयात्र
टी वहिरिण्मयं ध्येयः सदा सवितृमंडलमध्यवर्तीत्यादिनोक्तं। उद्गिहानेउ ... इतिसति। सकारांतपाठे सनेतात्यवाद्य व ऋथं स्त

ऋष्यंधृतं भगवद्व्रत ऐणेयाजिनवाससाऽनुसवनाभिषेकार्द्रकपिश कुटिल जटाकलापेनावरोचमानः सूर्यबी २२
भगवंतं हिरण्मयं पुरुषं उज्जिहानि सूर्यमंडलेऽप्युपतिष्ठन्नेत दुहोवाच। ११। परोरजः सवितुर्जातवेदोदेवस्य भर्गोमनसेदंज
जानासुरेतसादः पुनराविश्यचष्टेहंसंगृध्राणं नृषद्रिंगिरामिमः। १२। ॥इतिश्रीभागवते महापुराणे पंचमस्कंधे सप्तमोध्या॥ ७
॥यः॥ ॥

स एवाह परोरजः रजसः प्रकृतेः परं शुद्धं सत्वात्मकं सवितुर्देवस्य सूर्यस्य भर्गः स्वरूपभूतं तेजः जातं वेदो धनं कर्मफलं य
स्मात्तत्। कर्मफलदमित्यर्थः॥ अत्र हेतुः। यत् मनसैवेदं विश्वं यज्जानं ससर्ज पुनश्च अदश्च सृष्टं विश्वमंतर्या मिरूपेण आ
विश्य गृध्राणां कांक्षं तं हंस जीवं स्फुरेत सा चिच्छक्त्या विचष्टे पश्यति पालयतीत्यर्थः। नृषु सीदति। उपाधितया तिष्ठ
तीति नृषत्। बुद्धिः तस्याः रिंगिणं गतिं रातीति नृषद्रिंगिरां वा छंदसीत्यभिपूर्वरूपत्वाभावः। तन्गरिमं शरणं व्रजामि॥
॥ ॥१२॥ इति पंचमे सप्तमोध्यायः॥ ७ ॥

इति एवं कृतोनुषंग आसन्नीर्येन। मृगजंतुना मृगापत्येन सह स्नेहानुबद्धहृदयं येन। स्नेहानुबद्धमेनं प्रपंचजाति॥ कुश कुसुम
समित्पा द्विना स्वथयंती तंतेन। शालाष्टकाः श्वानभय दानयं शोकमानं भवति। तदा तेन सह वनं समाविशति॥ अति
शायत प्रणय भरो यस्य तत् हृदजं यस्य सः। वर्षपतिर्भर तः॥ प्रकृतिस्थेन स्वस्थेनास्तात् न जात॥ अन्यदा अदर्शने
सकरुणं यथा नवलेवमनुशोचन्निति होवाचेत्यन्वयः॥ अतितर्षेण अत्यौत्सुक्येन हरिणकुणकविरहेण विकले हृदये
इति कृतानुषंग आसनशयनाटनस्थानाशनादिषु सह मृगजंतुना स्नेहानुबद्ध हृदय आसीत्॥ कुसुमकुशसमि
त्पलाशफलमूलोदकान्याहरिष्यमाणोष्टकशालाष्टकादिभ्यो भजमानः समानो यदा सह हरिणकुणकेन वनं स
माविशति। तदा पथिषु वमुग्धभावेन तत्र तत्र विषक्तमतिः प्रणयभरहृदयः कार्पण्यात् स्कंधेनोद्वहति॥ एवमुत्संगे
उरसि वाधायोपलालयन् मुदं परममवाप॥ क्रियायां निर्वर्त्यमानायामंतरालेप्युत्थायोत्थाय यदैनमभिचक्षी
त तर्हि वाव वर्षपतिः प्रकृतिस्थेन मनसा तस्मा आशिष आशास्ते स्वस्ति स्तात् वत्स ते सर्वतः इति॥ अन्यदा भृशमुद्विग्नमना नष्ट
द्रविण इव कृपणः सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदयसंतापस्तमेवानुशोचन् किल कश्मलं महदभिरंभि
त इति होवाच॥ अपि बत स वै कृपण एणबालको मृतहरिणीसुतः॥ अहो ममानार्यस्य शठकिरातमतेरकृतसुकृतस्य विश्रब्ध म आ
। त्मप्रत्ययेन तदविगणयन् सुजन इवागमिष्यति॥ ॥ ॥ त

संतापो यस्य॥ कश्मलं मोहं प्रापितः भृशमत्र। अपीति संभावनायां बत इत्यनुकंपायां। अहो इति खेदे। शठकिरातयोरिव वंचनपरा क्रूरा
च मतिर्यस्य। अकृतसुकृतस्य निर्भाग्यस्य मम तत् छापादिकमगणयन्नविंतयन्नागमिष्यति किं। अपराधाविंतने हेतुः॥ आत्मप्रत्ययेन स्व
। स्मिन्नकृत्स्याकृत विश्वासः सन् स्वजनो न यथा गणयति तद्वत्॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शाष्पाणिकोमलतृणानि।नैकचरोऽयूथचरः स्तकादिर्यद्वाएकएवचरतिय॥क्रूरस्वभावोव्याघ्रादिर्नभक्षयतिकिंसकल...
भा॰पं॰ स्यक्षेमोयस्मात्सउदयोयस्यवेदत्रयी आत्मास्वरूपंयस्यसः।सूर्योनिम्लोचति अस्तंयातिमृगवधान्व्यासोनिक्षेपन्नतः॥
२५ हरिणएवराजकुमारः आगत्य अपिमांस्वित्सुखइष्यतीत्यन्वयः।किंकुर्वन्विविधैरुचिरैर्दर्शनीयैर्निजैर्मृगदारकविनोदैः

अपिक्षेमेणास्मिन्नाश्रमोपवने शष्पाणिचरंतंदेवगुप्तंद्रक्ष्यामि।अपिनवृकः शालावृकोऽन्यतमोवानेकच
रएकचरोवाभक्षयतिनिम्लोचतिनिम्लोचतिभगवान्सकलजगत्क्षेमोदयस्त्रय्यात्माऽद्यापिनममम्मृग
वधून्यासआगच्छति।अपिस्विदकृतसुकृतिमागत्यमांसुखयिष्यतिहरिणराजकुमारोविविधरुचिरदर्शनी
यनिजमृगदारकविनोदैरसंतोषंस्वानामपनुदन्॥क्ष्वेल्लिकायांमांमृषासमाधिनाआमीलितदृशंप्रेमसं
रंभेणचकितआहत्यपृषदपरुषविषाणाग्रेणलुठति।आसादितहविषिबर्हिषिदूषितेमयोपालब्धोभी
तभीतः सपद्युपरतरासक्रीडऋषिकुमारवदवहितकरणकलापआस्ते॥ ॥ २५

स्वीयानांखेदमपनुदन्॥संभवतिचैतदित्याह॥क्ष्वेलिकायांक्रीडिकायांमृषाव्याजःसमाधिस्तेनामीलितेदृशौयेनतंमांप्रेम
संरंभेणप्रणयकोपेनपृषत्जलविंदुःतद्वदपरुषेणमृदुनाविषाणाग्रेणलुठतिसंघट्टयति।आसादितंहविर्यस्मि
न्तस्मिन्बर्हिषिछिन्नेदंताकर्षणादिनापलेनदूषितेनसति॥दूषितेचेतिपाठेबर्हिषिविषयेदूषणंकृत्वेत्यर्थः।भयाधि
(त्विन्नः सन्तत्क्षणमेवोपरतक्रीडोनिश्चलआस्ते॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इतिबहुधाप्रलप्योत्थायबहिर्निर्गत्यतत्खुररवातम्मृगागोपलंभसंभ्रान्तहृदयआह॥ किंवेति। अरेअहोनयाश्चिंत्या। किंवातपस्व्यावरि
तातपस्विन्यासमागम्य॥ यद्यस्मादियंसविनयस्यकृष्णसारतरनस्यातनुतराः॥ सुभगाश्चशिवतमाश्चाखुराः खुरायेषुतेषांप
दानांतत्रतत्रांकितानांपंक्तिःश्रेणिःमृगस्तेनरहितस्यअतएवातुरस्यदुःखितस्यममनयनविषयमार्गंस्तवयंतीसतीस्वात्मानंवतान्निःकृ
तमंडनंद्विजानांयज्ञभूमिंकरोति॥ यस्मिन्देशेमृगःकृष्णस्तस्मिन्धर्मान्निबोधतेतिस्मृतेः। तावदुदितेचंद्रेमृगंदृष्ट्वास्वमृगत्वंसंभाव
यन्नाह॥ अपिस्विदिति॥ चंद्ररश्मिस्पर्शसुखंप्राप्याह॥ किंवेतिसंभावनायां आत्मजविश्लेषेणज्वरस्तापःसएवदवदहनस्तस्य

किंवाअरेआवरितंतपस्तपस्विन्यानयायदिजमवनिःसविनयकृष्णसारतनयतनुतरसुभगाशिवतमाखुरखुरपद
पंक्तिश्रेणिविषुनातुरस्यकृपणस्यममनयनविषयपदवींस्तवयंत्यात्मानंसर्वतःकृतकौतुकंद्विजानांस्वर्गापवर्ग
कामानांदेवयजनंकरोति। ॥१४॥ अपिस्विदसौभगवानुडुपतिएनंमृगपतिभयान्मृतमातरंममृगबालकंस्वाश्र
मपरिभ्रष्टमनुकंपयाकृपणजनवत्सलःपरिपाति। किंवात्मजविश्लेषज्वरदवदहनशिखाभिरातप्यमानहृदयस्य
स्थलनलिनीकं। मामुपसृतमृगीतनयंशिशिरशांतानुरागगुणितनिजवदनसलिलामृतमयगभस्तिभिःसुधयति॥ ॥१५॥

ज्वाला। निरूपतप्यमानाहृदयरूपास्थलनलिनीयस्याजलस्थंपभंतापंसोढुंक्षमामितिस्थलग्रहणं॥ उपसृतोमृगीतनयोयेन
तंमाचंद्रःसुधयतिशांतिंगमयति॥ कैः शिशिरंवतछांतंवमप्यनुरागेणगुणितंच॥ श्रवद्भितंपुनःपुनःश्रवत्यद्वदनशालिकंत
दिवमृतमयागभस्तयःतैःलोकेहिमंत्रवादिनोवदनशालिलेस्तापंशमयंतीति॥ शसिद्धं॥ उपसृत्यमृगीतनयइतिपाठेमनोरथान्तर
मेतत्॥ उपसृत्यमृगीतनयःकिंवामांसुधयिष्यतीतिशेषंसमानं। ॥१५॥

भा॰पं॰टी॰ भगवदाराधनंवदाभासमानेनोध्वनलक्षणात्कर्मणश्च विभ्रंसितः। प्रारब्धकर्मत्वे हेतुः। कथमितरथेति॥ साक्षात्तु च वत्कथमासंगस्यात्पूर्वं
२६ परित्यक्ता दुस्त्यजा औरसा येन॥ अंतरायेण विहितं योगारंभणं यस्य॥ आत्मानमविगणय्य यत् आत्माविंतामकुर्वतः तावदेव तीव्रवेग:

एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारंभणतो विभ्रंशितः स योगतापसो भगवदाराधन
लक्षणाच्च॥ कथमितरथा जात्यंतर एणकुणक आसंगः॥ ॥२६॥ साक्षान्निःश्रेयसप्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदया २६
भिजातस्य तस्यैवमंतराय विहितयोगारंभणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषंगेणावि
गणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः कालकरालरभस आपद्यत। ॥२७॥ तदानीमपि पार्श्ववर्त्तिनमात्मजमिवा मृ
नुशोचंतमभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिमं सह मृगेन कलेवरं मृतमनु न मृतजन्मानुस्मृ प्प
तिरितरवन्मृगशरीरमवाप। ॥२८॥ तत्रापि ह वा आत्मनो मृगत्वकारणं भगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह॥
॥२८॥

कालंजर

कालो मृत्युः समपद्यत। लोकं देहं मृगेण सहितं विसृज्य प्राकृतमिव मृगशरीरमवाप॥ कथं मृतं कलेवरं मृतमनु न मृता न विनाष्टा।
पूर्वजन्मानुस्मृतिर्यस्य॥ आह स्व वितेः॥ ॥२८॥ ॥

अहोकष्टंधीरासांमामीद्रष्टोहं।अंत्रामेवाह।।यद्यतोविमुक्ताः समस्ताः संगायेन।विमुक्तः पुण्यारण्यं शरण्यं यस्य।आत्मवतोममममनः सर्वे
षां भूतानामात्मनि वासुदेवे समावेशितं समाहितं वनिश्चलं सत् आराद्दूरादेवभ्रश्यावनिःसृतं।गलितं केनसमावेशितं।तस्य

अहोकष्टंभ्रष्टोहमात्मवतामनुपथात्।यद्विमुक्तसमस्तसंगस्यविविक्तपुण्यारण्यशरण्यस्यात्मवतआत्मनिसर्वेषांआत्म
नां भगवति वासुदेवे तदनुश्रवणमननसंकीर्त्तनाराधनानुस्मरणाभियोगेनाशून्यसकलयामेनकालेनसमावेशितंस
माहितंकात्स्न्येन मनसत्तु पुनर्ममाबुधस्यारागान्मृगसुतमनुपरिसुस्राव।।२९।।इत्येवंनिगूढ[illegible]दोविसृज्यमृगीमातरंपु
नर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितंशीशालग्रामंपुलस्त्यपुलहाश्रमंकालंजरात्प्रत्याजगाम[illegible]।३०।। तस्मिन्नपिजन्मनिका
लंप्रतीक्षमाणः संगाच्चभृशमुद्विग्नआत्मसहचरः शुष्कपर्णतृणवीरुधावर्त्तमानोमृगत्वनिमि[illegible]वसानमेवासौगणयन्।।
मृगशरीरंतीर्थोदकक्लिन्नमुत्ससर्ज।।३१।।इति श्रीभागवतेमहापुराणेपंचमस्कंधेभरतचरितेऽष्टमोध्यायः।।८।। ।। ।।

नुश्रवणाद्यभियोगेनअशून्याः सकलायामायस्मिन्तेनकालेन।।निगूढेनाविष्कृतोनिर्वेदोयेन।शालङ्कटद्वोपशोभितंग्रामंकालं
जरात्यत्रहरिणोजात तस्मात्पर्वतात्।आत्मैवसहचरोयस्य।एकाकीप्रतीक्षणस्यैवप्रपंचः।। मृगत्वनिमित्तंतितीर्थोदकेनक्लिन्नमा
ई।अ ऊर्दकमित्यर्थः।।३१।।इतिपंचमेऽष्टमोध्यायः।।८।।

भा०पं०
२७

नवमे जडविप्रत्वे तस्य रागाद्यभावतः॥ जडकालीयश्रुत्वेपि निर्विकारत्वमीयिते॥१॥ पितुः प्राज्ञात्मविज्ञानो भरतोमृगतां गतः॥
प्रारब्धकर्म्मवेगेन तदंते जडविप्रतां॥ आंगिरसगोत्रजानां वरश्रेष्ठस्य शमादियुक्तस्य त्यागोत्रा तिथिम्योन्न दानादिविद्याकर्म्मवि
द्यात्रात्मज्ञानं देहादिव्यतिरिक्तभोक्तात्मज्ञानं॥ आनंदो धर्मसंपत्तिजः॥ आत्मनसदृशाः श्रुतादजोगुणा येषां ते समानोदरा
नवपुत्रा वभूवुः॥ यवीयस्यां कनिष्ठायां च मिथुनी स्त्रीपुंसयुग्मं॥ उत्सृष्टं मृगशरीरं येन भ्रुवीनां श्रीमतां गेहे योगभ्रष्टो भिजायते २७

श्रीशुक उवाच॥ ॥ ॥अथ कस्यचिद्द्विजवरस्यांगिरसप्रवरस्य शमदमतपः स्वाध्यायाध्ययनत्यागसंतोषतितिक्षाप्रश्रयविद्यानसूयात्मज्ञानानंदयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नवसोदर्या अंगजा बभूवुः॥१॥ मिथुनं च यवीयस्यां भार्यायां सस्तुतत्र पुमांस्तं तत्र भागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः॥२॥ तत्रापि स्वजनसंगाद्भृशमुद्विजमानो भगवतः कर्म्मबंधविध्वंसनश्रवणस्मरणगुणविवरणचरणारविंदयुगलं मनसा विदधदात्मनः प्रतिघात
माशंकमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडांधबधिररूपेण दर्शयामास लोकस्य॥३॥

२७
री

इतिस्मृतेः॥ तत्रापि स्वान्यसंगादात्मनो भ्रंशमाशंकमानः आत्मानमुन्मत्तादिरूपेण दर्शयामासेत्यन्वयः॥ किं कुर्वन्कर्मबंधविध्वं
सनं श्रवणं स्मरणं गुणानां विवरणं कथनं च यस्य तद्भगवतश्चरणारविंदयुगलं मनसा विशेषेण धारयन् प्रतिघातशंका
यां हेतुः॥ अनुस्मृता स्वीयपूर्वजन्मनामावलिः परंपरा येन सः॥३॥

पुत्रस्नेहेनानुवद्धं मनोयस्यसः॥ जडस्यगार्हस्थस्यानधिकारात्॥ समावर्त्तनांतान् विदधानस्तमुपनीजतस्यपुनः शौचादीन्
तस्यानभिप्रेतानपिशिक्षितवान्। तत्रहेतुः॥ अनुशिष्टेन हि भाव्यं पितुः सकाशात्पुत्रेणेति॥ सोपिचपितुः शिक्षानिर्बंधनिवृत्त्यै
उसधीवीनमिवकरोतिस्म॥ उपाकरणं वेदव्रताद्यनंतरं श्रावणादिमासेषु वेदानध्यापयिष्यन् आदौताव्याहृतिभिः सहप्रण
वशिरः सहितां त्रिपदीं चैत्रादिचतुरो मासानधीयानमपि असमवेतरूपं यथाभवत्येवं ग्राहयामासतावतापिकालेनस्वरानुपूर्व्यादि

तस्यापिहवा आत्मजस्यसविप्रः पुत्रस्नेहानुवद्धमना आसमावर्त्तमानानभिप्रेतानपिसमशिक्षयत्। अनुशिष्टेनहि भाव्यं
पितुः पुत्रेणेति॥४॥ सचतदापि पितृसंनिधावेवासधीवीनमिवस्मकरोति। छंदांस्यध्यापयिष्यन् सहव्याहृतिभिः सहप्र
णवशिरस्त्रिपदींगायत्रींग्रैष्मवासंतिकान् मासानधीयानमप्यसमवेतरूपंग्रहयामास॥५॥ एवंस्वतनुज आत्मन्य
नुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणकस्यकर्माण्यनभियुक्तान्यपिसमनुशिष्टेन
भाव्यमित्यसदाग्रहः पुत्रमनुशास्यस्वयंतावदनधिगतमनोरथः कालेनाप्रमत्तेनस्वयंगृहएवप्रमत्तः उपसंहृतः॥६॥

मुक्तंव्याहृत्यादितः स्यनागतमित्यर्थः॥ आत्मन्नृतेस्वतनुजे अनुरागेणावशितं चित्तं येनशौचादीनियमान्यौपकुर्वाणकस्यसावधि
ब्रह्मचर्यादिवतः कर्म्माणितेनाननियुक्तानि अनादृतानि पितृपुत्रं त्वनुशास्यादिप्राप्तपुत्रपांडित्यमनोरथः स्वयंकालेनोपसं
हृतः मृतइत्यर्थः। अनुशासननिर्बंधेपुनस्तमेवहेतुमाह॥ अनुशिष्टेनभाव्यमित्यसन्नयोग्य आग्रहोयस्य॥६॥ ॥

भा॰पं॰ २८ सपत्न्यै समर्प्य॥ अनुसंस्थया अनुसरणेन॥ सप्तम्यंतपाठे अयमेवार्थः। न्यवृत्सन् निवर्त्तितमैच्छन् निवृत्ता इत्यर्थः। यदाभिभा-
ष्यमाणः तदा तदनुरूपं भाषते। मूल्यमन्तरेण बलाद्यत् कर्म कार्यते सा विष्टिः। विष्ट्यादिभिरुपसादितमन्नमभ्यवहरति॥ परं तु
ते केवलं न त्विंद्रियप्रीतये। अत्र हेतुद्वयमाह॥ नित्यं सदा निमित्तं यस्मात्तादृक् शून्यः स्वासिद्धः अभिव्यंजकशून्यः विशुद्धः

अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्या उपन्यस्य स्वयं अनुसंस्थया पतिलोकमगात्॥८॥ पितु २८
र्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्य्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातुरनुशासन
निर्बंधा न्यवृत्सन्॥९॥ स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिर इत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाष
ते कर्माणि च कार्यमाणः परेच्छया करोति विष्टितो वेतनतो वा याच्ञया यदृच्छया वोपसादितमल्पं बहु मिष्टं कदन्नं वाभ्यव
हरति परं नेंद्रियप्रीतिनिमित्तं॥[illegible]॥ नित्यनिवृत्तः निमित्तः स्वसिद्धविशुद्धानुभवानंदस्वात्मलाभाधिगमः सुखदुः
खयोर्द्वंद्वनिमित्तयोरसंभावितदेहाभिमानः॥१०॥ ॥

केवले योनुभवः स एवानंदस्वरूपः स्वात्मा तस्य लाभः। एवंभूतोहमिति॥ ज्ञानं तस्याधिगमः प्राप्तिरस्तीति यस्य॥ द्वंद्वानि सन्माना
वमानादीनि तद्धेतुकयोः दुःखसुखयोः कृतदेहाभिमानः तस्मान्नेंद्रियप्रीतिनिमित्तमभ्यवहरतीत्यन्वयः॥१०॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भूमिशयन २

अत एव शीतोष्णादिष्वनावृतांगो विचचारेत्यर्थः। कीदृशः। पीनः पुष्टः संहननांगः संहननं तेजो दृढं भवति। अंगानि यस्य कठिनावयव इत्यर्थः॥ स्थंडिलसंवेशिनं अनुन्मर्दनं मर्दनाभावः तैर्यद्रजस्तेनाच्छन्नं ब्रह्मवर्चसं ब्राह्मं तेजो यस्य। यथा महामणिरनभिव्यक्ततेजा भवति॥ कुत्सितेन पटेनावृता कटिर्यस्य। कुरूमखिणा अतिमलिनेन तत्वतस्तं जानंतियेतेज्ञैरवमतः सन्। यदा तु परेभ्यः

शीतोष्णवातिवर्षेषु वृष इवानावृतः पीनः संहननांगः स्थंडिलसंवेसनानुन्मर्द्दनामज्जनैरजसा महामणिरिवानभिव्यक्त ब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमाखिणा द्विजातिब्रह्मबंधुरितिसंज्ञयातज्ज्ञजनावमतो विचचार॥ १०॥

यदा तु परत आहारं कर्म्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति किंतु न समं विषमं न्यूनाधिकमिति वेद। कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति॥ ११॥

कर्म्ममूल्येनाहारमपेक्षमाणो भवति॥ तदा केदारकर्म्मणि शालिक्षेत्रकर्द्दमविलोडनादौ आहारफलोभनेन नियुक्तः सन् करोति किंतु अत्र कर्द्दमस्य क्षेपे क्षेत्रं समं भवेत्। इत उद्धरणे विषमं स्यादिति न वेद॥ ओदनभिन्नं तान् कणादीनप्यमृतवदभुंक्ते कणाः चूर्णितंडुलाः पिण्याकं तैलयंत्रोद्धृतं तिलकिट्टं॥ फलीकरणं तुषाः॥ कुल्माषा कीटदष्टमाषाः पुरीषं स्थालीलग्नौ॥ ११॥ १०॥

दग्धान्नं १

भा॰पं॰ तस्यरागादिराहित्यमलौल्यं वैवमीरितं॥ अथान्यच्चरितंभाख्यवितंमत्वा वसंक्रमं॥ वृषलपतिश्चद्रैसामंतश्चोरराजः आलभत अल
२८ च्चुंप्रवृत्तः॥ देवाद्वधनविमुक्तस्यपशोःपेः॥ नपसाव्याप्तायां निशित तत्रापिनिशीथसमयेअर्द्धरात्रावसरे आकस्मिकोदैवनिर्मितः

अथएकदाविकाश्चिद्वृषलपतिर्भद्रकाल्यैपशुमालब्धुकामः॥ तस्यहदेवाद्विमुक्तस्यपशोःपदवींतदनुचराःपरिधावंतो
निशिनिशीथसमयेतमसावृतायामनधिगतपशवआकस्मिकेनविधिनाकेदारान्वीरासनेनमृगवराहादिभ्यःसंरक्षमा
णमांगिरसप्रवरसुतमपश्यन्॥ ॥१२॥ अथतएनमनवद्यलक्षणमवमृश्यपशोर्भर्तुःकर्मनिष्पत्तिंमन्यमानावध्वारशन २८
यावंडिकागृहमुपनिन्युर्मुदाविकसितवदनाः॥ १३॥ अथपणयस्तंस्वविधिनाभिषिच्याहतेनवाससाछाद्यभूषणालेप
स्रक्तिलकादिनिरुपस्कृतंभुक्तवंतंसशर्करपायससर्पिषाधूपदीपमाल्यलाजकिशलयांकुरफलोपहारोपेतया
वैशाससंस्थयामहतागीतस्तुतिमृदंगपणवघोषेणवंतपुरुषपशुंभद्रकाल्याःपुरतउपवेशयामासुः १४।

विधिप्रकारः तेनावीरासनेनऊर्द्ध्वावस्थानेन॥ अवमृश्यज्ञात्वापणयश्चोराः अहतेव तनेनाउपस्कृतं लंकृतवैशाससंस्थया
१ हिंसाविधानेनगीतादिघोषेणवसह। १४॥

वृषलराजस्य पणिः पुरोहितत्वेन वर्त्तमानस्त्वोरः। तदभिमंत्रितं भद्रकालीमंत्राभिमंत्रितं॥ धनमद एव रजः तेनोत्सिक्तं स्वतन्त्रं मर्या
दं मतो येषां भगवत्कलापुन्नं वीराणां ब्राह्मणानां कुलं ब्रह्मी कृत्यपथे वर्त्तमानानां यत्कर्म तदुपलभ्य देवी उच्चचाट प्रति
मांत्यक्त्वा वहिर्निर्गता कथंभूतमालभनं॥ सूनायामपि आपत्काले। नुज्ञातायामपि हिंसायामनुज्ञातं भद्रकालीस्थं तौ॥ गद्यं॥

अथ वृषराजः पणिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभिमंत्रितमसि मतिकरालं निशितमुपाददे।
।१५। इति तेषां वृषलानां रजःतमः प्रकृतीनां धनमद उत्सिक्तमनसां भगवत्कलावीरकुलं कदर्थीकृत्य उत्पथेन स्वैरं विह
रतां हिंसाविहाराणां कर्मातिदारुणं यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यननुमतमाल
भनं॥ तदुपलभ्य ब्रह्मतेजसातिदु[illegible]र्विषहेण दंदह्यमानेन वपुषा सहसोच्च[illegible]चाट सैव देवी भद्रकाली॥ १६॥ भृशममर्ष
रोषावेशरभसा विलसितभ्रुकुटि विटपकुटिलदंष्ट्रारुणेक्षणा टोपातिभयानकवदना हंतुकामेवेदं महाट्टहासमतिसंरंभेण वि
मुंचती तत उत्पत्य पापीयसां दुष्टानां तेनैवासिना विवृक्णशीर्ष्णां गलात्स्रवंतमसृगासवमत्युष्णं सह गणेन निपीय तिपानमद
॥ विह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त्त विजहार च शिरःकंदुकलीलया॥ १७॥

अमर्षपराधासहनं रोषश्च वपुषो दाहेन तयोरावेशः पस्ततस्य रभसेन वेगेन विलासितं उन्नं नितो भ्रुकुटीलक्षणो विटपः शाखा कुटिला
दंष्ट्राश्च अरुणानीक्षणानि च तेषामाटोपः संभ्रमः तेनातिभयानकं वदनं यस्याः इदं नु जगत् हंतुमुद्यतेवा महांतमट्टहासं स नाद हासं ततः
१ १ तः स्वानास्य उत्थ विविक्तानि छिन्नानि शीर्षाणि येषां गणेन परिवारेण सह शिरांस्येव कंदुकानि तैषां लीलाया विक्रीडेव। १८।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा.पं.
३०

ननुकथंदेवाराधकानामेवंविपरीतंफलंतत्राह॥एवमेवेति॥महत्स्वअभिचाररूपोतिक्रमअपराधः॥नन्वसंभावितमिदमेवंयत्प्र
रणेप्यनाकुलत्वंमारकेषुवक्रोधाभावइत्यादितत्राह॥नवाइति॥वियुक्तोदेहाद्यात्मभावलक्षणःसुहृढोहृदयग्रंथिर्यैःसर्वस

एवमेवखलुमहदभिचारातिक्रमःकार्त्स्न्येनात्मनेफलति॥१९॥नवाएतद्विष्णुदत्तमहदद्भुतंयदसंभ्रमःस्वशिर
श्छेदनआपतितेऽपिविमुक्तदेहाद्यात्मभावसुदृढहृदयग्रंथीनांसर्वसत्वसुहृदात्मनांनिर्वैराणांसाक्षाद्भगवतानिमिषा ३०
रिवरायुधेनाप्रमत्तेनतैस्तैर्भावैःपरिरक्ष्यमाणानांतत्पादमूलमकुतश्चिद्भयमुपसृतानांभागवतपरमहंसानां॥२०॥
इतिश्रीभागवतेमहापुराणेपंचमस्कंधेजडभरतचरितेनवमोध्यायः॥ ॥९॥

त्वानांसुहृदःआत्माययेषां॥नत्वेतेषांदेहाद्यभिमानसद्भावेपिमरणादिभयमस्तीत्याह॥साक्षाद्भगवतानिदोरक्षमाणानांकेनअनि
मिषःकालश्चसएवअरिःतस्यचक्रंतेनवरायुधेनतैस्तैर्भावैश्चअंतर्यामितयाप्रवर्तमानैर्भद्रकाल्यादिरूपैः॥नकुतश्चिदपिभयंयास्मिन्॥ ॥
नकुतश्चिदपिभयंयास्मिन्भगवतानांभगवदुपासकानांपरमहंसानां॥१९॥इतिपंचमेनवमोध्यायः॥९॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दत्त्वामेक्षिपताराज्ञाशिविकांस्वांवहन्मुनिः॥स्वडुवादानुवादेनविज्ञायास्तुप्रसादितः॥१॥एवंभूताथि[illegible]रिलमज्जसर्वज्ञयोः समं इतिस
र्वज्ञताभिध्येररहूगणकथेरणं॥रहूगणोनामसिंधुसौवीरदेशयोःराजातत्त्वजिज्ञासुःकपि[illegible]यदागच्छातेस्मतदायद्वृत्तं तदाह॥
अथेतिइक्षुमत्यानद्यास्तीरेतेषां॥शिविकावाहनांकुलस्यनाथेन।एषगौरिवखरइवचभारंवोढुंसमर्थइति धियापूर्वं येकेचन

श्रीशुकउवाच॥ ॥अथसिंधुसौवीरपतेःरहूगणस्यव्रजतइक्षुमत्यास्तटेतत्कुलपतिनाशिविकावाहपुरुषान्वे
षणसमयेदैवेनोपसादितः॥सद्विजवरउपलब्धएषपीवासंहननांगोगोखरवद्धुरंवोढुमलमितिपूर्वविष्टिगृहीतैः
सहगृहीतःप्रसभमतदर्हउवाहशिविकांसमहानुभावः॥१॥यदाहिद्विजवरस्येषुमात्रावलोकानुगतेर्नसमाहि
तापुरुषगतिस्तदाविषमगतांस्वशिविकांरहूगणउपधार्यपुरुषानधिवहतआहहेवोढारःसाध्वतिक्रमत।किमिति
विषममुह्यतेयानमिति॥२॥अथतईश्वरवचःसोपालंभमुपाकर्ण्योपायतुरीयाच्छंकितमनसोविज्ञापयांबभूवुर्नवयं
नरदेवप्रमत्ताभवन्नियमानुपथाःसाध्वेववहामः॥अयमधुनैवनियुक्तोपिद्रुतंनव्रजतिनानेनसहवोढुमिहवयंपारयाम इति॥
॥३॥
विष्ट्याबलाद्गृहीतास्तैःसहप्रसभंबलाद्गृहीतःसन्अतदर्होपिसमहानुभावः॥शिविकामुवाहेत्यन्वयः॥हिंसापरिहारार्थंइषुमा
त्रप्रदेशावलोकस्यानुपश्चाद्यागतिःतस्यहेतुभूतयापुरुषाणांगतिर्नसम्यगाहिताएकरूपानाभूत्।सोपालंभंसाक्षेपं।सामदामभेददंडे
षूपायेषुचतुर्थाच्छंकिताविज्ञाःभवन्नियमानुपथाभवदाज्ञानुवर्त्तिनःनपारयामःनशक्नुमः॥३॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रूपाणां तां वचो निशम्य सांसर्गिकः संसर्गनिमित्त एकस्यापि दोषः सर्वेषामेव भावितुमर्हतीति निश्चित्य रहूगण आहेत्यन्वयः ॥ कथंभूतः उपासितं ॥
वृद्धायेन सोऽपि स्वभावेन बलात् खरवशाः कृतः स न कथंभूतं प्रत्याहीनस्पष्टं ब्रह्मतेजो यस्मिन् भस्मनाछन्नमग्निमिव स्थितं ॥ भ्रातरिति संबो
धनमाद्दोपाभिप्रायं ॥ व्यक्तं निश्चितमुरु अधिकं परिश्रांतो सीत्यादीनि विपरीतार्थानि षड्वाक्यानि ॥ ऊहिवान् ज्ञापितवान् ॥ तत्रापि ॥

सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां संसर्गिणां भवितुमर्हति ॥ ॥ इति निश्चित्य निशम्य कृपणवचो राजा रहूगण उपासित ३१
वृद्धोऽपि निसर्गेण बलात्कृतः ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसावृतमतिराह ॥४॥ राजोवाच अहो क
ष्टं भ्रातर्व्यक्तमुरु परिश्रांतो दीर्घमध्वानमेक एव ऊहिवान् सुचिरं नातिपीवा न संहननांगो जरसा चोपद्रुतो भवान् स
खे नो वा पर एते संघट्टिनः ॥५॥ इति बहु विप्रलब्धोऽप्यविद्यया विरचितद्रव्यगुणकर्माशयस्वचरमकलेवरेऽवस्तुनि सं
स्थानविशेषेऽहंममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूष्णीं शिबिकां पूर्ववदुवाह ॥ ॥६॥ अथ पुनः स्वशिबिका
यां विषमगतायां प्रकुपित उवाच रहूगणः ॥ ॥ ॥७॥ ॥

सुचिरं जरसा वृद्धत्वेन संघट्टिनः हे वराः बहु यथा भवत्येवं विप्रलब्धोऽपि वक्रोक्त्या उपहसितोऽपि तूष्णीं उवाहेत्यन्वयः ॥ तूष्णींभावे हेतुः अवि
द्यया रचिता द्रव्यादयो यस्मिन् स्वचरमकलेवरे नाध्यारोपितः मिथ्याप्रत्ययो येन ॥ तत्र द्रव्याणि भूतानि गुणा इंद्रियाणि कर्माणि
पुण्यपापानि आशयोऽन्तःकरणं ॥ यत ब्रह्मभूतः ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मामनादृत्य भर्तुः स्वामिनो मम शासनमाज्ञामतिक्रामसि। चिकित्सां शास्तिं दंडपाणिर्यमो यथा जनस्य शास्तिं करोति तथा। स्वीअ
कृतिं अत्र मन्ता॥ अवद्धि मनन्धिनं॥ नरदेवोहमित्यभिमानो यस्य तं॥ अन्तुबन्धेन सगुणेन तिरस्कृतः अशेषः संपूर्णो भगवतः प्रियो निकेतनं
आश्रयो येन तं॥ यद्वा॥ अशेषाणां भगवत्प्रियाणां निकेतः सर्वेषां भूतानां सुहृच्च आत्मा च॥ योगेश्वराणां चर्या जडादिवदाचरणं तया॥ नात्यंतबु
त्पन्नापरि विताम तिर्यस्य तं॥ स्मयमानः हसन्निवेति मुखप्रसत्तिर्द्योत्यद्यते॥ विगतस्मयो गतगर्वः यद्ववक्री कृतं लंघन श्रांतो नवदीर्घ मधानमा

किमिदमरे त्वं जीवन्मृतो मां कदर्थी कृत्य भर्तृशासनमतिवर्तसि प्रमत्तस्य चेते करोमि चिकित्सां दंडपाणिरिव जनतायाः प्रकृ
तिं स्वां भजिष्यसे इति॥ ॥७॥ एवं बहु अबद्धमभिभाषमाणं नरदेवाभिमानिनं रजसा तमसा चानुविद्धेन मदेन तिरस्कृताशेष
भगवत्प्रियनिकेतं पंडितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सुहृदात्मा योगेश्वरचर्यया नातिव्युत्पन्नमतिं स्मयमा
न इव विगतस्मय इदमाह॥ ॥८॥ ॐ ब्राह्मण उवाच॥ त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद्यदि वीर भारः। गंतुर्यदि स्यादधि
गम्यमध्वा पीवेति राशौ न विदां प्रवादः॥ ॥९॥ ॥

गत इति तत्रोत्तरमाह द्वाभ्यां॥ त्वयायदुदिदं उक्तं अमादिना स्त्रीति तदव्यक्तं स्फुटं तत्त्वं तथैव च अविप्रलब्धं विप्रलंभोनन्न वतितदेवाह॥ हे वीर यदि भारो
नाम कश्चित्स्यात्तदा सवक्तव्ये बोढुर्देहस्य यदि स्यात् स च मे यदि प्रश्नाकृः स्यात् तर्हीदानीं भारस्नावात् विप्रलंभं न स्यात्॥ नन्वेतदस्ति भारस्य बोढु
श्चानिरूपत्वात्। मम च तत्संबंधाभावात् तथा गंतुरधिगम्यं प्राप्यमध्वा च यदि स्यात्॥ अत्रेति पाठे सात्तात्परमार्थः। तच्चमेयदि स्यादित्या द्वियोक्तं॥
यत्त्वयोक्तं नानिपीवेति॥ तत्राह॥ चेतनमुद्दिश्य त्वं पीवेति प्रवादो विदां विदुषां न भवति॥ किं तु भूतराशीनां यतोयं प्रवादो राशौ भूतसंघे देहे न त्वात्म
ना॥ हृदयं व्यापीनामहं कृतः ॥९॥

पतत्प्रपंचयति॥ स्थौल्यमिति॥ कलिकलहः॥ अहंकारेणमदश्चदेहेनसहतदभिमानेनजातस्याहिमवंतिममतुनिरभिमानस्यनसंति॥
यद्वा॥ देहेजाते योजातस्तस्यैवैतानि॥ ममतुतत्रनजातस्यनसंतीति॥ यद्वोक्तंजीवन्मृतोसीतितत्राप्याह॥ जीवन्मृतत्वंनकेवलंमम
किंतुविकृतस्यसर्वस्यमतिपरिणामिनोदृष्टं॥ यत्यस्माद्विकृतंप्रतिद्रणमाद्यंतवत्॥ यदुक्तं॥ नर्नृत्रासनमतिवरसीतितत्राह॥ स्थै
वसाम्यंतयोर्भावः सत्ता॥ हेईश्वरापिदेशुवोयदिव्यवस्थितःस्यादित्यर्थः॥ तर्हि विधिर्नियोगः कल्पकर्म्मतयोगः ध्रुवउच्यते॥ उवितो
भवीति॥ उवसमवायइतिधातुः॥ यदितुतवराज्यंशोममतुराज्यंस्यात्तदासर्वमेतद्विपरीतंस्यादित्यर्थः॥ ननुयावद्राजाहं तावत्त्वस्य
स्थौल्यंकार्श्यंव्याधयआधयश्चक्षुत्तृष्णयंकलिरिच्छाजरा॥ निद्रारतिर्मन्युरहंमदःशुक्देहेनजातस्याहिमेनसंति॥ १०॥ जीवन्मृ
तत्वंनिमनेनराजन्नाद्यंतवत्वाद्विकृतस्यदृष्टं॥ स्वस्वाम्यभावोध्रुवईड्यपत्रतर्हिच्युतेसोविधिकृत्स्यनयोगः॥ ११॥ विशेषबुद्धेर्वि
वरंमनाक्चपश्यामियन्नव्यवहारतोन्यत्॥ कईश्वरस्तत्रकिमीशितव्यंतथापिराजन्करवामकिंते॥ १२॥ उन्मत्तमत्तजड
वत्स्वसंस्थांगतस्यमेवीरचिकित्सितेन॥ अर्थः किंजानुभवताशिक्षितेनस्तब्धप्रमत्तस्यचपिष्टपेषः॥ १३॥
मीनवाप्येवेतिवेत्तत्राह॥ विशेषोराजत्वस्यादिभेदः तद्बुधेर्विवरमवकाशंव्यवहारादन्यत्रनपश्यामिमनागीषदपि॥ अथापितवाप्य
भिमानश्चेतर्हिब्रूहि॥ किंतेकरवामेति॥ यत्त्वक्तंप्रमत्तस्यतेचिकित्सांकरोमि॥ यथास्वांप्रकृतिंभजिष्यसइतितत्राह॥ उन्मत्तादिवद्वर्त्तमान
स्यवस्तुतःस्वसंस्थंब्रह्मभावंगतस्यभवताकृतेनचिकित्सितेनदंडेनशिक्षितेनवाकियानर्थः॥ मुक्तस्यार्थानर्थयोरसंभवात्॥ यदिपु
नरहंनमुक्तः किंतुप्रमत्तएवस्तब्धएव॥ तथापिममशिक्षादिकंपिष्टपेषोव्यर्थमित्यर्थः॥ नाहंजडस्वभावःशिक्षयापिदूरकर्तुंशक्यतइति॥ १३॥
री०

अनुवादरूपया परिभाषणेन तं प्रत्युत्तरं दत्वा उपरतमनात्म्ये देहात्मतत्वेन निमित्तमविद्या यस्य । आरब्धफलं कर्म क्षपयन् । हे पांडवेय
सम्यक् यया श्रद्धा तयैव तत्त्वजिज्ञासायां प्राप्तोधिकारो येन । यथा दर्शपौर्णमासाधिकृतस्यैव गोदोहनेन पशुकामस्य प्रणयेदिति गुण
फलसंबंधेप्यधिकारः ॥ एवं सात्विकश्रद्धाजामधिकृतस्यैवास्यामधिकार इत्यर्थः ॥ बहुयोगग्रंथसंमतं द्विजस्य तद्वचः श्रुत्वा विगलितनृप

श्री शुक उवाच ॥ एतावदनुवादपरिभाषया प्रत्युदीर्य स मुनिवर उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्मारब्धं व्य
पयन् राजयानं पुनरपि तथैवोवाह ॥१४॥ स चापि पांडवेय सिंधुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक्श्रद्धयाधिकृताधिकार
स्तद्धृदयग्रंथिविमोचनं द्विजवचआश्रुत्य बहुयोगग्रंथसंमतं त्वरयावरुह्य शिरसा तत्पादमूलमुपाश्रितः क्षमापयन् विगतनृपदे
वस्मय उवाच ॥१५॥ रहूगण उवाच ॥ कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोवधूतः ॥ कस्यासि कुत्रत्य इहापि कस्मात्
क्षेमाय नश्चेदसि नोत शुक्लः ॥१६॥ नाहं विशंके सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दंडात् ॥ नाग्न्यर्कसोमानिलवित्तपास्त्राच्छंके यथ ॥
(ब्रह्मकुलावमानात् ॥ ॥१७॥ ला

देवोधिराज इति गर्वो यस्य ॥ द्विजानां मध्ये कततमः यतः सूत्रमुतवीतं बिभर्षि यद्वा दत्तात्रेयादीनां मध्ये कतमोवधूत इहापि कस्माद्धेतोः आ
तः । नोस्माकं क्षेमाय चेत्यात्तः ॥ तर्हि शुक्लः कपिलो मुनिर्न भवसि कुमुतेति वितर्के ॥ किमनया चिंतया शिबिकां तावद्वहामीति चेदत आह ॥ ना
(हमिति ॥ वित्तपः कुबेरः ॥ ॥१७॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यस्माद्रूढो सके। तत्रस्मात्कस्त्वमित्यादिप्रश्नानामुत्तरं ब्रूहि॥ निगूढं पिहितं विज्ञानरूपं वीर्यं। प्रभावो येन॥ अपारः अनंतमहिमा। त
भा॰पं॰ अहेतुः॥ नोमनसापिभेत्तुं नक्षमे नशक्यं॥ किंभेत्तुमिच्छसि येन्द्वायामाह॥ तेवचांसीति॥ यद्वा मनसा युक्ताः सूक्ष्मदृष्टयोः विभेत्तुं ज्ञातुं नश
३३ क्नुवंतीत्यर्थः॥ स्वस्यज्ञानार्थितं दर्शयति॥ अहं चेति॥ इह संसारे यत् अरणंतत् किमितिप्रष्टुं प्रवृत्तोस्मि ज्ञानशक्त्यावतीर्णं कपिलं स
भवान् किंस्विदेवं विचरति॥ गृहविष्टः कथं विचक्षीत पश्येत्॥ एवं तत्स्वरूपं पृष्ट्वा तदुक्तोत्तरंराणंपाक्षिपति॥ तत्रयदुक्तं मम श्रमो नास्ती ३३
तद्ब्रह्मन्त्वत्संगो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः॥ वचांसि योगग्रथितानि साधो न नः क्षमंते मनसापि भेत्तुं॥ १८ अहं च
योगेश्वरमात्मतत्त्वविदां मुनीनां कपिलं गुरुं वै॥ प्रष्टुं प्रवृत्तः किमिहारणं तत्साक्षाद्धरिं ज्ञानकलावतीर्णं॥ १९॥ सवैभवाल्लोकनि
रीक्षणार्थं अव्यक्तलिंगो विचरत्यपिस्वित्॥ योगेश्वराणां गतिमंदबुद्धिः कथं विचक्षीत गृहानुबंधः॥ २०॥ दृष्टः श्रमः कर्मत आ
त्मनो वै भर्तुर्गंतुर्भवतश्चानुमन्ये॥ यथासतोदानयनाद्यभावात्समूलइष्टो व्यवहारमार्गः॥ २१॥

तत्राह॥ दृष्ट इति॥ आत्मनो मे अनुमन्ये अनुमिमे। अनुमानं चैवं॥ भवाञ्छ्रमादिनाक्रांतः कर्तृत्वात्॥ यः कर्त्ता स श्राम्यति॥ यथाहं
युग्यादिकेत्रैति॥ नन्विदं व्यवहारमात्रं॥ नतु सत्यं॥ तदुक्तं॥ व्यवहारतोन्यन्नपश्यामीति तत्राह॥ यथेति॥ व्यवहारमार्गः प्र
पंचः समूलः सप्रमाणक एवेष्टः। यथा असताघटादिना उदकानयनादेरभावात्॥ एवं प्रयोगः प्रपंचः सत्यः अर्थक्रियाकारित्वा
द्[?]॥ यः पुनः रसत्यो नासावर्थक्रियाकारी यथा॥ घटादिरिति॥ २१॥ १

ल्गा:

यदुक्तं उपाधिधर्माः स्थौल्यादयो मेन वस्तुतः संतीति। औपाधिकत्वेऽपि सत्यत्वं किंन स्यादित्याह। स्थाल्याः अग्निना तापात् भवन्ति
नः क्षीरस्य तापः तस्य तापात्तंडुलानां वहिर्भागस्य ततस्तद्गर्भस्य च रंधिः पाको न चात्र किंचिन्मिथ्या। एवं देहादिभिः सन्निकर्षात्। संबंधात्
तन्निमित्ता संसृतिः पुरुषस्य भवति॥ असवः प्राणाः॥ आशयो मनः॥ अनुरोधात् उपाधिधर्मानुवृत्तेः॥ तथा हि॥ निदाघादिना
देहेन्द्रियाणां तापः॥ ततः प्राणस्य ततो मनसः इत्येवं यथायथमूह्यं॥ स्वसाम्यभावो ध्रुव इति तत्राह॥ अद्धा त्वेऽपि यदायो नृपति
सः प्रजानां शास्ता गोप्ता च। यद्योक्तं तत्च्छादेः शिक्षादि पिष्टपेषमिति तत्राह यो अच्युतस्य किंकरः स पिष्टं न पिनष्टि निष्फलं न करोति॥

स्थाल्याग्नितापात्पयसोऽभितापस्तत्तापतस्तंडुलगर्भरंधिः। देहेंद्रियास्वाशयसन्निकर्षात्तत्संसृतिः पुरुषस्यानुरोधात्॥ २२॥ शास्ताभि
गोप्ताधिपतिः प्रजानां यः किंकरो वै न पिनष्टि पिष्टं। स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघं॥ २३॥ तस्मै भवान्नरदेवा
भिमानमदेन तुच्छीकृतसत्तमस्य। कृषीष्ट मैत्रीदृशमार्तबंधो यथा तरे सदवध्यानमंहः॥ २४॥ न विक्रिया विश्वसुहृत्सखस्य साम्येन वीता
भिमतेस्तवापि। महद्विमानात्स्वकृताद्धि मादृक् नंक्ष्यत्यदूरादपि शूलपाणिः॥ २५॥ इति श्रीभागवते महापुराणे पंचमस्कंधे दशमोऽध्याः॥ ५॥१०॥

तच्च बाध्य न पगमे पि शास्तरि श्वराज्ञासंपादने नैव फलत्वात्॥ तदाह॥ स्वधर्मरूपमच्युतस्याराधनं कुर्वन्नयस्मादघौघं विजहाति॥ यस्मा
देवं मम त्वदुक्तं विपरीतं प्रतिभाति॥ तत्तस्मात् नरदेवाभिमानमदेन तुच्छीकृतास्तिरस्कृताः सत्तमा भवादृशा येन॥ तस्य मे मैत्री
दृशं स्नेहयुक्तां दृष्टिं कृषीष्ट करोतु॥ सतामवज्ञानं रूपं अंहः पापं पजातरिष्यामि॥ ननु मम अवज्ञा कृत विकाराभावात्॥ कुतः पापं तत्रा
ह॥ नेति॥ यद्यपि तव विक्रिया नास्ति विश्वस्य सुहृद्वासौ सखा च तस्य अतः सर्वत्र साम्येन स्वदेहे विगताभिमानस्य॥ तथापि महतामवज्ञा
नात् मादृशो विनंक्ष्यति॥ अदूरात् क्षिप्रं॥ शूलपाणिरिवातिसमर्थोऽपीत्यर्थः॥ २५॥ इति श्रीभागवते पंचमस्कंधे दशमोऽध्यायः॥ १०॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एकादशेऽथ संप्रश्लोऽरह्रूगणमहीभृता। उपादिशत्परं ज्ञानं स योगीति निगद्यते॥ १॥ अकोविदः अविद्वान् अपि त्वं कोविदानां वादान् उच्चावचान् इव वदसि॥ अथो अतः अत्यन्तं विदुषां मध्ये श्रेष्ठो न भवसि॥ कुतः हि यस्मात् यं स्वामिभृत्यादिलोकिकं व्यवहारं त्वं सत्यमात्थ॥ एवं सूरयस्तत्त्वविचारेण सह न वदन्ति॥ किं त्वविचारसुंदरं वदंति अतो न सत्यः॥ वैदिकोऽपि कर्मफलमयव्यवहारो

ब्राह्मण उवाच॥ ॥ अकोविदः कोविदवादवादान्वदस्यथो नातिविदां वरिष्ठः॥ न सूरयो हि व्यवहारमेतं तत्त्वावमर्शेन सहामनन्ति॥ १॥ तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृंभितेषु॥ न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति साधुः॥ २॥ तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन्॥ स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात्॥ ३॥॥

न सत्यत्वमाह॥ उरवो गार्हाः गृहसंबंधिनो मेधा यज्ञाः तेषां वितानो विस्तारः॥ तद्विषयासु विद्यासु उरु अधिकं विजृंभितेषु तत्त्ववादः नु निश्चितं न चकास्ति न प्रकाशते तथा श्रुतिः॥ नेह नास्ति किंचनेत्यादि॥ शुद्धो हिंसादिशून्यः साधुः रागादिशून्यश्च॥ प्रायेणेति ईश्वरार्पितकर्मणा परमार्थफलत्वाभिप्रायेणोक्तं॥ ननु श्रुतवेदान्तस्यापि पुंसः कर्मसु प्रवृत्तेः कथमसत्यता तत्राह॥ नेति साक्षाद्यथावत्तत्त्वज्ञानाय वरीयस्योऽपि वेदान्तवाचस्तस्य न सम्यगासन् न बभूवुः॥ स्वप्ने या निरुक्तिस्तया स्वप्नदृष्टं तेन दृश्यत्वा

॥ ३४ ॥

नृ॰ ३.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१ चेतोभिः ज्ञानेंद्रियैः ॥ आकूतिभिः कर्मेंद्रियैः ।

एवं प्रपंचस्य सत्यत्वं तदुक्तं निराकृत्य संसारस्यापि तदुक्तं सत्यतां निराकर्तुं तस्य मनोनिमित्ततामाह ॥ यावदित्यादिना यावत्समाप्तिः । मनो याव
द्रजआदिगुणैरनुरुद्धं वशीकृतं भवति ॥ तावन्मनो निरंकुशं सत् पुरुषस्य कुशलं धर्ममितरमधर्मं च आतनोति ॥ कैः चेतोभिर्ज्ञानेंद्रियैः
आकूतिभिः कर्मेंद्रियैश्च ॥ ततश्च धर्माधर्मवासनायुक्तं तदेवानेकदेहादिवैचित्र्यं करोतीत्याह ॥ सइति ॥ पुंस्त्वं आत्मशब्दविशेषण
त्वेन तन्मन इत्यर्थः ॥ वासनायुक्त आत्मोपाधित्वादात्मा । अतो विषयैरुपसक्तोऽनुविद्धः ॥ अतो गुणप्रवाहः । गुणैरितस्ततश्चाल्य
मानः अत एव विकृतः कामादिपरिणामवान् । षोडशात्मा षोडशकलासु मुख्यं वेदिम इंद्रियरूपासु मुख्यः । पृथक्नामभिः सहरूपभेदं
देवतिर्यगादिरूपं विभ्रत् अंतर्वहिष्ट्वं उत्कृष्टत्वं निकृष्टत्वं च पुरैः स्वैरेव देहैर्वितनुते तनोति ॥ नामाभिरित्यत्र रेफलोपो दीर्घाभावश्चा

यावन्मनो रजसा पूरुषस्य सत्वेन वा तमसा वानुरुद्धं ॥ चेतोभिराकूतिभिरातनोति निरंकुशं कुशलं चेतरं वा ॥४॥ सवासनात्मावि
षयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा ॥ विभ्रत्पृथग्नामभिरूपभेदं अंतर्वहिष्ट्वं च पुरैस्तनोति ॥५॥ दुःखं सुखं व्यतिरि
क्तं च तीव्रं कालोपपन्नं फलमाव्यनक्ति ॥ आलिंग्य मायारचितांतरात्मा स्वदेहिनं संसृतिचक्रकूटः ॥६॥ तावानयं व्यवहारः सदाविः
क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः तस्मान्मनो लिंगमदो वदंति गुणागुणत्वस्य परावरस्य ॥७॥

र्थः ॥ फलं च तदनुरूपं करोतीत्याह ॥ दुःखं सुखं व्यतिरिक्तं च मोहं ॥ तीव्रं दुर्निवारं ॥ काले प्राप्तं फलं सर्वतो अभिव्यनक्ति सृजति । ननु जडः क
थं सृजतीत्यत्राह ॥ स्वदेहिनमालिंग्य आलिंगने कारणमाह ॥ माययारचितः अंतरात्मा जीवोपाधिः । उपाधितामाह ॥ संसृतिचक्रे
कूटयति ॥ छलयतीति तथा । यथा ग्रामकूटयति ॥ एवमनं मनो निबंधनः संसारो जीवे फलतीत्याह ॥ तावानिति ॥ अविश्वप्रकाशमान
सदाक्षेत्रज्ञस्य साक्षाद्दृश्यो नवितु स्थूलसूक्ष्मः जाग्रत्स्वप्नरूपः मनसः संसारहेतुत्वमुपसंहरन् मोक्षस्यापि तदेककारणमित्याह
तस्मादिति । अदो मनः लिंगं कारणत्वं गुणाभिमानत्वं ॥ अगुणत्वं तद्राहित्यं ॥ तदेव परमवरं च तस्य ॥७॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कथमेकमेव बिलक्षणयोः कारणं अवस्थाभेदादित्याह॥ गुणेति नैर्गुण्यं निर्गुणं॥ अथो इति कार्त्स्न्येन दृष्टांतेन स्फुटयति॥ यथै
ति॥ अन्यदा तु द्यतत्त्वयेस्वं पदं शुक्लभास्वररूपं महान्भूतात्मत्वं वा॥ अन्यत्र अन्यदा वृत्तीर्दर्शयति॥ एकादश वृत्तय आसन्॥ आ
कूतयः क्रियाकाराः पंचविधियश्च ज्ञानाकाराः पंच अभिमानश्चेति॥ हे वीर भूमीः विषयानेवाह॥ गंधादयः पंच ज्ञानेंद्रियद्वारा धी
वृत्तीनां विषयाः आहृतिः रूपं श्रवः शब्दः विसर्गादयः पंच कर्मेंद्रियद्वारा कर्माकारवृत्तीनां विषयाः रतिसंभोगः अभिनिर्गतिः॥ पुर
स्याभिमानविषमत्वप्रकारमाह॥ एकादशं पुरस्त्रीकृतमिति स्वीकरणं अयमर्थः॥ शरीरमाभिमानस्पन्दे जतया गंधादिवि ३५

गुणानुरक्तं व्यसनाय जन्तोः क्षेमाय नैर्गुण्यमथो मनः स्यात्॥ यथा प्रदीपो घृतवर्तिमश्नन् शिखाः सधूमा भजति ह्यन्यदा स्वं॥ ८॥ स्वपदं भज
पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वं॥ एकादशासन्मनसो हि वृत्तय आकूतयः पंच धियोऽभिमानः॥ ९॥ नानाकारा
एकादशं स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः॥ ॥ द्रव्यस्वभावाशयकर्मकाले रेकादशामी मनसोऽधिकाराः॥

द्विषयश्च नापि कार्यतया विसर्गादिवत् किंतु ममेति॥ भोगायतनत्वेन स्वीकार्यतया विषय इति॥ एके तु विवेकिनामिव पुरं ममत्व
विमानविषयश्च न तु मूढानां॥ अतो मूढदृष्ट्या अहंकारं द्वादशं वृत्त्यंतरमाहुः॥ तस्य च पुरमेव शय्यासंज्ञं द्वादशं विषय
माहुः॥ तत्र हि जीवो हंकारेण शेते॥ यतः पुरि शयानात् पुरुष उच्यते॥ तासां वृत्तीनामवांतरभेदैरानंत्ये क्षेत्रज्ञतो न मिथो न स्वतश्च
स्युः॥ द्रव्या विषयाश्च स्वभावः परिणामहेतुः॥ आश्रयः संस्कारः कर्म अदृष्टं कालश्च क्षोभकः ते निमित्तभूतेः॥ १०॥

६ मात्राणि कर्माणि पुरं च तासां वदंति हैकादश वीर भूमीः॥ ८॥ गंधाकृतिस्पर्शरसश्रवांसि विसर्गरत्यर्त्यभिजल्पशिल्पाः॥ ४६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्रयमेंत्रातशः सहस्रशः शतशः कोटिशः स्युः न तु मिथः स्विन्नवस्तुतः किंतु क्षेत्रज्ञात्परमेश्वरात् तस्य परानंतशक्तित्वात् अनन्तासुरित्य
र्थः॥ यद्वा नासी मिथ्या तमनेनोच्यते॥ कोटिशो भवंत्य तस्ताः क्षेत्रज्ञत एव स्युः तत्स त्त्वयैव सत्तालम्भेरन्॥ ननु मिथो नवस्तुतः इ
ति॥ यद्वा क्षेत्रज्ञो जीवस्तस्मान्न स्युः तस्या विकारित्वात् न मिथः इतरेतराश्रयापत्तेश्च स्वतो मिथ्याभूता एवेति॥ तदेवं श्लोकत्र
येण गुणकर्मानुरूपं मनोवृत्ती श्रयत इतियदुक्तं तत्प्रपंचतः अन्यदा तत्वं श्रयत इतियदुक्तं तदेव तत्वमाह क्षेत्रज्ञ इति जीवस्य
जीवोपाधेः अविशुद्धकर्तुर्मनसः॥ नित्याः प्रवाहरूपेणाविच्छिन्नाः॥ जाग्रत्स्वप्नयोराविर्भूता पर पक्षापि सुषुप्तौ तिरोभूताः पश्यति
अवस्थात्रयसाक्षी क्षेत्रज्ञ आत्मतत्वमित्यर्थः॥ क्षेत्रज्ञो द्विविधः त्वंपदार्थो जीवः तत्पदार्थ ईश्वरस्य तत्राद्यो निरूपितः॥ इदानीं॥ ॥
सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः॥ आ ॥
विर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः॥ ॥१२॥ क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः ॥
नारायणो भगवान्वासुदेवः स्वमायात्मन्यवधीयमानः॥ ॥१३॥ यथानिलः स्थावरजंगमानामात्मस्वरूपेण निविष्ट ईशेत्॥ एवं प
॥ ~~~~~~ रो भगवान्वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः॥ ॥१४॥ ॥ ॥

तत्राप्यमीश्वरं निरूपयति॥ क्षेत्रज्ञ आत्मा व्यापी पुराणो जगत्कारणभूतः पुरुषः पूर्णः॥ साक्षादपरोक्षः सन् स्वयंज्योतिः न तु
ज्ञानस्य विषयत्वेनाश्रयत्वेन वापरोक्षः अजो जन्मादिशून्यः परेषां ब्रह्मादीनामपीशः॥ नारं जीवसमूहः स अयनं यस्य नियन्तु
भगवानैश्वर्यादिषड्गुणवान्॥ वासुदेवः सर्वभूतानामाश्रयः स्वाधीनया मायया॥ आत्मनि जीवे अवधीयमानः अवस्था
प्यमानः॥ कर्मकर्तरि प्रयोगः॥ तं नियंतृत्वेन वर्त्तमान इत्यर्थः॥ एतत्स दृष्टान्तमाह॥ यथेति॥ आत्मस्वरूपेण प्राणरूपेणेशो

भा॰पं॰ तदेवमात्मनः शुद्धत्वं संसारस्य च मिथ्यात्वं प्रदर्श्येदानीं तन्निवृत्तिमाह ॥ तनुभृद्देही वयुनोदयेन ज्ञानोत्पत्त्या यावन्मायां विधू
३६ यात्मतत्त्वं न वेद तावदिह भ्रमति ॥ यावद्वा विषयानुरक्तं मन एवानर्थहेतुरिति न वेद तावन्निर्वेद ॥ भावात्परिभ्रमत्येवेत्या
ह ॥ आत्मनो लिंगमुपाधिभूतं मनः संसारतापानामावपनं क्षेत्रं यावन्न वेद तावद्भ्रमतीत्यनुषंगः ॥ तापावपनत्वे हेतुः ॥ ॥

न यावदेतां तनुभृन्नरेंद्र विधूय मायां वयुनोदयेन ॥ विमुक्तसंगो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥ ३६
।१५। न यावदेतन्मन आत्मलिंगं संसारतापावपनं जनस्य ॥ यच्छोकमोहामयरागलोभवैरानुबंधं ममतां
विधत्ते ॥ १६ ॥ भ्रातृव्यमेनं त्वमदभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः ॥ गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं
स्वयमात्ममोषं ॥ १७ ॥ इति श्री भागवते महापुराणे पंचमस्कंधे एकादशोऽध्यायः ॥ ११ ॥

यन्मनश्शोकाद्यनुबंधं ममतां च विधत्ते ॥ तस्माद्भ्रातृव्यं शत्रुं अध्येधितं संवर्द्धं स्वयं विलीकं मिथ्याभूतं तथाप्यात्मानं मुष्णा
तीति तथा तं गुरुरेव हरिस्तस्य चरणोपासनमेवास्त्रं यस्य तथाभूतः सन् जहि घातय ॥ १७ ॥ इति पंचमे एकादशोऽध्यायः ॥ ११ ॥
द्वादशे पुनराहूगणः संदेहेन महीभृता ॥ ॥ स योगी सर्वसंदेहान् पानुददितीर्यते ॥ १ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कारणमीश्वरः तस्यैव लोकसंरक्षणार्थो विग्रहो देहो यस्य। स्वरूपेण परमानंदप्रकाशेन तुच्छीकृतो विग्रहो येन। अहे अवधूते योगेश्वर द्विजवंधो। लिंगेन वेषेण निगूढो नित्यानुभवो येन तस्मै नमः॥ ॥ विशेषतः प्रष्टुं तद्वाक्यमभिनंदति॥ त्वर एवामयो रोगस्तेनार्त्तस्य यथा सद्वस्त्वाद् अगदमौषधं यथा निदेशास्तेन दग्धस्य संतप्तस्य हिमांभः शीतलमुदकं वा तथा हे ब्रह्मन् कुत्सिते देहे यो मानः। अहंकारः स एव अहिस्तेन दष्टा दृष्टिर्विवेकलक्षणा यस्य तस्य मे तव देवं वचः अमृततुल्यमौषधं। मम संशयविषयमर्थं पश्चात्प्रक्ष्यामि। अधुना

रहूगण उवाच॥ नमो नमः कारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय॥ नमोवधूत द्विजवंधुलिंग निगूढनित्यानुभवाय तुभ्यं॥ ॥१॥ ज्वरामयार्त्तस्य यथागदं सन्निदाघदग्धस्य यथा हिमांभः। कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मंस्तव वचस्तेमृतमौषधं मे॥ ॥२॥ तस्मान्भवंतं मम संशयार्थं प्रक्ष्यामि पश्चादधुना सुबोधं। अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे॥ ॥३॥ यदाह योगेश्वर दृश्यमानं क्रियाफलं सद्व्यवहारमूलं। न तंजसा तत्त्वविमर्शनाय भवानमुष्मिन् भ्रमते मनो मे॥ ॥४॥

तावद्भवतोक्तं वचः अध्यात्मयोगेन ग्रथितं दुर्वोधं सुबोधं यथा भवत्येवं व्याख्याहि कौतूहलयुक्तं चेतो यस्य तस्य ममात्वयो दितं व्यक्तम विप्रलब्धमित्यादिना भारवाहनादिक्रिया वतत्फलं च श्रमादिप्रत्यक्षादिसिद्धं दृश्यमानं सत् अवाधितमपि व्यवहारमात्र मूलं यद्वा सतः अवाधितव्यवहारस्य मूलं कारणमपि व्यवहारमात्रमूलं यद्वा सतः अवाधितव्यवहारस्य मूलं कारणमपि नात्यंज

भूतभावनं स्वरूपं येन॥ भवापहं संसारहरं॥ भक्तेष्वित्यनुषंगः॥ भवं भावयतीति तथा तं॥ अर्थादन्नक्तेषु इति द्रष्टव्यम्॥
॥१८॥
॥श्रीकृष्ण॥ ॥ ॥राम॥ ॥ ॥

भागं॰ ५४

ईश्वरत्वमुपपादयंस्तामसत्वेन प्रसक्तामनामदनं वारयति। निरीक्षमाणस्यापि दृष्टिर्मायागुणो विषजोश्चित्तवृत्तिभिरकरणोश्च अ
थपिईश्वरदीपेनाज्यते॥ नलिप्यते॥ किमर्थं निरीक्षमाणस्य॥ ईशो ईशनाय॥ नियमनाय ईशनमीट् संपदादित्वात् भावे क्विप् अ
त्र वैधर्मे दृष्टांतः। यथा अजितक्रोधवेगानां नोस्माकं दृष्टिरज्यते॥ नतथेति। अतः आत्मनः इंद्रियाणि जिगीषुः जेतुमिच्छुः। मुमु
क्षोः तं कोनमन्येत नाद्रियेत॥ ननु सुरामध्वाभ्यां मत्तस्य कुतो दृष्टिर्नाज्यते तत्राह॥ असतीदृक् दृष्टिर्यस्य तस्य॥ स्वमायया क्षी ५४

नयस्य मायागुणविषवृत्तिभिर्निरीक्षितोप्यस्यापि दृष्टिरज्यते॥ ईशो यथा नो जितमन्युरंहसां कस्तं न मन्येत जिगीषुरा
त्मनः॥ ।१०। असदृशो यः प्रतिभाति मायया क्षीवेव मध्वासवताम्रलोचनः॥ न नागवध्वोर्हण ईशिरे ह्रिया तत्पादयोः
स्पर्शनधर्षितेंद्रियाः॥ ।११। यमाहुरस्य स्थिति जन्म संयमं त्रिभिर्विहीनं तमनंतमृषयः नवेद सिद्धार्थमिव क्वचित्स्थितं।
भूमंडलं मूर्द्धसहस्रधामसु॥ ।१२। ॥

भागवतो बोभयंकरः प्रतिभाति॥ मध्वासवाभ्यां आताम्रलोचन इव नागवधूविमोहनेन तथा प्रति भाति युक्तमित्याह नेति। पादार्चनेयस्य
पादयोः स्पर्शनेन धर्षितं मोहितं इंद्रियं मनो यासां ताः ह्रिया लज्जया। गुडाद्यर्हणेनईशिरे नशेकुः। कस्तं न मन्येतेति॥ पूर्वेणै दे॰
वान्वयः॥ अस्य विश्वस्य जन्मस्थिति संयम हेतुं यमाहुः॥ अत एव त्रिभिः स्थित्यादिभिर्हीनं अनंतं च यमाहुः॥ ऋषयो मंत्राः छंद
त्रोघेन दीर्घपाठे ऋकारो देवमाता लक्ष्मीः सा वत्सा षष्ठश्चेत्यर्थः॥ अनंतत्वं दर्शयति॥ मूर्द्धसहस्रमेव धामानि स्थानानि तेषु।
को विदेशो स्थितिं भूमंडलं यो न वेद सिद्धार्थ सर्षपमिव तस्मैन मशति स्तुत्येना न्वयः। १२॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्र जन्मादिहेतुत्वं महदादिद्वारेण प्रपंचयति॥ यस्य गुणनिमित्तो महान्नाम विग्रह आसीत्॥ विज्ञानं सत्वधिष्ण्यमाश्रयो यस्य सः॥ तस्य वित्तत्वप
त्वेन सत्वप्रधानत्वात् स एव किलादिदेवो वासुदेवाभेदविवक्षया भगवान् अजो ब्रह्मा यत्संभवः यस्माद्ब्रह्मणः संभूतः अहं रुद्रः त्रिवृता
गुणेन॥ स्वतेजसा वस्त्वविभूतिरूपेण वैकारिकं देवतावर्गं तामसं भूतवर्गं ऐंद्रियमिंद्रियवर्गं विसृजामि किंच॥ एते वयं महदादयः सर्वे
यस्यानुग्रहादिदं ब्रह्मांडं सृजामः॥ कथंभूताः यस्य महात्मनो वशे स्थिताः संतः। यतः सूत्रेण रज्ज्वा नासिकया यंत्रिताः प्रोताः शकुंताः पक्षि

यस्याद्य आसीद्गुणविग्रहो महान् विज्ञानधिष्ण्यो भगवानजः किल॥ यत्संभवोऽहं त्रिवृता स्वतेजसा वैकारिकं तामसमैंद्रियं सृजे॥
एते वयं यस्य वशे महात्मनः स्थिताः शकुंता इव सूत्रयंत्रिताः॥ महानहं वैकृततामसेंद्रियाः सृजाम सर्वे यदनुग्रहादिदम्॥
यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोऽयं गुणसर्गमोहितः॥ न वेद निस्तारणयोगमंजसा तस्मै नमस्ते विलयोदयात्मने॥
॥२४॥ इति श्रीभागवते महापुराणे पंचमस्कंधे सप्तमोऽध्यायः॥ ॥१७॥ ॥ ॥१७॥

णइव लोके केनस्तेन॥ वयमित्युक्तं तानेवाह॥ महानहंकारश्च वैकृतादयः पूर्वोक्ता वर्गाश्च स्थितिलयहेतुत्वं दर्शयन् प्रणमति॥ येन
निर्मितामेतां मायामेवायं जनो ऽसावेदन उत तन्निस्तारयोगमुपायं कर्हिचिदपि वेदेति स्थितिहेतुत्वं दर्शितं कर्माण्येव पर्वाणि ग्रंथयः
तानि नयति॥ प्रापयंतीति तथा तां प्रलयहेतुत्वमाह॥ विलीयते स्मिन्निति विलयः उदेत्यस्मादित्युदयः तस्य विलयश्चोदयश्च
(त्मा स्वरूपं यस्य तस्मै नमः॥ ॥ ॥१७॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अष्टादशेनतोमेरोः पूर्वादिक्रमतस्त्रिषु॥ त्रिषु चोत्तरवर्षेषु सेव्यसेवकवर्णनं॥ १ ॥ भद्रश्रवा वर्षपतिः तस्य कुलपतयः सेवकमुख्याश्च भद्रश्रवस
 ऊचुरिति॥ प्राणभृत उपदधातीतितज्ज्ञाणलक्षणयातद्योगाभ्राणिषु लिंगासमवाजन्यायेन बहुवचनम्॥ अयं जनो मिषन्न पिपश्यन्नपि
घ्नंतं हिंसंतं न पश्यति॥ नालोचयतीति भगवद्विचेष्टितमेवतच्चाविचित्रं॥ अदर्शने लिंगं पुत्रं बालं पितरं च दृष्ट्वं मृतं निर्हृत्य दग्ध्वा स्वयं तदु
भयधनैर्जिजीविषति॥ जीवितुमिच्छति॥ पाठांतरे तु इदं सामंजस्यं किं धर्माद्यर्थेन प्र हीयतः असत्तुच्छं विषयसुखं सेवितुं विकर्मपा
पमेव ध्यायन्॥ न त्वाद्विद्वान्न पश्यति॥ किमत्र चित्रं तदाह॥ नश्वरं वदंति स्म शास्त्रतः पश्यंति च समाधौ हे अज तथापि मायया मुह्यंति॥ ॥
श्री ४ कुरुवाच॥ ॥ तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनुं धर्ममयीं हयशी
र्षाभिधानां परमेण समाधिना हृदि सान्निधाप्येदमुपगृणंत उपधावंति॥ भद्रश्रवस ऊचुः॥ ॥ ॐ नमो भगवते धर्मायात्मविशोधनाय
नम इति॥ १ ॥ अहो विचित्रं भगवद्विचेष्टितं घ्नंतं जनोयं हि मिषन्न पश्यति॥ ध्यायन्नसद्यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जि
जीविषुः॥ २ ॥ वदंति विश्वं कवयश्च नश्वरं पश्यंति चाध्यात्मविदो विपश्चितः॥ तथापि मुह्यंति तवाज मायया सुविस्मितं कृत्यमजं
नतोस्मितं॥ ३ ॥ विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरंगीकृतमप्यपावृतः॥ युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च
॥ वस्तुनि॥ ४ ॥ श्रीः॥ ॥ ॥ पा
एतद्यतवकृत्यं त्वचेष्टितं सुविस्मितं॥ इति चित्रं अतः शास्त्रादिश्रमं विहाय तं त्वामजं नतोस्मि॥ इदमपरं चित्रवत्प्रतीयमानमपि त्वयि न चित्र
मित्याह॥ विश्वस्योद्भवादि कर्म अकर्तुरपि अपगत आवृत आवरणं यस्मात्तादृशस्यापि ते अंगीकृतं वेदेन त्वयि तन्न चित्रं यतः मायया
सर्वात्मनि कार्यस्य कारणे अपीश्वरिकर्मयुक्तं॥ वस्तुतः सर्वव्यतिरिक्ते निरूपाधवनावृततत्वमकर्तृत्वं च युक्तं॥ ४ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

परमेश्वरोऽत्र न स्तोत्रे तत्प्रकृतावतारचरितमाह॥ वेदानिति॥ तमसा दैत्यरूपेण निरस्कृतान् अपनीतान् नृवत्तुरंगश्च नृतुरंगौ तद्रूपो विग्रहो यस्य कवये ब्रह्मणे तदर्थमवितथेहिताय सत्यसंकल्पाय॥ उत्तरात्र सप्तमस्कंधे प्रह्लादचरित्रे॥ महापुरुषस्य गुणानां भाजनं आश्रयो दैत्यदानवकुलस्य तीर्थीकरणं शीलमाचरितं च यस्य॥ फलसंकल्पेन व्यवधानशून्यश्चासावनन्यश्चाव्यभिचारी भक्तियोगस्तेन उपास्ते॥ सेवते॥ तेजसामपि तेजसे॥ आविराविः प्रकटो भव॥ वीप्सा वा॥ कर्माशयान् कर्मवासनाः कर्माशयानिति पाठे रागादीन् रंधय निर्दह॥ यस्मा

वेदान्युगांते तमसा तिरस्कृतान्रसातलाद्यो नतुरंगविग्रहः॥ प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्ते वितथेहिताय॥४॥

इति हरिवर्षे चाभिम्भगवान्नरहरिरूपेणास्ते॥ तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये॥५॥ तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति॥६॥ ॐ नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान्रंधय रंधय तमो ग्रस ग्रस ॐ स्वाहा अभयमभयमात्मनि भूयिष्ठा॥७॥ स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायंतु भूतानि शिवं मिथो धिया॥ मनश्च भद्रं भजतामधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी॥८॥

तेजसां सूर्यादीनां तेजोऽसि आत्मनि मयि अभयं भूयिष्ठाः भूयाः॥ विश्वस्य स्वस्त्यस्ति प्रार्थने खलस्यापि भवेत्। तच्च साधुपीडां विना न स्यात्। अन्योन्यममंगलं ध्यायतां च भूतानामन्योन्यघातं विना न भवेदेवेत्याशंक्याह॥ खलः प्रसीदतु क्रौर्यं त्यजतु॥ भूतानि च मिथः शिवमेव ध्यायंतु॥ तेषां मनश्च भद्रमुपशमादिकं भजतु नोऽस्माकमपि मतिः॥ अपिशब्दात् भूतानां च मतिरहैतुकी निःकामा सती अधोक्षजेऽस्तु॥८॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा०पं०
५६

न संगः क्वापि मास्यात्॥ यदि कथं चित्स्यात्॥ तर्हि अगारादिषु मास्यात्॥ किंतु भगवत्प्रियेष्वेव अगारादिसंगदोषमाह॥
यदि इति॥ इंद्रियप्रियो गृहाद्यासक्तः॥ भगवत्प्रियसंगे गुणमाह॥ येषां भगवत्प्रियाणां संगात् लब्धं मुकुंदविक्रमं श्रुतिभिः संस्पृ
शतां सेवमानानां पुंसां अंतर्गतयो मानसं मलं हरति॥ कथंभूतं॥ विक्रमं निजमसाधारणं वीर्यवैभवं प्रभावातिशयो यस्य
तीर्थं तु गंगादि मुहुः स्पृशतां अंगजं मलं केवलं हरति॥ तं को वै न सेवेत अन्यजनः॥ मानसमलापगमफलमाह॥ यस्येति॥
अकिंचना निष्कामा॥ मनश्शुद्धौ हरेर्भक्तिर्भवति॥ ततश्च तत्प्रसादे सति सर्वे देवा गुणैर्धर्मज्ञानादिभिः सह तत्र सम्यगासते नित्यं
भागारदारात्मजवित्तबंधुषु संगो यदि स्याद्भगवत्प्रियेषु नः॥ यः प्राणवृत्त्या परितुष्ट आत्मवान् सिध्यत्यदूरान्न तथेंद्रियप्रियः॥ ॥९॥ यत्सं
गलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं॥ हरत्यजोंतः श्रुतिभिर्गतोंगजं को वैन सेवेत मुकुंदविक्रमं॥ ॥१०॥ यस्यास्ति भ
क्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः॥ हराव भक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः॥ ॥११॥ हरिर्हि सा
क्षाद्भगवान् शरीरिणां आत्मा झषाणामिव तोयमीप्सितं॥ हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दंपतीनां॥ ॥१२॥ तस्माद्रजो
रागविषादमन्युमानस्पृहाभयदैन्याधिमूलं॥ हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताकुतोभयं॥ ॥१३॥ ॥
वसंति॥ गृहाद्यासक्तस्य तु हरिभक्त्यसंभवात् कुतो महतां गुणाः ज्ञानवैराग्यादयो वदंति॥ असति विषयसुखे मनोरथेन बहिर्धावतः नन्
हरिविमुखस्य गृहाद्यासक्तस्यापि लोके महत्त्वं दृश्यते सत्यं दृश्यते तत्तु उपहासास्पदं इति सहेतुकमाह॥ हरिर्हीति॥ यथा झषाणां
मीनानां मीप्सितं तोयमेवात्मा तेन विना जीवनाभावात्॥ महान्नाति प्रसिद्धोपि गृहे सज्जते यदि सज्जते तदा दंपतीनां मिथुनानां
श्रृगालादीनामपि प्रसिद्धं वयसैव केवलं यन्महत्त्वं तदेव तस्य भवति न तु ज्ञानादिना मिथुनेषु तेषु वृद्धमानेषु स्त्री च पुंसां महत्त्वं॥
बालमिथुनेभ्यश्च वृद्धमिथुनानां महत्त्वं यथेत्यर्थः॥ यस्मादेवं तस्मात् गृहं हित्वा॥ कुतोभयं नृसिंहपादं भजतेत्यसुरानुपदिश

कुं२

साकिंचना हेतुः गृहेषु संसक्ता॥ रागो मिलितिवेरः रजसा ... नामृते
... तेन सह गृहाणि संसृतिचक्रवालं ... मंडलं ... ॥१३॥ ... समासात्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

केतुमाले पिकामदेवरूपेण भगवान्नास्ते आस्त इति शेषः॥ किमर्थं आस्ते अत आह॥ लक्ष्म्या इति॥ प्रजापतिः संवत्सरः॥ संवत्सरो वै प्रजा
पतिरिति श्रुतेः॥ तस्य दुहितरो रात्रयः॥ मानिन्योदेवताः पुत्रा दिवसाः॥ मानिनोदेवास्तेषां प्रियचिकीर्षया॥ पुरुषायुषा वर्षशतेन यान्यहोरा
त्राणि तैः परिसंख्यानं गणनं तेषां षट्त्रिंशत्सहस्राणामित्यर्थः॥ यासां दुहितॄणां॥ महापुरुषस्य महास्त्रं चक्रं तस्य तेजसा रमारमयन्स्त्री
यानिंद्रियाणि रमयंते केन साधनेन रमयन्त्तदाह॥ अतीवसुललितया गत्या यो विलासस्तेन रुचिरो हासलेशो मंदास्मितं तत्सहितोवले
कएव लीला तया किंचिदुत्तंभितमुन्नमितं सुंदरं यद्भ्रूमंडलं तेन सुभगं वदनारविंदं तस्य श्रिया॥ तत्र भर्त्रेश्चिद्धिवसाधिष्ठानत्वेनरूपेतासवे
केतुमाले भगवान्कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां पुत्राणां तद्वर्षपतीनां पुरुषायुषाहोरात्र
परिसंख्यातानां यासां गर्भो महापुरुषमहास्त्रतेजसोद्विजितमनसां विध्वस्ताव्यसवः संवत्सरांते निपतंति॥ १४॥ अतीवसुल
लितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनारविंदश्रिया रमांरमयन्निंद्रि
याणि रमते॥ १५॥ तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमादेवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभि रूपेताहः सुवतद्भर्त्रे
भिरुपास्ते इदं चोदाहरन्ति॥ १६॥ ॐ ह्रां ह्रीं ह्रूं॥ १७॥ ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां
विशेषाणां चाधिपतये षोडशकलाय छंदोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कांताय कामाय नमस्ते उभयत्र भूयात्॥ ॥१७॥
गुणविशेषैश्चैतन्यवस्तुभिर्विलक्षितोलक्षीकृत आत्मा यस्य आकूतीनां क्रियाणां चित्तीनां ज्ञानानां चेतसां संकल्पाध्यवसायादीनां विशेषाणां तत्र
द्विषयाणां षोडशकलाश्चांशाएकादशेंद्रियपंचविषयजलक्षणा यस्य छंदोमयाय वेदोक्तकर्मप्राप्यापरब्रह्ममयाय अन्नो पष्टंभ्यत्वात् अमृतमयायस
विषयत्वात्॥ महसे ओजसे बलायते॥

स्व४

त्वत्कामे नैव त्वत्सेवकेन त्वा दर्हं कृतार्था। स्मि अन्यकामस्या तु त्वा मर्वतो न परिपूर्णा मनोरथाः स्युरित्याह॥ स्त्रिय इति॥ स्वत एव हृषी
काणामीश्वरं पतिं सं तं त्वा माराध्य याः स्त्रियो ऽन्यं पतिं प्रार्थयंति॥ पतिकामानां हि कामाराधनं व्रतेषु प्रसिद्धं॥ तासाम पत्यादीनि
ते पतयो न पांतु शक्ताः अतस्ते पतय एव न भवंतीत्याह॥ सवा इति॥ स वै वं भूतः पतिः भयान्नेक एव॥ नान्यो यो भवानात्मलाभात्प
रमन्यदधिकं न मन्यते॥ इतरथान्यादीनि सुखस्य न स्वतंत्रता॥ अस्वतंत्र नास्तित्वेवमंडलेश्वराणां मिथो मिथो भयं स्यादित्यर्थः॥ किंच
निःकामभजने ऽप्रार्थिता एव सर्वे कामा भवंति॥ सकामभजने तु कामितमात्र मनित्यं चेत्याह॥ यास्त्रीतस्य उरुकूलक्षणस्य तेपाद
स्त्रियो व्रतैस्त्वां हृषीकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासते ऽन्यं॥ तासां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि यतो ऽस्व ५७
तंत्राः॥ १९॥ स वै पतिः स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनं॥ स एक एवेतरथा मिथो भयं नैवात्मलाभादधि मन्य
ते परं॥ १९॥ या तस्य ते पादसरोरुहार्हणं निकामयेत्साखिलकामलंपटा॥ तदेव रासीप्सितमीप्सितो ऽर्चितो यद्भग्नयाच्या भग
वन्प्रतप्यते॥ २०॥ मत्प्राप्तये ऽजेशसुरादयस्तपंत उग्रं तप ऐंद्रियेधियः॥ ऋते भवत्पादपरायणान्नमां विंदंत्यहं त्वद्धृदया यतो ऽजि ता॥ २१॥
सरोरुहस्यार्हणं पूजामेव कामयेत्॥ न फलांतरं साखिलेषु कामेषु लंपटा सर्वान्कामान्प्राप्नोतीत्यर्थः॥ ईप्सितमीप्सितः फ
लांतरमाप्तुमपेक्षितः सन्नर्चितश्चेत्॥ तार्हि तदेवैकं रासिददासि॥ किंचायद्यतः फलभोगानंतरं भग्नायाच्याया वितोर्थो यस्याः
सा प्रतप्यते दुःखं प्राप्नोति देवाराासि न तु नित्यं॥ ननु महार्हणे कुतः सर्वकामप्राप्तित्वमेव हि कामार्थिभिः सेव्यसे अत आह॥ मत्प्रा
प्तये ब्रह्मादयस्तपस्तप्यंते कुर्वंते कथंभूताः ऐंद्रिये सुखे धीर्येषां अलुब्धमासः॥ तथापि भवत्पादपरायणाद्दते मां तः विंदंति मत्
कृपाद्दृ विलासिता विभ्रतीर्नलभंत इत्यर्थः॥ यतः त्वय्येव हृदयं यस्याः सा ऽर्हत्वत्परं त्वात्वदनुवर्तिनमेव विलोकया भिनान्यमित्यर्थः॥ २१॥

स२

इदानीं तत्कृपां प्रार्थयते सत्वमिति। यद्भजनं विनान कश्चित्पुरुषार्थः। सत्वं त्वादृति। त्वया यत्करांबुजं सात्वतां भक्तानां शीर्षि
अधायि कृपया न्यस्तं॥ तन्ममापि शीर्षि निधेहीति विशेषः॥ कथं भूतं वंदितं सर्वकामवर्षित्वेन सङ्गिस्तत्तं न च मयि तथा नादरो
यतो हे वारेण्य मां प्रत्यसि लब्धस्पृहः लब्धाभविनार्थि॥ अहो चित्रमेतत्॥ मयि केवलमादरमात्रं॥ भक्तेषु तु परमा कृपा अत ईश्वरस्य तव
मायया ईहितं न कोपि तर्कयितुं समर्थः॥ सत्वाय सत्व प्रधानाय मुख्यतमाय सत्वात्मने॥ ३ रूस्वनो वेदात्मको नादो यस्य॥ यदिदं
सत्वं ममाप्यच्युत शीर्ष्णि वंदितं करांबुजं यत्त्वदधायि सात्वतां॥ विभर्षि मा लब्धभवरे एवमायया कईश्वरस्येहितमीहित
मूहितुं विभुः॥ २२॥ इति रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षस्य पुरुषस्य मनोः प्राक्प्रदर्शितं स इ
दानीमपि महता भक्तियोगेनाराधयति॥ इदं चोदाहरंति॥ २३॥ ॐ नमो भगवते मुख्यतमाय नमः सत्वाय प्राणायौजसे सह
से बलाय महामत्स्याय नम इति॥ अंतर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः स ईश्वरस्त्वं य इदं वशेनय
न्नाम्ना यथा दारुमयीं नरः स्त्रियं॥ २४॥ यं लोकपालाः किल मत्सरज्वरा हित्वा यतंतोपि पृथक्समेत्य च॥ पातुं न शेकुर्द्विपद
श्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते॥ २५॥
विश्वं ब्राह्मणादिनाम्ना विधि॥ निषेधालंबनभूतेन वशेऽनयत् नियमितवान् स त्वमीश्वरः तथा च श्रुतिस्तस्य वाक्तंति
नामानि दामानीति॥ न त्विंद्रादयो वशं नयंति॥ लोकपालकत्वात्॥ कुतो हं तत्राह॥ यमिति। मत्सर एव ज्वरो येषां ते॥ यं हि
त्वा द्विपदश्चतुष्पदः सरीसृपं जंगमं स्थावरं च॥ यदत्र दृश्यते॥ तत्किंचिदपि पातुं न शक्ताः सहः त्वमेव प्राणरूपेण पालक ईश्वरश्चे
त्यर्थः॥ तात्पर्यं हि संता हमुक्तमस्य हमुक्यमस्मीत्यादि॥ २५॥
रू. ।
CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अवतारचरितमाह॥ भवानिति॥ इमां क्षोणीं मया मनुना सह मत्संहितां धृत्वेत्यध्याहारः ऊर्मिमालावति प्रलयार्णवे अंजसा क्रमक्र
मते विचरति॥ यद्वा पारमित्यस्यानुषंगः॥ क्षोणीं पारं क्रमते उत्सहत इत्यर्थः॥ यतः अजः कीदृशीं ओषधीनां वीरुधां च नि
धिं आश्रय भूतां॥ तस्मै नमः॥ जगतोयः प्राणगणस्तस्यात्मने त्रिवृते॥ तत्प्रियतमां तां प्रियतमां॥ अकूपाराय कूर्माय
भवान् युगान्तार्णवे ऊर्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिं॥ मयासहोरु क्रमते ज ओजसा तस्मै जगत्प्रा
णगणात्मने नमः॥ ॥२६॥ इति हिरण्मयेनु भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुं अर्यमा सह व
र्षपुरुषैः पितृगणाधिपतिरुपधावति॥ मंत्रमिमं चानुजपति॥ ॥२७॥ ओं नमो भगवते कूपाराय सर्वसत्वगुणविशेष
णायानुपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमो वस्थानाय नमस्ते॥ ॥२८॥ यद्रूपमेतन्निजमायया र्पितंमर्थस्वरू
पं बहुरूपरूपितं॥ संख्यान यस्यास्त्ययथोपलंभनात्तस्मै नमस्ते व्यपदेशरूपिणे॥ २८॥ ॥

सर्वैः सत्वगुणैः सत्वगुणो विशेषणं यस्य॥ न उपलक्षितं स्थानं यस्य वारिचरत्वात्॥ वर्ष्मणे वर्षीयसे कालानवच्छिन्नाय॥ भूम्ने
सर्वगताय अवस्थानाय अत्राराधाय निजमायया र्पितं प्रकाशितमेतदर्थस्वरूपं दृश्यं पृथिव्यादि यस्यैव रूपं यतः पृथङ् ना
स्ति॥ कथं रूपं बहुभिः रूपै रूपितं निरूपितं यस्य च संख्या नास्ति कुतः अयथा मिथ्यैवोपलंभनात् नहि मरीचिजलमे
तावदिति संख्यातुं॥ शक्यते॥ व्यपदेशरूपिणे अनिरुक्तरूपं वाकाराय॥ २८॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वरूपत्वं दर्शयंस्तस्येश्वराद्व्यतिरेकमाह॥ जरायुजेति॥ द्वीपग्रहर्क्षमित्यभिधेयस्त्वमेवैकः न त्वद्व्यतिरिक्तोऽस्ति सर्वं खल्वि
दं ब्रह्मेत्यादि श्रुतेरित्यर्थः॥ सप्रपंचतामनूद्य तन्निरासेन प्रणमति॥ यस्मिन्निति॥ असंख्येया अनंता विशेषा येषां तानि नामा
नि रूपाण्याकृतयश्च यस्य तादृशे यस्मिंस्त्वयि कविभिः कपिलादिभिरियं चतुर्विंशत्यादिसंख्या कल्पिता सती यया तत्त्वदृशाये
तत्त्वज्ञानेनाऽपनीयते तस्मै ते सांख्यसिद्धांतरूपाय नमः॥ परमार्थरूपायेति॥ एषा भूरुपधावति हे त्वन्वयः॥ मंत्रैस्तत्त्वेन किं
जरायुजं स्वेदजमंडजोद्भिच्चराचरं देवर्षिपितृभूतमैंद्रियं॥ द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षमित्यभिधे
य एकः॥ ३०॥ यस्मिन्नसंख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयं सं[illegible]ख्या यया तत्त्वदृशापनीयते तस्मै नमः सां
ख्यनिदर्शनाय ते॥ ३१॥ इति उत्तरेषु कुरुषु भगवान् यज्ञपुरुषः कृतवराहरूप आस्ते॥ तं तु देवी हैषा भूः सह कुरुभिर
स्खलितभक्तियोगेनोपधावति॥ इमां च परमामुपनिषदमावर्त्तयति॥ ॐ नमो भगवते मंत्रतत्त्वलिंगाय यज्ञक्रतवे महाध्वराव
महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते॥ ३२॥ यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसं मथ्नंति मथ्ना
मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने॥ ३३॥

यवत इति तथा तस्मै॥ यज्ञाश्रयरूपाः तद्रूपाय॥ अत एव महान्तोऽध्वरा अवयवभूता यस्य॥ कर्मणा शुक्लाय प्रसिद्धाय यज्ञानुष्ठात्रे॥ त्रियुगाय॥
कृतयुगे यज्ञाभावात् यद्वा कलियुगे छन्नत्वात्॥ कवयो विद्वांसः विपश्चितो निपुणाः गुणेषु देहेंद्रियादिषु मथ्नंति विविक्तं तिमंथ्ना विवे
कसाधनेन मनसा क्रियार्थैः कर्मभिः तत्फलैश्च गूढं अप्रकाशमानं दिदृक्षवः एवं मंथनेन ईरितः प्रकटित आत्मा स्वरूपं यस्य तस्मै नमः॥ ३३॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा॰पं॰ मथनमेवदर्शयन्नाह॥ द्रव्यं विषयः क्रिया इंद्रियव्यापारः हेतुर्देवताः॥ अयनं देहः॥ ईशः कालः कर्त्ताहंकारः॥ एतैर्मायागु
५८ णैः कार्यैरुपलक्षणैर्वस्तुत्वेनानिरीक्षितो यआत्मा तस्मै॥ अन्वीक्षया विचारेण॥ अंगैर्यमनियमादिभिर्निरतिशयात्मानि
ष्ठयवतैर्वुद्धिर्येषां तैः निरस्तामाया निमित्ता आकृतिर्यस्मात्तस्मै॥ तदेवं निर्गुणरूपेण नत्वा परमेश्वररूपेण प्रणमति करोतीति
यस्येक्षितुर्जीवार्थमीक्षितं॥ अल्पंतानिक्षायामीक्षणयोगात्॥ स्वार्थंतु नेक्षितं॥ विश्वस्थित्यादिस्वगुणैर्मायाकरोति तस्य
द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने॥ अन्वीक्षियांगैर्गतिशयात्मवुद्धिभिर्निरस्तमायाकृतये ५८
नमो नमः॥ ३४॥ करोति विश्वस्थिति संयमोदयं यस्येक्षितं नेक्षितमीक्षितुर्गुणैः॥ मायायथाऽयोभ्रमते तदाश्रयंग्रा
व्णो नमस्ते गुणकर्मसाक्षिणे॥ ३५॥ प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः कृत्वाग्रदंष्ट्रे निरगादु
दन्वतः क्रीडन्निवेभः प्रणतास्मि तं विभुं॥ ३६॥ इति श्री भागवते महापुराणे पंचमस्कंधे अष्टादशोऽध्यायः॥ १८॥

जडत्वेपीश्वरसन्निधानात्स्वव्रिष्टांत्यं दृष्टांतेनाह॥ यथाऽयोलोहं ग्राव्णो अजस्कांतान्निमित्तानुभ्रमति तदाश्रयं तदभिमुखं सर्व
गुणानां कर्मणां जीवादृष्टानां च साक्षिणे तस्मै नमः॥ अवतारा चरितमाह॥ प्रमथ्येति॥ यो जगतामादिः कारणंसूकरः मां पृथ्वीं अग्रदंष्ट्रे दंष्ट्राग्रे कृत्वा रसातलादारभ्य उदन्वतः प्रलयार्णवादिभोवारणश्च निरगात्॥ ततश्च प्रतिवारणं
१ प्रतिगजतुल्यं दैत्यं प्रमथ्य यः क्रीडन्निव स्थितः तं विभुं प्रणतास्मीत्यन्वयः॥ ३६॥ इति पंचमे अष्टादशः॥ १८॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उ नावं शे किंपुरुषे भारते वो पवर्ण्यते॥ सेव्यसेवकभावश्च भारत श्रेष्ठ्यमेव च॥ ॥१॥ भर्त्ता वासौ भगवांश्च तस्य कर्थं॥ आर्याणि लक्षणा
शीलं व्रतं यस्मिन्॥ उपशिक्षितात्मने संयत विज्ञाय॥ उपासितो लोकायेन॥ साधुवादः साधुत्वप्रसिद्धिः तस्य निकषणाय निकषाश्म
वन्निर्ह्नीरस्था नाय परमसीम्ने इत्यर्थः॥ श्रीरामं परमार्थरूपेण प्रणमति यदेकं वेदांतेषु प्रसिद्धं तत्वं तत्प्रपद्ये कथंभूतं विशुद्धस्यास्सा
नुभवश्च स एवमात्रास्वरूपं विशुद्धत्वे हेतुः॥ प्रशांतं॥ तत्रापि हेतुः॥ स्वतेजसा स्वस्वरूपप्रकाशेन ध्वस्ता गुणानां विविधा जाग्रद

श्री शुक उवाच॥ ॥ किंपुरुषे वर्षे भगवंतमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं तच्चरणसन्निकर्षाभिरतः परमभा
गवतो हनुमान् सह किंपुरुषैरविरतभक्तिरुपआस्ते॥ आर्ष्टिषेणेन सह गंधर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्क
थां समुपशृणोति स्वयं चेदं च गायति॥ आर्ष्टिषेण नामा गंधर्वप्रवरः तत्प्रभृतिभिः गंधर्वैः॥ ॥१॥ ॐ नमो भगवते
उत्तमश्लोकाय नम आर्यलक्षणशीलव्रतायनम उपशिक्षितात्मन उपासितलोकाय नमः॥ साधुवाद निकषणाय न
मो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नमः॥ ॥२॥ यत्तद्विशुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणव्यवस्थं॥ प्रत्यक्प्रशां
तं सुधियोपलंभनं ह्यनामरूपं निरहं प्रपद्ये॥ ॥३॥

ध्यवस्थायास्मिन्॥ अनुभवमात्रत्वे हेतुः॥ प्रत्यक्त्वं दृश्यादन्यत् तत्कुतः अनामरूपं॥ ननु वस्तुत एवंभूतस्यापि जीवस्योक्तसर्व वि
पर्ययो दृश्यते॥ तत्राह॥ निरहं॥ अहंकाराभावात् तथा वैपरीत्यमित्यर्थः॥ ननु श्रीरामस्य तद्रूपं नैवं प्रतीयते॥ तत्राह॥ सुधियापुंसा
उपलभ्यत इत्युपलंभनं॥ शुद्धचित्ते नैवोपलभ्यत इत्यर्थः॥ ३॥

व

वेंके१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीभा०पं०
९

कथं तर्हि दशरथपुत्रत्वं तत्राह॥ विष्णोर्मर्त्यावतारस्तु रक्षसो रावणस्य वधाय तस्य मनुष्यादन्यतोऽवध्यत्वात्॥ न केवलमेतावत् किं तु
इह संसारे स्त्रीसंगादिकृतं दुःखं दुर्वारमिति मर्त्यानां शिक्षणार्थं वशिष्ठार्थमपीत्यर्थः॥ अन्यथा स्वे स्वरूपे रममाणस्य जगदात्मनः
सीताविरहकृतानि व्यसनानि इति कुतः स्युः॥ विषयासक्त्यभावे न व्यसनानर्हत्वमुपपादयति॥ न वै स भगवान् त्रिलोक्यां क्वापि सक्तः॥
यतः आत्मवतां धीराणामात्मा सुहृत्तमश्च अतो न स्त्रीकृतं मोहं प्राप्नुयात्॥ न लक्ष्मणं चेति॥ देवदूतेन श्रीरामं मंत्रयता विज्ञापितं अत्रागतस्य
यो वध्य इति॥ तदेव द्वारि स्थितं लक्ष्मणं दुर्वाससमागतं विज्ञापितुं प्रविष्टं हंतुमुद्यतो वशिष्ठवाक्यात्॥ तत्याज॥ तच्च न युज्यते॥ अतः श्रीराम ६०
मर्त्यावतारास्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः॥ कुतोन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानी
श्वरस्य॥४॥ न वै स आत्मात्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान्वासुदेवः॥ न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं
चापि विहातुमर्हति॥५॥ न जन्म नूनं महतो न सौभगं न वाक् न बुद्धिर्नाकृतिस्तोषहेतुः। तैर्यद्विसृष्टानपि नो वनौकस
श्चकार सख्ये बत लक्ष्मणाग्रजः॥६॥ सुरोसुरो वाप्यथवा नरोनरः सर्वात्मना यः सुकृतज्ञमुत्तमं॥ भजेत रामं मनुजाकृतिं हरिं
य उत्तराननयत्कोशलान् दिवम्॥७॥ ॥
एवं सर्वैः सेव्य इति वक्तुं न तस्य तत्तोषहेतुः सत्कुलजन्मादिः किं तु भक्तिरेवेत्याह॥ न जन्मेति॥ महतः पुरुषाज्जन्म महतः श्रीरामस्येति वा॥
सौभगं सौंदर्यं॥ आकृतिर्जातिः॥ यस्मात्तैर्जन्मादिभिर्विसृष्टान् अल्पकानपि नो वनचरान् सख्ये चक्रे अहो लक्ष्मणस्याग्रजोपि सखित्वे कृ
तवान्॥ बत अहो लक्ष्मणस्याग्रजोपि सखित्वे कृतवान्॥ अतो न तस्य तोषहेतुः॥ सत्कुलजन्मादि किं तु भक्तिरेवेत्यर्थः॥ तस्मात्सुरो
वान्यो वा यः कोपि श्रीराममेव सर्वप्रकारेण भजेत्॥ सुकृतज्ञं अल्पीयस्यपि भजने बहु मानिनं॥ उत्तरान् कोशलान् अयोध्यानिवासिन ॥७॥

उपचितैर्धर्मादिभिरात्मोपलभ्यते येन तत्तपश्चरति॥ तत्र उपशमः इंद्रियाणां संयमः। उपरमो निरहंकारता। आत्मवतामनुग्रहाय अनात्मा
र्थं ईश्वरत्वात्॥ भगवदनुभाव उपवर्ण्यते येन पंचरात्रेण तत्सावर्णेर्मनोः॥ उपसरति सेवते। उपरतानात्म्याय निरहंकाराय असक्ता
श्चासौ विविक्तश्च साक्षी च तस्मै नमः॥ असक्तत्वं दर्शयति॥ अस्य विश्वस्य सर्गादिषु कर्त्रापि यो न बध्यते अहं कर्त्रेति न मन्यते॥ विवि
क्तत्वमाह॥ देहगतोपि दैहिकैः क्षुत्पिपासादिभिर्यो न हन्यते नाभिभूयते॥ साक्षित्वमाह॥ यस्य दृक् अपि सतो दृष्टिर्गुणैर्दृश्यैर्न दूष्यते॥
भारतेपि वर्षे भगवान्नरनारायणाख्य आकल्पांतमुपचित धर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभनमनुग्रहायात्मवतामनु
कंपया तपोऽव्यक्तगतिश्चरति॥ तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावो
पवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति॥ इदं चाभिगृणाति॥ ॐ नमो भगवते उपशमशीलायोपरतानात्म्या
य नमोकिंचनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगुरवे आत्मारामाधिपतये नमो नम इति॥ गायति चेदं॥ कर्तास्य
सर्गादिषु यो न बध्यते न हन्यते देहगतोपि दैहिकैः॥ द्रष्टुर्न दृ[illegible] यस्य गुणैर्विदूष्यते तस्मै नमोसक्तविविक्तसाक्षिणे॥ ११॥ इदं हि योगे
श्वरयोगनैपुणं हिरण्यगर्भो भगवान् जगाद यत्॥ यदंतकाले त्वयि निर्गुणे मनो भक्त्या दधीतोज्झितदुष्कलेवरः॥ १२॥

न विक्रियते॥ योगकौशलं निरूपयन्योगं प्रार्थयते॥ इदमिति त्रिभिः॥ हे योगेश्वर हिरण्यगर्भो यद्योगनैपुण्यं जगाद इदमेव तत्॥ किं त
न्मप्रश्नीते भक्त्या अंतकाले पुमांस्त्वयि मनो धारयेदिति यत्॥ कथंभूतः सन् उज्झितं दुष्कलेवरं तदभिमानो येन॥ १३॥ ॥ ॥

॥छ॥ ॥श्री॥ ॥कृष्ण॥ ॥

भा०पं
६१

अन्यधातस्यशास्त्राभ्यासादिश्रमो व्यर्थ इत्याह॥ ऐहिकामुष्मिककामेषु लंपटो मूर्खः सुतादिषु योगक्षेमं विचिंतयन् कुत्सितस्य कलेवरस्या
त्ययात् भ्रंशो संकेतत तथा विद्वानपि ...स्य संकेततस्य धन श्रम एव॥ यस्मादिदं दुष्पोचीवमेवदशातन् तस्मात् हे प्रभो अधोक्षज त्वमेव नो

यथैहिकामुष्मिककामलंपटः सुतेषु दारेषु धनेषु चिंतयन्॥ न वेद विद्वान् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलं॥ ११॥
तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्मायया हं ममतामधोक्षज। भिंद्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावमि
ति॥ १२॥ भारतेप्यस्मिन्वर्षे सरिच्छैलाः संति बहवः॥ मलयो मंगलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगि ६१
रिः ऋष्यमूकः श्रीशैलो वेंकटो महेंद्रो वारिधारो विंध्यः शुक्तिमान् ऋक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्धनो रैवतकः कुकु
भो नीलको गोकामुख इंद्रनीलः कामगिरिरिति चान्ये च शतशः सहस्रशः शैलास्तेषां नितंबप्रभवा नदा नद्यश्च संत्यसंख्या
ताः॥ एतासामपो भारत्यः प्रजा नामभिरेव पुनंतीनामात्मना चोपस्पृशंति॥ १३॥ चंद्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहा
यसी कावेरी वेणा पयस्विनी शर्करावर्ता तुंगभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा सुरसा नर्मदा च
र्मण्वती सिंधुः॥ अंधः शोणश्च नदौ महानदी देवनदी वेदस्मृति ऋ काश्यपी ऋषिकुल्या त्रिसामा कौशिकी मंदाकिनी यमुना सरयू
सरस्वती दृषद्वती गोमती साभ्रमती वदेती भद्रा सरयू रोधस्वती सप्तवती महेंद्री सुषोमा शतद्रू चंद्रभागा मरु
द्वृधा वितस्ता असिक्नी विश्वेति महानद्यः॥ १४॥ ॥
योगं विधेहि॥ कीदृशं त्वयि स्वभावं सहजवासनारूपं॥ येन योगेन वयं त्वन्मायया नष्टकुकलेवरे आर्पितामहं ममतां शीघ्रं भिंद्याम त्यजेम॥ सुदु
र्भिदां॥ उपायान्तरैः सर्वथा त्यक्तुमशक्यां॥ इत्याह तद्वदस्मिन्नपि वर्षे सरितः शैलाश्च संति॥ नितंबप्रभवाः तटेभ्यः संभूताः॥ आत्मना चदेहेन

॥१३॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लब्धं जन्म येस्तैः पुरुषैः सात्विकादिस्वकृतेतत्कर्मणा दिव्यादिगतय आत्मनो विधीयंते। हि यस्मात्सर्वा एव गतयः कर्मानुसारेण सर्वेषां न भवंति॥ यस्य वर्णस्य यद्विधानं मोक्षप्रकारः संन्यासवनस्थत्वादि तदन तिक्रमेणास्मिन्नेव वर्षे नृणामपवर्गश्च भवति॥ एतच्च कर्मादिरूपसाधनासंभवान्निप्रायेणोक्तं॥ न त्वन्यत्रापवर्गो भावेन। तदुपर्यपि विवादरायणः संभवादिति देवानामपि मोक्ष स्यस्वीकृतत्वात्॥ अपवर्गस्वरूपमाह॥ योसाविति॥ अनात्म्ये आत्मनिभिन्न भात्म्यं रागादि तद्रहिते अनिरुक्ते वाचामगोचरे। अ
अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्लकलोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयंते॥ १४॥ यथावर्णं विधानमपवर्गश्चापि भवति॥ योऽसौ सर्वभूतात्मन्यनात्म्येनिरुक्तेनिलयने परमात्मनि वासुदेवेनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रंथिरंधनद्वारेण यदा हि महापुरुषपुरुषप्रसंगः॥ एतदेव हि देवा गायंति॥ १५॥ अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः॥ यैर्जन्म लब्धं नृषु भारते अजिरे मुकुंदसेवोपयिकं स्पृहा हि नः॥ १६॥
निलयने अनाधारे अनन्यनिमित्तो हैतुको भक्तियोग एव लक्षणं स्वरूपं यस्य। कथं भवति नानागतीनां निमित्तं यो विद्याग्रंथिः तस्यारंधनं छेदनं तद्द्वारेण पुरुषपुरुषविष्णुभक्तः तैः प्रकृष्टः संयोगो यदा भवति तदा। एतदेव मानुष्यमेव सर्वपुरुषार्थसाधनं गायंति॥ अमीषां नृणां अतास्विदथवा स्वयमेव साधनं विनैव हरिरेषां प्रसन्नो भूत एवंभूतस्य पुण्यस्य उत्कर्षत्वात्॥
भारताजिरे भारतांगणेन केवलं स्पृहैव यत्र तन्मुकुंदसेवोपयोगि नृषु जन्म यैर्लब्धं॥ १६॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्यहामेवाह॥ किमित्यादिसप्तभिः॥ दुष्करैः क्रत्वादिभिर्न्नैः फल्गुनातुच्छेन घुजंजेन स्वर्गप्राप्त्या किं। नाकं किं फलं॥ कुतः यत्र ना
रायणपादपंकजस्मृतिर्न्नास्ति। प्रस्तुतातिशयितादिंद्रियाणां उत्सवाद्भोगात् विक्षोभ स्मृतिः प्रमुष्टाभूत्॥ क्षणमल्पमेवायुर्येषां॥
वरत्वे हेतुः॥ मर्त्येनापि देहेन क्षणेनैव कालेन कृतं कर्म सन्यस्य हरेः पदं सम्पद्यंति॥ यतः यत्र वैकुंठ कथामृतं न द्योनसंति॥ तदाश्रयाः

किं दुष्करैर्न्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा घुजयेन फल्गुना॥ न यत्र नारायणपादपंकजस्मृतिः प्रमुष्टातिशयेंद्रियोत्सवात्॥
कल्पायुषां स्थानजयात्पुनर्भवात् क्षणायुषां भारतभूजयो वरं॥ क्षणेन मर्त्येन कृतं मनस्विनः सन्यस्य संयात्यभयं पदं हरेः॥ ॥ ६२
॥२२॥ न यत्र वैकुंठकथासुधापगा न साधवो भागवतास्तदाश्रयाः॥ न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोपि न वै स सेव्य
तां॥२३॥ प्राप्ता नृजातिं त्विह ये च जंतवो ज्ञानक्रियाद्रव्यकलापसंभृतां॥ न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यांति बंधनं॥

कथाय माश्रमाः॥ महांतो न हि साधुत्सवाये षुतादृशा यज्ञेशस्य मखाश्च पूजाः स सुरेशस्य ब्रह्मणोपि लोकोनुसेव्यतां॥ अमुमुदत्ते
न्नात्रिं दंति प्राप्ता इति॥ ज्ञानं च दर्थाः क्रियाश्च तदर्था निद्रव्याणि च तेषां कलापेन संभृतां पूर्णाम् अपुनर्भवाय मोक्षाय वनौका इव॥ वनौकाः सः
पाक्षिणो यथा लुब्धकान्मुक्ता अपि पुनर्यदि तस्मिन्नेव वृक्षे प्रमत्ता विहरंति तर्हि यथा बध्यंते तद्वत्॥२३॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ते भारतवासिनो भाग्यमित्याहुः ॥ येरिति ॥ अग्नये जुष्टं निर्वपामि इंद्राय जुष्टं निर्वपामीत्येवं भागशो निरुक्तं पृथक्कृतं ॥ कथं विनाप्रकारे
वव सक्ततश्च पुरोडाशादिर्येदेन वरहष्टं देवतामुद्दिश्य फलकं निरुक्तं मम मेदमितिस्वीकृत्य त्यागानंतर मश्नातीत्यर्थः ॥ पृथगिंद्रा
नामाभिराहुतआशिषां प्रभुः स्वयं पूर्णोपिहरिः ॥ तत्रापि निष्कामाः कृतार्थी इत्याहुः ॥ सत्यमिति ॥ प्रार्थितः सन्न
र्थितं ददाती तिसत्यं ॥ तथापि परमार्थदो न भवत्येव ॥ यद्यस्मात्यतो दत्तादनंतरं पुनरप्यर्थिता भवति ॥ ननु नार्थितश्चेत् ॥ किमपि
ये ४ श्रद्धया वर्हिषि भिन्नभागशो हविर्निरुप्तमिष्टं विधिमंत्रवस्तुतः ॥ एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥
॥ २३ ॥ सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः ॥ स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवं ॥ २४ ॥
यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनं ॥ तेनाजनाभे स्मृतिमज्जन्म नः स्याद्वर्षे हरिर्यद्भजतां शं तनोति ॥
॥ २५ ॥ श्रीशुक उवाच ॥ ॥ जंबूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपादिशंति ॥ सगरात्मजैरश्वान्वेषण इमां महीं परितो निखन
द्भिरुपकल्पितांस्तद्यथा ॥ स्वर्णप्रस्थश्चंद्रशुक्ल आवर्तनो रमणको मंदरहरिणः पांचजन्यः सिंहलो लंकेति एवं भारतोत्तम
जंबूद्वीपवर्षविभागो यथोपदेशमुपवर्णितः ॥ २६ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे जंबूद्वीपानुवर्णने एकोनविं ॥ १९ ॥ ॥
शोध्यायः ॥
न ददातीत्याशंक्याह ॥ अनिच्छतां निष्कामानां इच्छानां पिधानमाच्छादकं सर्वकामपरिपूरकं निजपादपल्लवं स्वयमेव संपादयति ॥
स्विष्टस्य सम्यग्यजनस्य सूक्तस्य प्रवचनस्य कृतस्य अन्यस्यापि कर्मणः स्वर्गसुखादुपभुक्तादवशेषितं यदि किंचिदस्ति तेनाजनाभे
वर्षे नोस्माकं जन्म स्यात् कीदृशं स्मृतिमत् हरिरेव सेव्य इत्यनुसंधानयुक्तं ॥ यतः हरिः भजतां सुखं तनोति ॥ इति पंचमे एकोन १९
॥ विंशः ॥
॥ श्रीकृष्ण ॥ ॥ छ ॥ ॥

धेतो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विशेषक्षादिषट्द्वीपस्थितिमाह सप्तहार्ध्यैवैः ॥ लोकालोकस्थितिं चांतर्बहिर्भागादिमानितः ॥ १ ॥ तावतालक्षावेस्तारेणपरिक्षि
प्तः परिवेष्टितः ॥ उपास्तेतिष्ठति ॥ आकलय्यसमर्प्य ॥ अभिज्ञाताः प्रसिद्धास्तत्रैव अन्येव पर्वतानद्यश्चसहस्रशः ॥ संतीत्यर्थः
श्रदिरुवा ॥ अतः परं प्लक्षादीनां प्रमाणं लक्षणं संस्थानतो वर्षविभागउपवर्ण्यते ॥ जंबूद्वीपोयंयावत्प्रमाणविस्तारस्ता
वताक्षारोदधिना परिवेष्टितो यथामेरुर्जैत्वाख्येन ॥ लवणोदधिरपि ततोद्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तोयथाप ६२
रिखावासोपवनेनप्लक्षोजंबूप्रमाण ॥ णोद्वीपाख्याकरो हिरण्मयउत्थितोयत्राग्निरूपास्तेसप्तजिह्वस्तस्याधिपतिः प्रियव्र
तात्मज इध्मजिह्वस्तं द्वीपं सप्तवर्षाणि विभज्यसप्तवर्षनामभ्य आत्मजेभ्य आकलय्यस्वयमात्मयोगेनोपरराम ॥ शि
वं यवसं सुभद्रं शांतं क्षेमममृतमभयमितिवर्षाणि तेषु गिरयोनद्यश्च सप्तैवाभिज्ञाताः ॥ मणिकूटो वज्रकूट इंद्रसेनोज्यो
तिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति मेरुशैला ॥ अरुणनृम्णांगिरसी सावित्री सुप्रभाता ऋतंभरा सत्यंभरेति महा
नद्यः ॥ यासांजलोपस्पर्शनविधूतरजस्तम ॥ ३ ॥ सोहंसपतंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारोवर्णाः सहस्राजुषोविबुधोपम
संदर्शनप्रजननाः स्वर्गद्वारं त्रय्याविद्यया भगवंतं त्रयीमयं सूर्यमात्मानं यजंते ॥ ॥ ॥
दि
मानसोत्तरस्यमंडलाकारत्वोक्तोरेते प्लक्षादिपंचद्वीपेषुवर्षाद्यं [illegible] स्तिर्यग्रेखाकाराउभयरतो द्विस्थइतिगम्यते ॥ अथास प्ल
क्षसप्तवर्षादिमार्गासंभवाद्य वैष्णवे वर्षाणां पूर्वादिक्रमोक्तेश्च ॥ जलोपस्पर्शनेनविधूतं रजस्तमश्च येषां ॥ हंसादयोब्राह्मणा
दिस्थानीयाः ॥ विबुधोपमं संदर्शनं क्लमस्वेदादिरहितं रूपं प्रजननमपत्योत्पादनं च येषां ॥ ॥ ॥ श्रीः ॥ ॥ छ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विभी ता अपि द्वीपमंत्राव्याख्यायंतो प्रत्नस्य पुराणपुरुषस्य विष्णोर्यद्रूपं। तं सूर्यमीमहि शरणं व्रजेम॥ सत्यादीनां आत्मानमधिष्ठातारं
त अस्तंपत्र अनुष्ठीयमनोधर्मः॥ अनंतममीयमानो धर्मः॥ ब्रह्मणः तद्योधकस्य वेदस्य॥ अमृतस्य शुभफलस्य॥ मृत्योरशुभफलस्य॥ सुपर्णोसि
अन्नस्य विष्णोरूपं वसत्यस्य ब्रह्मणः॥ अमृतस्य च मृत्यो श्च सूर्यमात्मानमेमीहीति। ।५। ईड्या दिषु पंचसु पुरुषाणामायुरिंद्रियमोजः
सहो बलं बुद्धि विक्रम इति वसर्वेषामोत्पत्तिकी सिद्धिरिति शेषेण वर्त्तते॥ अनंतस्य समानेन क्षीर सोदेनावृतो यथा तथा द्वीपो विशा
लम्लीद्विगुण विशालः समानेन सुरोदेनावृतः। परितं को यत्र हवै शाल्मली प्लक्षायामोयस्यांवा किलनिलय माहुर्भगव
तश्छंदस्तुतः पतत्रिराजस्यसा॥ द्वीपहूतयेउपलक्षते॥ ।६। तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्ना
मानि सप्त वर्षाणि व्यभजत्। सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रं आप्यायनम विज्ञातमिति। ।७। तेषु वर्षाद्रयो नद्यश्च
सप्तैवाभिज्ञाताः॥ स्वरसः सतश्रृंगो वामदेवः कुंदः कुमुदः पुष्पवर्षः सहस्रश्रुतिरिति। अनुमतिः सिनीवाली सरस्वती कुहूरज
नी नंदा राकेति॥ तद्वर्षपुरुषाः श्रुतधर वीर्यधर वसुंधरेषंधरसंज्ञा४ भगवंतं देवमयं सोममात्मानं वेदेन यजंते। ।८। स्व
गोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः प्रजानां सर्वासां राजांधः सोमन अस्त्विति॥ ।९। ॥

गरुत्मांस्त्रिवृत्ते शारइत्यादिश्रुतेः॥ छंदोभिः स्तावयन्मूर्तेः श्रीविष्णुं स्तौति तेती छंदस्तुतस्य॥ द्वीपस्य हूतये व्यपदेशाय॥ स्वगोभिः स्वरश्मिभिः
अंधः अन्नं सोमो नो राजा अस्तु। अस्मा अस्मा निमुख्येन भवतु। कस्य पाठे त्वविवक्षया संध्यभावः। ।९। ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं सुरोदाद्बहिर्घृतोदेनावृतः कुशद्वीप इत्यन्वयः ॥ स्वच्छाग्राणि सुकोमलशिखास्तेषां रोचिषा ॥ हे जातवेदः त्वं साक्षात्परस्य ब्र
ह्मणो हव्यवाडसि ॥ अतो देवानां यज्ञेन पुरुषं हरिमेव यज ॥ अंगानां नाम्नादत्तमंगिने समर्पयेत्यर्थः ॥ उपक्लिप्तो वेष्टितः ॥ यथा कुशद्वी
एवं सुरोदाद्बहिस्तद्द्विगुणेन समानेनावृतो घृतोदेन यथापूर्वः कुशद्वीपो यस्मिन् कुशस्तंबो देवकृतस्तद्द्वीपाख्यापनो ज्वलन
इवापरः स्वशष्परोचिषा दिशो विराजयति ॥ ११ ॥ तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो य
थाभागं विभज्य स्वयं तु तपसि आस्थितः वसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तनामदेवनामभ्यः ॥ तेषां वर्षेषु सीमागि
रयो नद्यश्चाभिज्ञाताः सप्तैव चक्रश्चतुःशृंगः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति रसकुल्या मधुकुल्या मि
त्रविंदा श्रुतविंदा देवगर्भा घृतच्युता मंत्रमालेति ॥ यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञाः ॥
भगवंतं जातवेदसरूपिणं कर्मकौशलेन यजंते ॥ परस्य ब्रह्मणः साक्षात् जातवेदोसि हव्यवाड् ॥ देवानां पुरुषांगानां यज्ञेन
पुरुषं यजेति ॥ १२ ॥ तथा बहिः क्रौंचद्वीपो द्विगुणः समानेन क्षीरोदेन परित उपक्लिप्तो वृतो यथा कुशद्वीपो घृतोदेन ॥ १३ ॥ यस्मि
न् क्रौंचो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते ॥ योसौ गुहप्रहरणोन्मथितनितंबकुंजोपि क्षीरोदेनासिच्यमानो भगवता
वरुणेनाभिगुप्तो विभयं बकार ॥ १४ ॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपवर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त पुत्र
रुक्थादान् वर्षपान्निवेश्य स्वयं भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविंदमुपजगाम ॥ १५ ॥ आमो मधुरुहो मेघ
पृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुताः तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः ॥ शुक्लो वर्धमानो भोजन
पो घृतोदेनावृतः ॥ गुहस्य कार्तिकेयस्य प्रहरणेनायुधेनोन्मथिताः नितंबाः कुंजाश्च यस्य ॥ स्वयं भगवान् ज्ञानी परमकल्याणं यशो यस्य ॥

अपोमयं अमयं॥ हे आपः पुरुषवीर्याः ईश्वराल्लब्धसामर्थ्याः स्थ भवथ॥ अत एव भूर्भुवःस्वस्त्रैलोक्यं पुनंतस्ता भवत्यो मे नोस्माकं
अमया अमृतौ वा आर्द्रकातीर्थवत्पुनाती पवित्रवती शुक्लेतियासां मंत्रः पवित्रममलसकलं युंजाना पुरुं ऋषभमंद्रद्रविणदेव
कसंज्ञा वर्षपुरुषाः आपोमयं देवं [illegible] पूर्णेनांजलिना यजंते॥ आपः पुरुषवीर्याः स्थ पुनंती भूर्भुवः सुवः॥ तानः पुनंत्व
मीवघ्नीः स्पृशतामात्मना भुव इति॥ ॥१७॥ एवं पुरस्तात् क्षीरोदात् परित उपवेशितः॥ शाकद्वीपो द्वात्रिंशल्लक्षयोजनायाम
समानेन दधिमंडोदेन परीतः॥ ॥१८॥ यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह महासुरभिगंधः स्वं द्वीपमनुवा
सयति॥ ॥१९॥ तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मे[धा]तिथिः सो विभज्य सप्तवर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजव
मनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनंत आवेशितमतिस्त
पोवनं प्रविवेश॥ ॥२०॥ एतेषां वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव ईशान उरुशृंगो बलभद्रः शतकेसरः सहस्रस्रोतो दे
वपालो महानस इति नंद्या आयुर्दा उभयस्पृष्टिरपराजिता पंचपदी सहस्रश्रुतिर्निजधृतिरिति॥ तद्वर्षेषु पुरुषाः॥
ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवंतं वाय्वात्मकं प्राणायामविधुतरजस्तमसः परमसमाधिना यजंते॥ ॥२१॥
स्पृशतां स्पर्शनं कुर्वतां भुवः शरीराणि पुनंतु यत आत्मना स्वरूपेणैव अमीवघ्नीः पापहंत्र्यः॥ दध्नो मंडरसः स एवोदकं यस्य॥
पर्णान्यंतः खरस्पर्शानि [illegible] शाको नाम वृक्षः॥ ॥२१॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीभा॰ ५१

आत्मकेतुभिः प्राणादिदृष्टिभिः॥ ज्वलनशिखावदमलानां कनकपत्राणामयुतानामयुतानि यस्य तत्॥ देवानामहोरात्राभ्यां उत्तर दक्षिणायनाभ्यामित्यर्थः॥ ब्रह्मरूपिणं कमलासनमूर्त्तिं॥ सकर्मकेन ब्रह्मसालोक्यादि साधनेन॥ कर्म्ममयं कर्म्मफलरूपं॥ ब्रह्मलिं

अंतःप्रविश्य भूतानियो विभर्त्यात्मकेतुभिः॥ अंतर्यामीश्वरः साक्षात् पातु नो यद्वशे स्फुटं॥२२॥ एवमेव दधिमंडोदात् परतः पुष्कर द्वीपस्ततो द्विगुणायामः समंतत उपकल्पितः॥ समानेन स्वादूदकसमुद्रेण बहिरावृतो यस्मिन् बृहत्पुष्करं ज्वलनशिखामल कनकपत्रायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितं॥ २३॥ तद्द्वीपमध्ये मानसोत्तरो नामैक एवार्वाचीन पराचीन वर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो॥ यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिंद्रादीनां यदुपरिष्टात्सूर्यरथ

देवाना॥४

स्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति॥ २४॥ तद्द्वीपस्याप्यधिपतिः प्रैयव्रतो वीतिहोत्रो नाम तस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद्भगवत्कर्म्मशील एवास्ते॥ २५॥ तद्वर्षपुरुषा भगवंतं ब्रह्मरूपिणमकर्म्मकेनक र्म्मणाराधयंतीदं चोदाहरंति॥ २६॥ यत्तत्कर्ममयं लिंगं ब्रह्मलिंगं जनोर्चयेत्॥ एकांतमद्वयं शांतं तस्मै भगवते नम इति॥ २७॥ अविरतं॥ ततः परस्ताल्लोकालोक नामाचलो लोकालोकयोरंतराले परित उपक्षिप्तः॥ २८॥ ॥

स्यते यस्मीत्॥ एकास्मिन्नेव परमेश्वरेऽनंतो निष्ठा यस्य तत्॥ अत एव वस्तुतोऽद्वैतं॥ ततश्च शुद्धोदात्परस्तात्॥ लोकश्च सूर्याद्यालोकवान्देशः॥ अलोकः तद्रहितः तयोरंतराले मध्ये तयोर्विभागार्थमित्यर्थः॥ २८॥

६५

३ नमावन्त्र

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प२

ततः परस्तादित्युक्तं॥ तदेव कियदंतरेणेत्यपेक्षायां तदंतवर्त्तिनीं भूमिमाह॥ यावन्मानसोत्तरमेर्वोरंतरं सार्द्धसप्तलक्षोत्तरसार्द्धकोटि
परिमितं॥ तावती भूः॥ शुद्धोदात्परतोस्ति तत्र च प्राणिनो निवसंति॥ ततश्च कांचनी भूमिरन्यास्तीत्यर्थः॥ सा चैकोनचत्वारिंशल्ल
क्षोत्तरकोट्यष्टक परिमिता ज्ञेया॥ एवं हि सति मेरुलोकालोकयोरंतरं सार्द्धद्वादशकोटिपरिमितं वक्ष्यमाणमुपपन्नं भवति॥ एतदेव शैवतं
त्रे प्रोक्तं॥ कोटिद्वयं त्रिपंचाशल्लक्षाणि च ततः परं॥ पंचाशच्च सहस्राणि सप्तद्वीपाःससागराः॥ ततो हेममयी भूमिर्दशकोट्यो वरानने॥ दे
यावन्मानसोत्तरमेर्वोरंतरं तावती भूमिः॥ कांचन्या दर्शतलोपमा॥ यस्यां प्रहितः पदार्थो न कश्चित्पुनः प्रत्युपलभ्यते॥ तस्मात्सर्व
सत्वपरिहृतासीत्॥ २८॥ लोकालोक इति समाख्यायदनेनाचलेन लोकालोकौ तर्वर्त्तिनाव्यवस्थाप्येते॥ स लोकत्रयांते परित ईश्वरे
णविहितो यस्मात्सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनांस्त्रीन् लोकानाबितन्वाना न कदाचित्पराचीना भवितुमुत्स
हंते तावदुन्नाहायामः॥ एतावांल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिंतितः कविभिः स तु पंचाशत्कोटिगुणितस्य भूगोलस्य
तुरीयभागोऽयं लोकालोकाचलः॥ ॥०॥ २८॥ ॥

सर्वसत्वपरिहृतेति देवव्यतिरेकेणेति ज्ञेयं
वानां क्रीडनार्थायलोकालोकस्ततः परश्चेति अत्र च दशकोटित्वं पूर्वोक्तं भूम्यासह द्रष्टव्यं॥ सूर्य आदिर्येषां ध्रुवोपवर्गा
देवानां क्रीडनार्थायेत्युक्तत्वात्॥ लोकत्रयस्यांते परितो मर्यादारूपो विहितः॥ यस्मात् प्रतिबंधकात्॥ सूर्य आदिर्येषां ध्रुवोपवर्गा
तायेषां॥ आबितन्वानाः समंतात्प्रकाशयंत्यः परतो गंतुं न शक्नुवंति॥ तावदुन्नाह उत्सेधः तदनुरूप आयामश्च विस्तारो यस्य॥ ध्रुवाद
प्युच्छ्रितवान्॥ त्रिलोकीमर्यादाभूत इत्यर्थः॥ सोयं तु लोका लोकाचलः तुरीयभागश्चतुर्थांशः॥ सार्द्धद्वादशकोट्यो मेरोरेकतरति द्रष्टव्यं॥
२९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भा॰ ६६ आशासु दिक्षु ये अधिनिवेशितास्ते॥ आसते॥ तेषां दिग्गजानां स्वविभूतीनां स्वांशभूतानां महेन्द्रादीनां च विविधवीर्योपबृंहणाय
सकललोकस्वस्तये च भगवान् तस्मिन्नास्ते इत्यन्वयः॥ किं कुर्वन्॥ आत्मनः स्वस्य यद्विशुद्धं सत्वं तत्सं धारयमाणः आविष्
कुर्वन्॥ कीदृशं॥ धर्मज्ञानादीन्यष्टमहासिद्धयश्चोपलक्षणं यस्य तत् दोर्दण्डैस्तदुपलक्षितः सन् महाविभूतेः परमैश्वर्यस्य पतित्वा॥
दिवत्तैरेव मूर्त्या समंतादास्ते न च अंतर्यामिणां तत्स्थैर्नैव सर्वकर्तृं शक्यं॥ किं तस्य बहिः समंतादवदवस्थाने नेत्याशंक्य तस्यार्थं स्वजमेव
तदुपरिष्टात् ततस्रष्टा शास्वात्मयोनिनाखिलजगद्गुरुणा विनिवेशिताः ये द्विरदपतयः॥ ऋषभः पुष्करचूडो वामनोऽपरा ६६
जित इति सकललोकस्थितिहेतवः तेषां स्व विभूतीनां लोकपालानां विविधवीर्योपबृंहणाय भगवान् परममहापुरुषो
ततिः ३ महाविभूतिरन्तर्याम्यात्मनो विशुद्धसत्वं धर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिश्च पार्षदप्रवरैः परि
वारितो निजवरायुधोपशोभितैर्भुजदण्डैः संधारयमाणस्तस्मिन् गिरिवरे समंतात् सकललोकस्वस्तय आस्ते॥३॥ आकल्प
मेवं वेषं गत एष आत्मयोगमायया विरचितविविधलोकयात्रागोपीथायेत्यर्थः तद्विस्तारः एतेन स्वलोकपरिमाणं च व्याख्या
तं यद्बहिर्लोकालोकाचलात् ततः परस्तात् योगेश्वरगतिं विशुद्धामुदाहरन्ति॥ ॥
वेषं॥ आत्मनो योगमायया विरचिताया विविधाया लोकयात्रायास्तस्या गोपीथाय रक्षणाय एवं भगवानेवंभूतं आकल्पं
अन्तः लीलया प्राप्त इति समंतादास्त इत्यस्यार्थः॥ त्रैलोकपरिमाणं च मेरोरेकतः सार्द्धद्वादशकोटयः॥ ततो लोका
लोकात् त्रैलोक्यात् परस्तात्॥ विशुद्धिं द्विजपुत्रानयने अर्जुनस्य श्री ... प्रदर्शिता॥ ॥

र्णनंनाम विं
ध्यायः ॥ श्री
॥ शुक ॥

विस्तारेणोक्तं ब्रह्मांडमानं सर्वतो विनिरूपयंति ॥ अंडमध्यगतः किं तन्मध्यं तदाह ॥ द्यावाभूम्योः भूगोलतरकपालयोर्यदंतरं मध्यस्थ
नं । सर्वतः पंचविंशति कोट्यः अंडमध्याख्यस्थाने कारणं तन्नाम ॥ निर्वचनेनाह ॥ मृतअंडे चेतने एष सूर्यो वैराजरूपेण यस्मात्
विष्टः ॥ किंच ॥ सूर्येणैव विभज्यंते दिशः । खमंतरिक्षं ॥ भिदा अन्योन्यविभागः स्वर्गापवर्गौ भोगमोक्षदेशौ ॥ रसौकांसि ॥ अ
अंडमध्यगतः सूर्यो [illegible]भूम्योर्यदंतरं ॥ सूर्यांडगोलयोर्मध्ये कोट्यः स्युः पंचविंशतिः ॥ मृतेंडे एष एतस्मिन् यदभूत्ततो मार्तंड इ
ति व्यपदेशः हिरण्यगर्भ इति यद्धिरण्यांडसमुद्भवः ॥ ३१ ॥ सूर्येण हि विभज्यंते दिशः खं द्यौर्मही भिदा । स्वर्गापवर्गौ नरका रसौकांसि च
सर्वशः ॥ ३२ ॥ देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधां ॥ सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥ ३३ ॥ इति श्रीभागवते
महापुराणे पंचम[illegible]स्कंधे भूगोलसंस्थे एतावानेव भूवलयस्य संनिवेशः प्रमाणलक्षणतो व्याख्यातः ॥ एतेन हि दिवो मं
डलमानं तद्विद उपदिशंति यथा द्विदलयोः निष्पावादीनां ते अंतरेणांतरिक्षं तदुभयसंधितं ॥ ॥

तलादीनि । उपासनार्थमाह ॥ देवादीनां सूर्य आत्मा दृगीश्वरः नेत्राधिष्ठाता च ॥ इति पंचमे विंशोऽध्यायः ॥ २० ॥ एवमध्यायविंश
त्या भूमर्यादा निरूपिता । अतः परं द्युमर्यादापालनं निरूप्यते ॥ १ ॥ एकविंशे रवेः कालचक्रेण भ्रमतोऽन्वहं ॥ स्वगत्या राशिसंचारै
र्लोकयात्रानिरूपणं ॥ एतावान् विस्तारेण कोट्यः पंचाशत् उत्सेधेन पंचविंशतिः द्विदलयोर्मध्ये यथैकस्य मानेनापरस्य मान
मुपदिशंति तद्वत् ॥ तत्र अंतरेण तयोर्मध्ये तदुभयसंधितं ताभ्यामुभयतः संलग्नं ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ज्यो॰ पं॰ उदगयनादिसंज्ञाभिर्मदत्तिग्रसमगतिभिर्यथाकालमारोहणादिस्थानेष्वारोहणाद्यभिपद्यमानोमकरादिष्वहोरात्राणिदीर्घ
६७ ह्रस्वसमानानिविधत्ते॥ तत्स्वरूपं वयतियदेति॥ अत्रत्वंत वैषम्याभावात्समानेत्युक्तं॥ सर्वथा साम्यंन्त्वेकस्यैवाहोरात्रस्याय

यन्मध्यगतोभगवांस्तपतांपतिस्तपन् आतपेनत्रिलोकींप्रतपत्युवभासयत्यात्मभासा॥ ॥१॥ सएषउदगयनदक्षि
णायनवैषुवतसंज्ञाभिर्मांद्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणासमस्थानेषुमासिमासिमन्देरसमानाभिर्गति ६७
भिर्यथासवनमभिपद्यमानोमकरादिष्वहोरात्राणिदीर्घह्रस्वसमानानिविधत्ते॥ ॥२॥ यदामेषतुलयोःवर्त्तते
तदाहोरात्राणिसमानानिभवंति॥ यदावृषभादिषुपंचसुराशिषुचरति॥ तदाहान्येववर्द्धंतेह्रसंतिचमासिमास्येकैके
कघटिकारात्रिषुयदावृश्चिकादिपंचसुवर्त्ततेतदाहोरात्राणिविपर्ययेणभवंति॥ ॥ ॥॥

द्यभिर्वृषभमिथुनयोरेवाज्ञांवृद्धिः४ कर्कटादिषुह्रासः४ तथापिरात्र्यपेक्षयाअधिकत्वाद्वर्द्धंत इत्युक्तं॥ एवंरात्रिवृद्धा
वपिदिनापेक्षया ह्रसंतीत्युक्तं॥ एकैकेतिस्थूलदृष्ट्योक्तं॥ वृद्धिह्रासयोःप्रतिमासंवैषम्यात्॥ विपर्ययाणीति अहानि
न्यूनारात्रयोधिकाइत्यर्थः॥ ॥ ॥॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नाल्पिकं वृश्चिकासकालमाह। यावदिति॥ एवंमंदादिगतिभिर्नवकोटयश्शतिमेरोरुभयतो मानसोत्तरस्यांतर्विस्तारेण पंचदशलक्षाधि
कककोटित्रयपरिमितेनेदंपरिमंडलमानमुन्नेयं॥ एवंपंचदशभिर्घटिकाभिरित्यादिष्वपित्रैराशिकगतितेनतत्तन्मानमुन्नेयं॥ अत्रा
पि किंचितोविशेषश्च पुराणांतरादवगंतव्यः॥ तत्रारोहणादिस्थानानिवायुपुराणेदर्शितानि॥ सर्वग्रहाणांत्रीण्येवस्थानानिद्विजसत्तमाः
स्थानंजरद्गवंमध्यंतथैरावतमुत्तरं॥ वैश्वानरंदक्षिणतोनिर्दिष्टमिहतत्त्वतश्शति॥ तदेव॥ दक्षिणोत्तरमध्यममार्गत्रयप्रत्येकंवीथीत्रये

यावद्दक्षिणायनंतावदहानिवर्धते॥ यावदुदगजनंरात्रयः॥ एवंनवकोट्यः एकपंचाशत् लक्षाणियोजनानांमानेसोत्तर
गिरिपरिवर्तिनस्योपदिशंति।॥१४॥ तस्मिन्नैंद्रीपुरीपूर्वस्मान्मेरोर्देवधानीनामदक्षिणतोयाम्यांसंयमनीनामपश्चाद्वार
णीनिम्लोचनीनामउत्तरतः सौम्यांविभावरीनाम॥ तासूदयमध्याह्नास्तमयनिशीथानीतिभूतानांप्रवृत्तिनिवृत्तिनिमि
त्तानिसमयविशेषणेनमेरोश्चातुर्दिशम्॥ ॥ १५॥

वी
ण त्रिधा विद्यतेत्रिभिस्त्रिभिर्विद्यते॥ त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथीगजवीथीऐरावतीचेत्युत्तरमार्गेवीथीत्रयं आर्षभीगोवीथीजारद्ग
वीचेति॥ वैषुवतेमध्यममार्गेवीथीत्रयं॥ अजवीथीमृगवीथीवैश्वानरीचेदंदक्षिणमार्गेवीथीत्रयंतदप्युक्तं॥ तत्रैव अश्विनीकृत्तिकायाम्या
म्यानागवीथीतिशब्दिता॥ रोहिण्यार्द्रामृगशिरोगजवीथ्यभिधीयते॥ पुष्याश्लेषातथादित्यावीथीचैरावतीस्मृता॥ एतास्तुवीथयस्ति
स्रउत्तरोमार्गउच्यते॥ ॥ ॥

वीथ्यो भरण्यौ पुनर्वसु

६९

तथा द्वेवादिफाल्गुन्यौ मघा चैवार्षभी मता॥ हस्ताश्चित्रा तथा स्वातिर्गोवीथीति च शब्दिता॥३॥ ज्येष्ठा विशाखानुराधा वीथी जार
द्गवी मता॥ एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते॥४॥ मूलाषाढोत्तराषाढा अजवीथ्यभिशब्दिता॥ श्रवणं च धनिष्ठा च
मार्गी शततभिषक् तथा॥५॥ वैश्वानरी भाद्रपदे रेवती चैव कीर्त्तिता॥ एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यत इति॥ या
म्या भरणी आदित्या अदितिदेवता का पुनर्वसु॥ मार्गी मृगवीथी॥ एवं स्थिते उत्तरायणे ध्रुवेणाकृष्टको ऽतिनिकृष्टवायु पाशाद्दया
कर्षणे रथस्यारोहणे तदाभ्यंतरमंडलप्रवेशो गतिमांद्यं चेति दिनवृद्धि रात्रिह्रासश्च दक्षिणायने च पाशप्रसारणात्॥ तदव
रोहणे बहिर्मंडलप्रवेशो गतिशैघ्र्यं चेत्यहोरात्रयो विपर्ययः॥ वैषुवतेषु पाशसाम्यात् समावस्थानेन मध्यममंडलप्रवेशो गति
साम्यं चेत्यहोरात्रयोः साम्यमिति॥ तथा च पुराणांतरे॥ आकृष्येते यदा तौ तु ध्रुवेण समधिष्ठितौ॥ तदाभ्यंतरतः सूर्यो भ्रम
ति मंडलानि वै॥ ध्रुवेण मुच्यमाने न पुनर्रश्मियुगेन तु॥ तथैव बाह्यतः सूर्यो भ्रमते मंडलानि वै ति॥ तदेतदुक्तं॥ यदा मेषतु
लयोरित्यादिना॥ उदयास्तादिकं वक्तुमाह॥ तस्मिन्मानसोत्तरे मेरोः पूर्वत ऐंद्री पुरी उपदिशतीत्यनुषंगः॥ तासु पुरीषु
उदयादीन्युपदिशति॥ चतुर्द्दशमित्युक्तं ये मेरोर्दक्षिणे देशे तेषामैंद्रीमारभ्य पूर्वादयः ये पश्चिमे तेषामैंद्रीमारभ्य पूर्वा
दयः ये पश्चिमे तेषामैंद्रीमारभ्य पूर्वादयः ये पश्चिमे तेषामैंद्रीमारभ्य पूर्वादयः ये पश्चिमे तेषां याम्यामारभ्य ये उत्तरे ते
षां वारुणीमारभ्य॥ ये पूर्वे तेषां सौम्यामारभ्य॥ ॥ ॥

६९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्रत्यानां मेरुस्थानां ॥ सव्येनेति नक्षत्राग्निसुखप्ययागत्वा मेरुं वामतः कुर्वन्नपि प्रदक्षिणावर्त्तप्रवाहाख्यवायुस्त्राम्यमाणज्योति
श्चक्रवशात् प्रसह्य दक्षिणतः करोति ॥ अतश्चक्रगतिवसादतिदूरतो भूसंलग्नस्येव दर्शनमुदयः ॥ आकाशमारूढस्येव दर्शि
नं मध्याह्नः ॥ भूमिं प्रविष्टस्येवादर्शनमस्तमयः ॥ ततोतिदूरगमने निशीथ इति समुद्रतीरस्थैर्दृष्ट्याब्धेः प्रलंबा एषघातरुदेत्ययः ॥
सायं प्रविशतीति प्रतीतिर्व्यवहारोन वस्तुतः ॥ तदुक्तं वैशेषिके ॥ उदयास्तमये चैव सर्वकालंतु संमुखे ॥ दिशास्वशेषासु तथा मैत्रेय विदिशासु ॥
येर्यत्र दृश्यते भास्वान् सतेषामुदयः स्मृतः ॥ तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः ॥ नैवास्तमनमर्कस्य नोदयश्च सर्वदासतः ॥

तत्रत्यानां दिवसमध्यं गत एव यदादित्यस्तपति सव्येन चलन् दक्षिणेन करोति ॥ ५ ॥ यत्रोदेति तस्य ह समानसूत्रनिपा
तेन निम्लोचति ॥ यत्र क्वचन स्पंदनेनाभितपति ॥ तस्य हैष समानसूत्रनिपाते प्रस्वापयति ॥ तत्रगतं न पश्यंति ये तं स
नुपश्येरन् ॥ ६ ॥ यदा चैन्द्र्याः पुर्याः प्रचलितेतदा पंचदशघटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्द्धद्वादश
लक्षाणि साधिकानि चोपयाति ॥ ७ ॥ पंचविंसतिसहस्राधिकानि

उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः ॥ शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयं ॥ विकर्णौ द्वौ विकर्णस्थः त्रीन्कोणान् द्वे पुरे त
था ॥ अत एव तत्रैवोक्तं ॥ सर्वेषां द्वीपवर्षाणां मेरोरुत्तरस्थितिः ॥ यतो यत्र जनः पश्यति सैव तस्य प्राचीतस्य च वामतो मेरुस्ति
ष्ठतीति ॥ यथोक्तमुदयास्तमनाद्यनियमं दर्शयति ॥ यत्रोदेति त्यादिना ॥ स्पंदनेन स्वेदोद्गमेन प्रस्वापयति निशीथं करोति ॥ ये
तं समनुपश्येरन् प्रस्वापसमानसूत्रस्थाः साधिकानि पंचविंशतिसहस्राधिकानि ॥ ७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा॰पं॰ ६९ सहवायद्यपिवस्तुतः सूर्यस्यापिनक्षत्रैःसहैवोदयास्तमयौतथापितस्यतत्साहित्यादर्शनात्सोमादीनामेवतत्साहित्

युक्तं॥ त्रयीमयइत्याद्युपासनार्थं॥ द्वादशमासाअरायस्य॥ षडृतवोनेमयोयस्यत्रीणिचातुर्मास्यानिनाभयोयस्य॥

हतइतराभागोयस्यमानसोत्तरगिरौलग्नाधःउपरिवायुर्वद्धमानसोत्तरम्‌ विंतिर्दृष्टव्यं॥ अन्यथायुतमात्रोच्छ्रायत्वान्मानसोत्तरस्य

यतःसार्द्धसप्तलक्षाधिके मेरोश्चतुरसीतुच्छ्रयत्वादन्तस्यसाम्यानुपपत्तेः। तस्मिन्नक्षेचक्रमाक्षकृतमूलःनिबद्धपरभागः॥

एवंततोवारुणीसौम्यामैन्द्रीमपुनस्तथान्येचग्रहाः॥ सोमादयोनक्षत्रैःसहज्योतिश्चक्रेसमभ्युद्यंतिसहवानिम्लोचंति॥ ६९

॥७॥ एवंमुहूर्तेनचतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानिसौरोरथस्त्रयीमयोऽसोवतस्त्रिषुपरिवर्ततेपुरीषु॥ यस्यैकंच

क्रंद्वादशारंषण्नेमित्रिनाभिसंवत्सरात्मकंसमामनंति॥ ॥८॥ यस्याक्षोमेरोर्मूर्द्धनिकृतोमानसोत्तरेकृतइतरभागः॥

यत्रप्रोतंरविरथचक्रं॥ तैलयंत्रचक्रवद्भ्रमतिमानसोत्तरगिरौपरिभ्रमति। तस्मिन्नक्षेकृतमूलोद्वितीयोऽक्षस्तुर्यमाने

नसंमितस्तैलयंत्राक्षवद्ध्रुवेकृतोपरिभागः॥ ॥९॥ रथनीडस्तुषट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान्रविरथ

युगोयत्रहयाश्छंदोनामानःसप्तारुणयोजिताविहंतिदेवमादित्यं। पुरस्तात्सवितुररुणःपश्चाद्धनियुक्तःसौत्यंकर्म

णिकिलास्तेभ ॥१०॥ ॥

प्रथमात्त्वोमेरुमानसोत्तरायतःसार्द्धसप्तलक्षाधिकसार्द्धकोटिप्रमाणः॥ तस्यतुरीयमानेनसप्तत्रिंशत्सहस्राधिकैकोनचत्वारिंश

ल्लक्षमानेनध्रुवेकृतः। वायुपाशैर्निवद्धउपरिभागोयस्य। नीडउपवेशस्थानं॥ गायत्र्यादिछंदोनामानःअरुणेनयोजिताः

संतोदेवंवहंति॥ पुरस्तात्स्थितोपिपश्चात्प्रत्यङ्मुखआस्ते॥ यद्यप्यत्सूर्यस्यपुरःतस्यैवपश्चिममुखत्वात्पश्चादित्युक्तं॥ अ

श्वस्थानंचवायुनोक्तं॥ सप्ताश्वास्तपश्छंदांसिवहंतेवामतोरविं॥ चक्रपक्षनिवद्धानिचक्रेवाक्षःसमाहितइति॥ ॥१॥

स्तुवाकाय सुभाविताय॥ एकैकः कशः चतुर्दशः चतुर्दशसप्तगणासंतो मासिमासि उपासत इत्यन्वयः। गव्यूतिः क्रोशद्वयं सगव्यूतु तरं यथा भवति तथा॥ ।२०॥ इति पंचमे एकविंशः ॥२१॥ द्वाविंशे सोमशुक्राद्यैः स्थानमाहोत्तरोत्तरं। तत्रभत्यनुसरेण इष्टानिष्टे तथा च्छांणं॥

तथा बालखिल्या ऋषयो गुष्ठपर्वमात्राः षष्ठिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः स्तुवंति॥ तथान्ये च ऋषयो गंधर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त चतुर्दश मासि मासि भगवंतं सूर्यमात्मानं पृथग्नामानः पृथक्कर्मभिर्द्वंद्वश उपासते। ॥१९॥ लक्षोत्तरं सार्द्ध नवकोटियोजनपरिमंडलं भूवलयस्य क्षणेन सगव्यूत्युत्तरद्विसहस्रयोजनानि भुंक्ते। ॥१२॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ज्योतिश्चक्रवर्णने एकविंशोध्यायः॥ ॥२१॥ राजोवाच॥

यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रमतो राशीनामभिमुखं प्रचलनं भगवतोपवर्णितममुष्य वयं कथमनुमीमहीति॥ ॥सूत उवाच॥ स होवाच यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव। प्रदेशांतरेष्वप्युपलभ्यमानत्वादेवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणतः परिचरता सह परिधावमानानां। तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव॥ नक्षत्रांतरे राश्यंतरे चोपमानत्वात्॥ ॥२॥ ॥

राशीनामभिमुखं अप्रदक्षिणं च उपवर्णितं सव्येन॥ चलनं दक्षिणेन करोति वदतामुष्य वयं कथमनुमिमीमहि इति एतत्कथं तत्रास्यामो विरुद्धत्वादित्यर्थः। चक्रवशात्स्वतश्च गतिद्वयमविरुद्धमिति परिहारार्थः। ॥१॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा०पं० तत्तत्कालनियमेनकर्मणांविशुद्धेः। सकुएपस्यानिमित्तत्वमात्मानंविभज्यविजिज्ञास्यमानः। वितर्क्यमाणोयथोपजो
७० षंयथाकर्मभोगंऋतुगुणान्शीतोष्णवातादीन्।।वर्णाश्रमाचारानुवर्त्तिभिः पुरुषास्त्रय्याम्नातैःकर्मभिरिंद्रादिरूपंयोगवि
तानैश्चध्यानादिभिरंतर्यामिरूपंपूजयंतःसएवस्वर्गत्यामासादिस्य[illegible]कारणमित्याह।। सएषलोकानामात्माद्यावाष्ट
थिव्योरंतरेणमध्येयन्नभोवलयमंतरिक्षंतस्यमध्येयत्कालचक्रंतद्गतः।राशिभिर्मेषादिभिः संज्ञायेषां।। चैत्रादिसंज्ञास्तांश्चांद्रमा।
सएषभगवानादिपुरुषएवसाक्षान्नारायणोलोकानांस्वस्तयआत्मानंत्रयीमयीकर्मविशुद्धनिमित्तंकविभिरपिवेदेन ७०
विजिज्ञास्यमानोद्वादशधाविभज्यषट्सुवसंतादिष्वृतुषुयथोपजोषमृतुगुणान्विदधाति।।३।। तमेतमिहपुरुषास्त्रय्या
विद्ययावर्णाश्रमाचारानुपथाउच्चावचैःकर्मभिराम्नातैर्योगवितानैःश्रद्धयायजंतोंजसाश्रेयःसमधिगच्छंति।।४।।अथस
एषआत्मालोकानांद्यावाष्टथिव्योरंतरेणनभोवलयस्यकालचक्रगतोद्वादशमासान्भुंक्तेतानेवराशिसंज्ञान्संवत्सरावय
वान्मासपक्षद्वयंदिवानक्तंचेतिसपादर्क्षद्वयमुप दिशंतियावताषष्टमंशंभुंजीतसवैऋतुऋत्युपदिश्यते।।संवत्सरावयवः।।
अथचयावतार्द्धेननभोवीथ्यांप्रचरति।।तंकालमयनमाचक्षते।अथचयावन्नभोमंडलंसहद्यावाष्टथिव्योर्मंडलाभ्यांकार्त्स्न्ये
नसहभुंजीत।।तंकालंसंवत्सरंपरिवत्सरमिडावत्सरमनुवत्सरंवत्सरमितिभानोर्मांद्यशैघ्र्यसमगतिभिःसमामनंति।।५।।।।
पंचेणषष्ठ्यंशंराशिद्वयं।मंडलाभ्यांसहभुंजीतसहसहिस्तूर्यः।।यदाशुक्लप्रतिपदिसंक्रांतिर्भवतितदासौरचांद्रयोमासयोर्युगपदुपक्र
मोभवतिसंवत्सरः।ततःसौरमासेनवर्षेषट्दिनानिवर्द्धंते।चांद्रमानेनषट्न्यूनसंतीति।।द्वादशादिनव्यवधानादुभयोरग्रश्चहाचानभ
वति।।एवंपंचवर्षाणिगच्छंतितन्मध्येद्वौमलमासौनवः३नःषष्ठःसंवत्सरोभवति।।तदेवमवांतरभेदेनसंवत्सरादिपंचकंसमामन
ति।। ।।

सोमादीनामपि स्थानं कार्यं वाह॥ एवं चंद्रमा इति॥ अर्कगभस्तिभ्य इ मंडलरूपेभ्यः सपाददक्षाभ्यां सपाद दिनद्वयेन॥ सर्वेषां जीवनिवह
नां प्राणः अन्नमयत्वात् अमृतमयत्वाच्च॥ अत एव जीवनहेतुत्वाज्जीवश्चात देवाह॥ य एष इति दक्षिणेनैवानन्तु तेषां पृथगन्या
गतिरस्तीत्यर्थः॥ कालायनेकालचक्रे॥ उत्तराषाढाश्रवणसंधावभिजिन्नक्षत्रं फलविशेषेण पृथक्कल्पितं तेन॥ स एव तथाव
एवं चंद्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं सपाददर्क्षाभ्यां दिने
नैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुंक्ते॥ ८॥ अथ वापूर्यमाणाभिश्चकलाभिरमराणां क्षीयमाणाभिः स्वकलाभिश्च
पितृणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता मुहूर्तैर्भुंक्ते॥ य
य एष षोडशकलः पुरुषो भगवान्मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणा
प्यायनशीलत्वात् अयं सर्वमय इति वर्ण्यते॥ ९॥ तत उपरिष्टाल्लक्षयोजनतो नक्षत्राणि मेरुं प्रदक्षिणेनैव कालायन
ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः॥ १०॥ तत उपरिष्टात् उशना द्विलक्षयोजनत उपलभ्यते पुरतः पश्चात्
सहैवार्कस्य शैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति लोकानां नित्यदानुकूल एव॥ प्रायेणवर्षवारिणानुमीयते सवृष्टि
विष्टंभग्रहोपशमनः॥ ११॥।

श्रुतिश्च। अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानां अधस्ताच्छ्रोणायाः इत्यादि॥ पुरतश्च सूर्येणोद्यमानेन क्षत्रे पश्चाद्भुंक्ते॥ सहैव भुज्य
माने। चारेण क्रमस्थनक्षत्राद्यतिक्रमेण॥ वृष्टेर्विष्टंभः स्तंभनं यस्मात् ग्रहात् तमुपशमयतीति तथा॥ ११॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा०पं० ७१

बुधो व्याख्यातः पश्चात्सहैव वा चरतीति ॥ किं विद्वद्भिरोषंत्वा हत तदित्याह ॥ आशंसते सूचयति ॥ अघ्वः शंसः सूचकः ॥ यदि न वक्रेणाभि
वर्त्तते तर्हि त्रिभिस्त्रिभिः पक्षैर्यदि न वक्रः स्यात्तर्हि परिवत्सरं ॥ ॥ पंचमे त्रयोविंशः ॥ त्रयोविंशे ध्रुवस्थानं ज्योतिश्चक्राश्रयं ततः ॥ शिशुमा

उशनसा बुधो व्याख्यातः ॥ तत उपरिष्टाद्द्विलक्षयोजनतो बुधः सोमसुतः उपलभ्यमानः प्रायेण शुभकृत् यदार्कात्व्यतिरिच्यते
तदातिवाताभ्रप्रायां नावृष्ट्यादिभयमाशंसते ॥ १२ ॥ तत ऊर्ध्वमंगारकोपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिः पक्षैरेकैक
शो राशीन्द्वादशानुभुंक्ते ॥ यदि न वक्रेणाभिवर्तते ॥ प्रायेणाशुभग्रहोघशंसः ॥ १३ ॥ तत उपरिष्टाद्द्विलक्षयोजनांतरगतो ७१
भगवान्बृहस्पतिः ॥ एकैकस्मिन्राशौ परिवत्सरंपरिवत्सरं चरति यदि न वक्रः स्यात् प्रायशोनुकूलो ब्राह्मणकुलस्य ॥ १४ ॥ त
त उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चरः एकैकस्मिन्राशौ त्रिंशतमासान्विलंबमानः सर्वानेवानुपर्येति ॥
तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशांतिकरः ॥ तत उत्तरस्मादृषय एकादशलक्षयोजनांतर उपलभ्यंते ॥ य एव लो
कानां शमनुभावयंतो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमंति ॥ ॥ १५ ॥ इति श्रीभागवते महापुराणे ज्योतिश्चक्रोपवर्णने
द्वाविंशोध्यायः ॥ ॥ २२ ॥ श्रीशुक उ० ॥ अथ तस्मात्परतस्त्रयोदशलक्षयोजनांतरतो यत्तद्विष्णोः परमं पदमभिवदंति ॥ १ ॥ यत्र
महाभागवतो ध्रुव औत्तानपादिरग्निनेंद्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाण इदा
नीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव उपवर्णितः ॥ २ ॥

रस्य रूपेण हरेरवस्थितिरुच्यते ॥ यत्तत्प्रसिद्धं विष्णोः पदं यत्र ध्रुव उपास्ते तिष्ठतीत्यन्वयः ॥ समकालमेव युज्यंत इति तथा ते नक्षत्ररूपैः ॥ २ ॥

मेढीस्तंभेवरुधान्याक्रमेणपशवोवलीवर्द्दाः। कर्मसारथिः सहायोयेषां। ईश्वराधारत्वात्॥ पतनशंकैवनास्तीतिवक्तुंमतांतरमा
ह॥ केचिदिति॥ ज्योतिरनीकंज्योतिश्चक्रंयोगधारणायांस्थितमितिशेषः॥ लांगूलेअग्रादधोभागे उदगयनान्यभिजिदादीनिपुनर्व
सुहिसर्वेषांज्योतिर्गणानांग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसाभगवताकालेनभ्राम्यमाणानांस्थाणुरिवावष्टंभईश्वरेण
विहितः शश्वदवभासते॥ यथामेढीस्तंभेआक्रममाणपशवः संयोजितास्त्रिभिःसवनैर्यथास्थानमंडलानिचरंति॥२॥ ए
वंभगणाग्रहादयएतस्मिन्नंतर्वहिर्योगेनकालचक्रआयोजिताध्रुवमेवावलंब्यवायुनोदीर्यमाणाआकल्पांतंपरिचक्रामं
ति॥ नभसियथामेघाः श्येनादयोवायुवशाः कर्मसारथयः परिवर्त्तंते। एवंज्योतिर्गणाःप्रकृतिपुरुषसंयोगानुगृहीताः
कर्मनिर्मितगतयोभुविनपतंति॥४॥ केचिदेतज्ज्योतिरनीकंशिशुमारसंस्थाने [illegible]भगवतोवासुदेवस्ययोगधारणायामनुव
र्णयंति॥ यस्यपुच्छाग्रेवाक्शिरसः कुंडलीभूतदेहस्यध्रुवउपकल्पितः॥५॥ तस्यलांगूलेप्रजापतिरग्निरिंद्रोधर्मइतिपुच्छ[illegible]लेधा मू
ताविधाता। कट्यांसप्तर्षयः। तस्यदक्षिणावर्त्तकुंडलीभूतशरीरस्ययान्युदगयनानिदक्षिणेपार्श्वेनक्षत्राण्युपकल्पयंति। दक्षिणा
यनानितुसव्ये यथाशिशुमारस्यकुंडलीभोगसंनिवेशस्यपार्श्वयोरुभयोरप्यवयवाःसमसंख्या[illegible]वंति॥६॥ पृष्ठेत्वज
वीथीआकाशगंगाचोदरतः॥ ॥ ॥ न५

स्वैतानिचतुर्दशदक्षपार्श्वेदक्षिणायनानिपुष्यादीन्युत्तराषाढांतानिचतुर्दशवामपार्श्वे॥ ॥॥

पं २ नदेवस्थानविज्ञेयेण विनश्यद्वर्षयति॥ पुनर्वसुपुष्यादिसादिना॥ पुनर्वसुरुदगयनां [illegible] नक्षत्रं॥ पुष्योदक्षिणायनस्याद्यं॥ आ
र्द्राश्लेषेनयोर्निरंतरे॥ अभिजित् उत्तराषाढे उत्तरादक्षिणायनयोराद्यंतनक्षत्रे॥ श्रवणा पूर्वाषाढे धनिष्ठामूलंवतयोरपु
नरपूर्वे॥ मघादीनियान्यनुराधांतानिदक्षिणायनान्यष्टा निवामपार्श्वेबक्रिषु [illegible] स्त्रिषुमृगशीर्षादीनिप्रातिलोम्येनसर्वभे
पुनर्वसुपुष्यौदक्षिणवामयोः श्रोणयोः आर्द्राश्लेषावदक्षिणवामयोश्चपादयोः॥ पश्चिमयोः॥ अभिजिदुत्तराषाढेदक्षिणवा
मयोर्नासिकयोर्यथासंख्यं॥ श्रवणपूर्वाषाढेदक्षिणवामयोर्लोचनयोः धनिष्ठामूलंवदक्षिणःवामयोः कर्णयोः॥ मघादीन्य ७२
ष्टनक्षत्राणिदक्षिणायनानिवामपार्श्वेवक्रिषुयुंजीत॥ तथैवमृगशीर्षादीन्युदगयनानिदक्षिणपार्श्वेवक्रिषुप्रातिलोम्येनप्र
युंजीत॥ शातभिषक् ज्येष्ठेस्कंधयोर्दक्षिणवामयोर्न्यसेत्॥ ॥७॥ उत्तराहनौ [illegible] गस्त्वरधराहनौयमः मुखेवांगारकः शनैश्वर उपस्थे
बृहस्पतिः ककुदिवक्षस्यादित्योहृदयेनारायणोमनसिचंद्रोनाभ्यामुशनाः स्तनयोरश्विनौबुधः प्राणापानयोराहुर्गले केतवः
सर्वांगेषुरोमसु [illegible] सर्वेतारगणाः॥ ॥८॥ एतदुहैवभगवतोविष्णोस [illegible] देवतामयंरूपंमहरहः संध्यायांप्रयतोवाग्यतोनिरी स्व ३
क्षमाण उपतिष्ठेत नमो ज्योतिर्लोकायकालायनायानिमिषांपतयेमहापुरुषाय॥ अभिधीमहीति॥ ग्रहर्क्षताराममयमाधिदैविकं
पापापहं मंत्रंत्रिकालं॥ नमस्यतः स्मरतोवात्रिकालंनश्यतेतत्कालजमाशुपापम्॥ ॥८॥ इतिश्रीभागवतेमहापुराणेशिशुमारस्थानवर्णनंनामयोविंशोध्यायः॥ हुतो २ नमो २
स्पदांतानियानिउदगयननक्षत्राणिपश्च [illegible] निदक्षिणपार्श्वेशातभिषज्येष्ठेदक्षिणउत्तरायनयोर्येवाशिष्टातेस्कंधयोः यमोनक्षत्र
रूपः तथानारायणोश्विनौवक्रकुदिगलपृष्ठश्रृंगं ज्योतिर्मयोलोकाश्रयायकालचक्ररूपायनमोभिधीमहिइतिमंत्रेणोपतिष्ठेत॥
मंत्रकृतंपूर्वोक्तंमंत्रंजपतो॥ ॥८॥ ॥पंचमेत्रयोविंशः॥ ॥२३॥ ॥ ॥०॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं त्रिभिर्द्युमर्यादापालनं वर्णितं यथा। अधोभुवनमर्यादापालनं त्रिभिर्निरूप्यते॥ ॥१॥ चतुर्विंशे रवेरर्वाक् स्वर्भान्वादेः स्थितिः क्रमा
त्॥ अतलादिबिलस्वर्गमर्यादाः सप्त वर्णिताः॥ ॥२॥ स्वर्भानुमारभ्य ध्रुवांतं संनिवेशं निरूप्येदानीं स्वर्यादधस्थान्निरूपयति। अधस्ता
दितिस्वर्भानुराहुः॥ अलमनतल्लेन्ने॥ सिंहिकायाः पुत्रः। ग्रहणं च कुमाह। यदतः प्रतपस्तरणेर्मंडलं॥ अमृतपाने मध्यप्रवेशे
न तयोर्व्यवधानं करोतीति तथा। अत एव ताभ्यां सूचितत्वात्। वैरमनुबध्नातीति तथा॥ भगवतं चक्रं परिवर्तमानं परित्रमत॥
श्री शुक उवाच॥ ॥ अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके॥ योसावमरत्वं ग्रहत्वं चालेभे भगवदनुकंपया स्वय
मसुरापसदः सैंहिकेयो ह्यतदर्हस्तस्य तात जन्म कर्माणि चोपरिष्टाद्वक्ष्यामः। यददस्तरणेर्मंडलं प्रतपतस्तद्विस्तरतो योजना
युतमाचक्षते॥ ॥२॥ द्वादशसाहस्रं सोमस्य त्रयोदशसाहस्रं राहोः। यः पर्वणि तद्व्यवधानकृद्वैरानुबन्धः सूर्यचन्द्रमसाव
भिधावति। तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं। तत्तेजसा दुर्विषहं मुहुः परिवर्तमान
मभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते तदुपरागमिति वदंति लोकाः॥ ॥३॥ ततोधस्तात्सिद्धचारणवि
द्याधराणां सदनानि तावन्मात्र एव॥ ततोध[illegible]स्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमंतरिक्षं यावद्वायुः प्रवाति
यावन्मेघा उपलभ्यंते॥ ॥३॥ ततोधस्तान्शतयोजनांतर इयं पृथिवी यावद्धंससभासश्येनसुपर्णादयः पतत्रिवरा उत्पतंतीति॥ उ
अभिमुखं मुहूर्तमवस्थितः सन्निति॥ एवमारादवस्थानं उपरागं ग्रहणं वदंति। तत्र च ऋजुवक्रस्थितिभ्यां सर्वग्रासासर्वग्रासौ॥ न
तु वस्तुतो ग्रासोस्ति दूरांतरत्वात्॥ तावन्मात्र एव योजनायुते॥ अंत[illegible]रिक्षं ग्रहहीनं॥ तस्यावधिमाह। यावद्वायुः प्रवातीति। तीव्रो वाति
तस्याप्यवधिमाह॥ यावन्मेघाः पृथिव्या उपरि भूर्लोकावधिमाह॥ यावद्धंसादयः पार्थिवा विकाराः॥ ॥४॥

तानता पृथ्वीः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

योजनायुतांतरेणायेन उच्छ्रितौ आयामोच्छ्रयः कयाह स्व तावद्विस्तारेण॥ सामान्येन विवराणि वर्णयति। एतेष्वित्यादिना॥ अथात
लस्मृतः प्राप्तेनेन ग्रंथेना एतेषु दैत्यादयो निवसंतीत्यन्वयः॥ कथंभूतेषु॥ अधिकाः कामभोगश्च ऐश्वर्यानंदश्च स्तुतिश्च संत
तिः विभूतिश्च संपत्तिस्तैः॥ सुसमृद्धा भवनादयो येषां कथंभूताः नित्यप्रमुदिता अनुरक्ताः कलत्रादयो येषां नप्रतिहतः कामो
येषां॥ मायया विनोदो येषां॥ किंच॥ हे महाराज येषु मयेन निर्मिताः पुरश्चकासतीत्यन्वयः॥ कथंभूताः नानाये मणिप्रवरास्तेषां प्र

उपवर्णितं भूमेर्यथासं निवेशावस्थानं॥ अवनेरप्यधस्तात्सप्तभूविवराएकैकशो योजनायुतांतरेणायामविस्तारेणोपक्लृ
प्ताः अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति॥ ७॥ एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्व ७३
र्यानंदभूतिविभूतिभिः सुसमृद्धभवनोद्यानक्रीडाविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्यबंधुसुहृद
नुचरा गृहपतय ईश्वरादप्यप्रतिहतकामा मायाविनोदा निवसंति॥ ८॥ येषु महाराज मयेन मायाविनः निर्मिताः पुरो नानामणि
प्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृ
त्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः समलंकृताश्चकासंति॥ ९॥

प्रवेकाः मुख्याः तैः विरचितैः राकीर्णे ... र्भवनादिभिः तथा विवेश्वराणां गृहोत्तमैश्च समलंकृताः॥
कीदृशैः गृहोत्तमैः नागाश्च असुराश्च मिथुनभूताः पारावतादयश्च तैराकीर्णाः कृत्रिमा भूमयो येषु तैः॥ पाठांतरे नानास्वनत्वं मिथुनवि
शेषणम्॥ ९॥ ॥श्रीः॥ ॥

उद्यानानि च तैरराममरलोकश्रियमतिशयितानि येषु वकासंतीत्यन्वयः। काभिः श्रीभिः। केषां। कुसुमफलस्तवकाश्च सुभगाः किं
शलयानि च तैर्वनतरुविरा विटपा येषां तेषां विटपिनां लतानामंगैरालिंगितानां श्रीभिः।। तथा समिथुनाः चक्रवाकादिमिथुन
सहिता ये विविधा विहंगास्तद्युक्तानां जलाश्रयाणां च श्रीभिः कीदृशानां। अमलैर्जलैः पूर्णानां पुनरपि कैरतिशयितानि झषकुलो
ल्लंघनेन क्षुभितं यज्जलाश्रयाणां नीरं तस्मिन् यानि नीरजादीनि तेषां वनेषु कृतं निकेतनं यैस्तेषां अर्थात्त्वद्विरेफाणां एकोरवंडेयो

उद्यानानि चातितरां मनइंद्रियानंदिभिः कुसुमफलस्तवकसुभगकिशलयावनतरुविराविटपविटपिनां लतांगालिं
गितानां श्रीभिः समिथुनविविधविहंगमजलाश्रयाणाममलजलपूर्णानां झषकुलोल्लंघनक्षुभितनीरनीरजकुमुद
कुवलयकल्हारनीलोत्पललोहितशतपत्रादिवनेषु कृतनिकेतनानामेकविहाराकुलमधुरविविधस्वनादिभिरिंद्रियो
त्सवैरमरलोकश्रियमतिशयानानि। १८। यत्र ह वाव न भयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते। यत्र महाहिप्रवरशि
रोमणयः सर्वतस्तमः प्रबाधंते। १९। न वा एतेषु वसतां दिव्यौषधिरसरसायनपानस्नानादिभिराधयो व्याधयो वलीपलितजरा
दयश्च देववैवर्ण्यदौर्गंध्यस्वेदः खेदः क्लमः ग्लानिरिति वयोवस्थाश्च भवंति।। नहि तेषां कल्याणानां
प्रभवति कुतश्चन मृत्युर्विना भगवत्तेजसश्चक्रापदेशात्।। ।। ।।

विहारस्तेनाकुलश्च ते मधुराश्च विविधाः स्वनादयस्तैर्ये इंद्रियोत्सवास्तैश्च।। यद्वा। समिथुनेत्यादेरुत्तरेणैव संबंधः मनइंद्रियानंदिभिरि
ति स्वनादीनां विशेषणं तत्र नीरजं सामान्यकमलं लोहितं शतपत्रं तद्विशेषः।। अहोरात्रादिभिर्यद्भयं तन्नोपलक्ष्यते।। सूर्याद्यभावात्
क्लमः श्रमः ग्लानिरुत्साहः।। कल्याणानां मंगलरूपाणाम्।। ।। ।।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्यर

भा०पं० ७४ यस्मिन्नगवत्तेज्ञ स्मिन्प्रविष्टे पुंसवनानि गर्भाः । अत्र तुर्थान्वेच्छा वः पातः पंचमषष्ठयोरिति स्रावपातौ विज्ञेयौ ॥ सवर्णे रतास्वैरिण्यः
कामिन्यस्तु सवर्णेतिः तत्राप्यतिवं चलाः पुंश्चल्यः विलायनं विलायतनं ॥ साधयित्वा संभोगसमर्थं कृत्वा स्वअ सा धारणा
विल सास्तनुर्द्व कोवलोके स्तैना नुरागयुक्तं स्मितं ते नसंलापउपगूहनं च तदादिभिर्यस्मिन्रसे उपयुक्ते सेविते ॥ नव य्यो ः
यस्मिन्प्रविष्टे सुरवधूनां प्रायश्च पुंस वनानि भयादेव स्रवंति ॥ १ ॥ अथातले म जपुत्रो ऽसुरो वलो निवसति येन ह वा
रहस्पृष्टाः षण्णवतिर्मायाः का वेनाद्यापि मायाविनो धारयंति ॥ यस्य च जृंभमाणस्य मुखतस्त्रयः स्त्रीगणा उदपद्यं ७४
तस्वैरिण्यः कामिन्यः पुंश्चल्य इति या वै विलायनं प्रविष्टं रसेन हाटकाख्येन साधयित्वा स्वविलासावलोकेनानुरा ७५
गस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयंति ॥ यस्मिन्नुपयुक्ते पुरुष ईश्वरोहं सिद्धोहमित्ययुतमहागजबलं
आत्मानमभिमन्यमानः कत्थते मदांध इव ॥ ११ ॥ ततोधस्तात् वितले हरो भगवान्हाटकेश्वरः स्वपार्षद भूतगणावृ
तः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूतास्ते । यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण यत्र
चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेना ऽसुरेंद्रावरोधेषु पुरुषाः सह
अग्नि (पुरुषीभिर्धारयंति ॥ १२ ॥

भवस्य भवान्याश्च ॥ चित्रभानुरग्निः तेन निष्ठ्यूतं फूत्कृत्य त्यक्तं । असुरेंद्राणां अवरोधेषु अंतःपुरेषु पुरुषीभिः स्त्रीभिः ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सुतलेबलिरधुनाप्यास्ते इत्यन्वयः। कथंभूतः। महेंद्रस्यप्रियंकर्तुमिच्छताभगवताप्रथमंपराक्षिप्तं अपहृतंलोकत्रयंयस्यसः पुनर्भगवतो
नुकंपयैवतत्रप्रवेशितःसन्॥ कीदृशेन॥ योदितेःसकाशात्भूत्वावटुवामनरूपेणलब्धकायस्तेन केचित्तस्यसुतलगतसंभूमिदानफ
लंमन्यंते तन्निराकरोति॥ नोएवेति॥ यद्बिलनिलये विवरस्थाने ऐश्वर्यं तद्भूमिदानस्यसाक्षात्कारः फलंनभवत्येव कुतस्तस्यापेक्षायां एवंभू
तस्यदानस्यसाक्षादपवर्गहेतुत्वा दित्याह॥ यत्तत्प्रसिद्धंदानंतस्य॥ तदेवाह॥ भगवत्यशेषजीवनिकायानांजीवभूतस्तश्चासावात्मभू

ततोधस्तात्सुतले उदारश्रवाःपुण्यश्लोकोविरोचनात्मजोबलिर्भगवतामहेंद्रस्यप्रियंचिकीर्षमाणेनादितेर्लब्धकायोभूत्वावटुर्वा
मनरूपेणपराक्षिप्तलोकत्रयोभगवदनुकंपयैवपुनःप्रवेशितःइंद्रादिष्वविद्यमानयासुसमृद्धयाश्रियाभिजुष्टःस्वधर्मेणाराधय
न् तमेवभगवंतमाराधनीयमपगतसाध्वसआस्तेधुनापि॥१३॥ नोएवैतत्साक्षात्कारोभूमिदानस्ययत्तद्भगवत्यशेषजीवनिकाया
नांजीवभूतात्मभूतेपरमात्मनिवासुदेवेतीर्थतमेपात्रउपपन्नेपरयाश्रद्धयापरमादरसमाहितमनसासंप्रतिपादितस्यसाक्षा
दपवर्गद्वारस्ययद्बिलनिलयैश्वर्यम्॥१४॥ यस्यहवावक्षुत्पतनप्रस्खलनादिषुविवशःसकृन्नामाभिगृणन्पुरुषःकर्म
बंधनमंजसाविधुनोति॥ यस्यहैवप्रतिबाधनंमुमुक्षवोन्यथैवोपलभंते॥ ॥

भूतश्चसर्वजीवनियंतावासावात्मारामश्चेत्यर्थस्तस्मिन्संप्रतिपादितस्य॥ किंच॥ यस्यनामक्षुतादिषुविवशोपिसकृदपिगृणन्॥
कर्मबंधंविधुनोति कथंभूतः॥ यस्यप्रतिबाधनंत्विहमुमुक्षवोन्यथैवोपलभंते यन्निवृत्त्यर्थं योगसांख्यादिक्लेशाननुभवंतीत्यर्थ
स्तंकर्मबंधंत्यजति॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्रास्मिन्भगवतां भक्तानां ज्ञानिनां वयया यायथे आत्मदे आत्मतमेव समर्पितस्य नमिदानस्य न तत्फलमिति पूर्वेणैव संबंधः किंचनेदं
भगवदनुकंपाफलमपि किं ते कात्तमनत्तस्यतस्यांतरायमात्रमित्याह ॥ नेति ॥ भगवानमुष्य अमुं नैवानुगृहीतवान् तत्र हेतुः
यदु देति ॥ आत्मन ईश्वरस्यावस्मृतं सुष्ठातीतित्तथा तदुक्तं वासुदेवे मनो यस्य जपहोमार्चनादिषु सुष्ठातीति तथा तदुक्तं ॥ वासु
देवे मनो यस्य जपहोमार्चनादिषु ॥ तस्यांतरायो मैत्रेय देवेंद्रत्वादिकं फलमिति ॥ तस्यैकांतभक्तिं सप्रपंचमाह ॥ यन्नदिति प्रसिद्धमिति
वक्ष्यमाणमुवाव हेत्यन्वयः ॥ कथंभूतः नत्र अधिगतः अन्य उपायो येन तेन भगवता याच्ञाछलेनापहृतं स्वशरीरमात्रावशेषितं लोकत्रयं
तद्भगवतामात्मवतां सर्वेषामात्मन्यात्मद आत्मतमेव ॥१५॥ नवै भगवान्ननममुष्यानुजग्राह यदुत पुनरात्मानुस्मृतिमो
षणं मायामयभोगैश्वर्यमेवातनोति ॥ यन्न भगवताऽनधिगतान्योपायेन याच्ञाछलेनापहृतस्वशरीरावशेषितलो
कत्रयो वरुणपाशैश्च संप्रतिमुक्तो गिरिदर्यां चापविद्ध इति होवाच ॥१६॥ नूनं बतायं भगवानर्थेषु न निष्णातो योसाविंद्रो
यस्य सचिवो मंत्राय वृत एकांततो बृहस्पतिस्तमतिलयस्वयमुपेंद्रेणात्मानमयाचत ॥ आत्मनश्चाशिषो नो एतद्दास्यं इति
गंभीरवयसः कालस्य मन्वंतरपरिवृत्तं कियल्लोकत्रयमिदं ॥१७॥ याच

यस्यसम्यक्प्रतिमुक्तो वद्धः ॥ अपविद्धः प्रक्षिप्तोपि सन् ॥ वतेति खेदे भगवान् विद्वान् अपि योसाविंद्रं यस्यैकांतेन बृहस्पतिः स चिवः स
हायः यतो मंत्रार्थं वृतः सोपि पुरुषार्थेषु नूनं न निपुणः यत उपेंद्रेण द्वारभूतेन तं उपेंद्रं विहायात्मानमालोकत्रयं मया चितं तं मंत्र प्र
दं बृहस्पतिमतिलय एव तस्मिन्नसत्रे स एव वरणीयो नलोकत्रयं यतस्तद्दतितुच्छमित्याह ॥ अतिगंभीरं अनंतं वयो यस्य यन्मन्वंतरं ते
न परिवृतं विपर्यस्तं लोकत्रयमिदं कियत् ॥१७॥ ॥

७५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रल्हादस्येकएवार्थं निष्पातइत्याह।। यस्यानुदास्यमिति।। स्वपितॄर्युपरतेमृतेसतिस्वपित्र्यंपदंभगवतादीयमानमपिभगवतःखलुपरमत्यदितिरू
त्वानतुजग्राहेत्यर्थः।। ननुत्वमतिधीरःकुतस्तमेववृणुमन्यसेतत्राह।। तस्यानुपथमनुवर्त्मअमृज्जिताअक्षीणाःकेरवाप्ताःरागादयोयस्या
परिहीनोभगवदनुग्रहोयस्यसकोवाउपगंतुमिच्छतीति।। अथश्रुकोक्तिः नन्वेवंभूतश्चेद्बलिःतर्हितस्यैवचरितंविस्तरेणाकथ्यतां। तत्राह।।

यस्यानुदास्यमेवास्मत्पितामहःकिलवव्रेनतुस्वपित्र्यंयदुताकुतोभयंपदंदीयमानंभगवतःपरममितिभगवतोपरतेस्वपि
तरि।। तस्यमहानुभावस्यानुपथमृष्टकषायः कोवास्मद्विधःपरिहीयमानभगवदनुग्रहउपजिगमिषतीति।।१८।।तस्यानुच
रितमुत्तरस्माद्विस्तरिष्यते।। यस्यभगवान्स्वयमखिलजगद्गुरुर्नारायणोद्वारिगदापाणिरवतिष्ठतेनिजजनानुकंपित
हृदयोयेनांगुष्ठेनपदादशकंधरोयोजनायुत [illegible] दिग्विजयउच्चाटितः।।१९।। ततोधस्तात्तलातलेमयोनामदानवेंद्रस्त्रि
पुराधिपतिर्भगवतात्रिपुरारिणात्रिलोक्याःसंचिकीर्षुणा।। निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदोमायाविनामाचार्योमहादेवेन
परिरक्षितोविगतसुदर्शनभयोमहीयते।।२०।।

तस्यबलेनुचरितमुपरिष्टादष्टमेविस्तरिष्यते।। यस्याद्वार्यवतिष्ठतेनिजजनेष्वनुकंपंहृदयंयस्य।। द्वारपालकमेवदर्शयति।। ये
नश्रीनारायणेनबलेर्द्वारिविराजद्दशकंधरउच्चाटितः।। तत्राप्यंगुष्ठेनैव।। यथाहरिणास्वभक्तोबलिश्चसुतलेनिहितःसुखमास्ते।।
एवंमहादेवभक्तोपिमयस्तलातलेसुखमास्तइत्याह।। ततोइति।। लब्धंपदंस्थानंयेनामहीयतेपूज्यते।।२१।।

त्रित २

भा०पं० नेकशिरसां अनेकफणानां गतोस्ति ॥ एतत्प्रपंचयति ॥ कुहक इति महाभोगवंतो महाकायाः पुरुषवाहात् हरेर्वाहनात् ॥ विबुधपत्नी
७९ कादेवशत्रवः सकलेष्वपि लोकेषु अनुभावो यस्य तस्यैव तेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्यमदो येषां ॥ बिलेशया सर्पाइ
व ॥ इंद्रदूत्या सरमया युक्ताभिर्मंत्रवर्णाभिर्वाग्भिः ॥ एवं हि वैदिकमाख्यानं पणिभिरसुरैर्निगूढां गां अन्वेष्टुं सरमां देवशुनीमिंद्रेण प्रहितां
संधिमिच्छंतः पणयः प्राहुः किमिच्छंतीसरमेत्यादि ॥ सा च संधिमनिच्छंती इंद्रस्तुतिपूर्वकं तान् प्रतिपरुषमाह ॥ हताइंद्रेण पणयः
ततोधस्तान्महातले काद्रवेयाणां नैकशिरसां क्रोधवशो नाम गणः ॥ कुहकतक्षककालिकसुषेणादिप्रधाना महाभो ७९
गवंतः पतत्रिराजाधिपतेः ॥ पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्स्वकुटुंबसंगेन क्वचित्प्रम त्ता विह
रंति २९ ॥ ततोधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालिया हिरण्यपुरवासिन इति विबुधप्रत्यनी
का उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसंति
ये वै सरमयेंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति ३० ॥ ततोधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शंखकुलिक
महाशंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसंति ॥ येषामु ह वै पंचसप्तदश
शतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमंति ॥ ३१ ॥
इति श्रीभागवते महापुराणे पंचमस्कंधे पातालसंस्थानुवर्णने चतुर्विंशोध्यायः ॥ २४ ॥
शायधमित्यादि तत्र श्रुता बिभ्यतीति ॥ महाभोगिनः महाफणाः महानमर्षः क्रोधो येषां पंचादिसंख्यानि शीर्षाणि येषां ॥ शीर्षाणीति
वक्तव्ये शीर्षाणामित्यार्षः ॥ ३१ ॥ इति श्रीश्रीधर० पंचमे चतुर्विंशः ॥ २४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पंचविंशेततोऽधस्तादाहशेषस्यसंस्थितिं॥ संज्ञिहीर्षोरिदंकालेयतोरुद्रसमुद्भवः॥ कोसावनंतः॥ सात्वतीयाः॥ सात्वतंत्रनिष्ठाश्च तुर्व्यूहोपासनेयंसंकर्षणइत्याचक्षते॥ तथाख्यानेहेतुः॥ द्रष्टृदृश्यरूपयोः सम्यक्कर्षणंएकीकरणंयेन॥ तत्कुतः॥ अहमित्यभिमा नोलक्षणविज्ञमधिष्ठातुर्यस्याहंकाराधिष्ठानेन॥ दृग्दृश्यसंकर्षणात्संकर्षणइत्यर्थः॥ अनंतत्वमाह॥ यस्येदमितियच्छब्दानां सए वभगवाननंतइत्युत्तरेणान्वयः॥ तामसत्वमाह॥ यस्येदंविश्वमुपसंहर्त्तुमिच्छतः॥ अमर्षेणविरचितेरुचिरीहृते कुटिलीकृतेभ्रमंतेयो भ्रू

श्री श्रीकृष्ण॥ तस्यमूलदेशात्रिंशद्योजनसहस्रांतरेआस्तेयावैभगवतः कलातामसीसमाख्यातानंतइति॥ सात्वतीयाः द्रष्टृ दृश्यनयोः संनिकर्षणमहमित्यभिमानलक्षणंसंकर्षणइत्याचक्षते॥ यस्येदंक्षितिमंडलंभगवतोनंतमूर्त्तेः सहस्रशिरस एकस्मिन्नेवशीर्षणिधियमाणंसिद्धार्थइवलक्ष्यते॥ १॥ यस्यहवाइदंकालेनोपसंजिहीर्षतोमर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेणसंक र्षणोनामरुद्रएकादशव्यूहस्त्र्यक्षस्त्रिशिखंशूलमुत्तंभयन्नुदतिष्ठत्॥ २॥ यस्यांघ्रिकमलयुगलारुणविशदनखमणि खंडमंडलेष्वहिपतयःसहसात्वतर्षभैरेकांतभक्तियोगेनावनमंतः स्ववदनानिपरिस्फुरत्कुंडलप्रभामंडलमंडितगंडस्थलान्यति मनोहराणिप्रमुदितःमनसःखलुविलोकयंति॥ ३॥

वोंतयोर्मध्ये॥ अत्रंत्र्यच्छ्र॥ अनंतत्वमाह॥ यस्यांघ्रिकमलयुगलेअरुणाविशदानखाएवमणयःएषांखंडःसमूहस्तस्यमंड लेषुपरिस्फुरतांकुंडलानांप्रभयामंडितानिगंडस्थलानियेषुतानि॥ ३॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गा०वं० ७१

वारुणिरंगरलयानि तैर्विल[illegible]ताश्च ते विशदाश्च विपुलाश्च धवलाश्च सुभगाश्च रुचिराश्च भुजा एव रजतस्तंभास्तेषु। अगरुचंदनकुंकुमा
नां पंक एवानु[illegible] आस्तेषामभिमर्दनेनोन्माथिते हृदये मकरध्वजस्यावेशेन रुचिरं च ललितं च स्मितं यासां ताः। तस्यानु
रागो ए[?] मदेन मुदितं [illegible] विघूर्णितं चलिते वक्रा ईषद् अरुणे करुणावलोकयुते नयने यस्मिन्नेतद्वदनारविंदं विलोकयंति॥ ॥
[illegible] मर्दनेनो[illegible] वेगो येन॥ उपासनार्थमाह॥ सुराधिभिर्ध्याजमानश्चिंत्यमानः अनवरतं मदेन मुदितश्चा ७
[illegible] वहिनागराजकुमार्यश्च। शिष आशा मानाश्चार्वंगवलय विलसित विशदविपुलधवलसुभगरुचिरभुजरजतस्तंभेषु गरुचंदनकुं
कुमपंकानुलेपना [illegible] वलिंपमानास्तदभिमर्शनोन्मथित हृदजमकरध्वजावेशारुचिरललितास्मितास्तदनुरागमदमुदितस्मदवि
घूर्णितारुणकरुणावलोकेनयनवदनारविंदं सव्रीडं किल विलोकयंति॥ स एव भगवाननंतोनंतगुणार्णव आदिदेव उपसंहृतामर्षरोष
वेगो लोकानां स्वस्त्यआजस्ते॥ श्री ध्यायमानः सुरासुरोरगसिद्धगंधर्वविद्याधरमुनिगणैर[illegible]नवरतमदमुदिताविहृतविकलोव
नसुललितामुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेनमाद्यन्मधुकरगीत
श्रियं वैजयंतीं स्वां वनमालां नीलवासा एककुंडलो हलककुदिकृतसुभगसुंदरभुजो भगवान्माहेंद्रो वारणेंद्र इव कांचनीं कक्षा
मुदारलीलो बिभर्ति॥ ५॥ ॥
सौ विहृत विकलोचनस्य। सुललितेन मुखरिकामृतेन वचनामृतेन स्वपार्षदान्विबुधयूथपानां पतीश्चाप्याहमानं हर्षयन्। नीलेवाससीय
स्य एककमेव कुंडलं यस्य हलस्य ककुदि पृष्ठे कृतः न्यस्तः सुभगश्च। सुंदरश्च भुजो [illegible] येन॥ उदारा लीला यस्य सः॥ न परिम्लानो रागः कांतिर्य
स्या नव[illegible] तुलसिकायां आमोदमध्वासवेन सुरभिमधुरसेन माद्यतां मधुकराणां व्राताः तेषां मधुरगीतेन श्रीर्यस्याः तां मालां कक्षां वरत्रां।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

संश्लोकयामास वर्णयामास ।। अस्य जगत उत्पत्त्यादि हेतवो गुणा यस्येक्षया कल्पाः स्वस्वकार्ये समर्था आसन् ।। यस्य तु रू-
पं ध्रुवमनंतं अकृतं च अनादि ।। तत्र हेतुः ।। यदेकमेव सन् आत्म[illegible]त्मनि नानाकार्यप्रपंचमधात् ।। तस्य ब्रह्मरूपस्य वर्त्म तत्त्वं जनः क-
थमुह वेद ।। नैव वेदेत्यर्थः ।। तर्हि कथमसौ मुमुक्षुभिः सेव्यते तत्राह ।। मूर्त्तिमिति ।। यत्रेदं सदसद्विभाति स नोऽस्माकं तत्र कानां रूप
यए यएवमनुश्रुतो निध्यायमानो मुमुक्षूणामनादिकर्म्मवासनाग्रथितमविद्यामयं हृदयग्रंथिं सत्वरजस्तमो-
मयमंतर्हृदयगत आशु निर्भिनत्ति ।। तस्यानुभावमिमं भगवान् स्वायंभुवो नारदः सह तुंवरुणा सभायां ब्रह्मणः
संश्लोकयामास ।।६।। उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्वाद्याः प्रकृतिगुणा यदीक्षयासन् ।। यद्रूपं ध्रुवमकृतं य-
देकमात्मन्नानाधात्कथमुह वेद तस्य वर्त्म ।।७।। मूर्त्तिं नः पुरुकृपया बभार सत्वं संशुद्धं सदसदिदं विभाति यत्र यल्लीलां
मृगपतिराददेनवद्यामादातुं स्वजनमनांस्युदारवीर्यः ।।८।। ।।

यः संशुद्धं सत्वं मूर्त्तिं बभारास्तजनानां मनांस्यादातुं वशीकर्तुं कृतां यस्य लीलां मृगपतिः सिंह आददे ।। अशिक्षयत् यत उदाराणि
वीर्याणि यस्य तदनंतं मुमुक्षु[illegible]मा[illegible]इति पूर्वेणान्वयः ।। यद्वा ।। मृग्यंत इति मृगाः कामप्रदास्तेषां पतिर्मुख्यः ।। ।।८।। ।।
।। ।।ना।। ।।ढ।। ।। ।।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंवा॥ आस्तांतस्य रूपयावपुर्धारीतज्जनंवा॥ तन्नामोदार्यसेवा ति वित्रमित्याह॥ यस्यनामजपतितोमहापातकस्यानुकी
र्त्यचेत्॥ सम्भुजेदिति किंवलाक्यं॥ यतोसावेव नृणामशेषमंहः सद्योहंति॥ कथमनुकीर्त्यन्तेश्यन्यतः श्रुतंवा अकस्माद्वा॥
श्रोतोवासन् मलंभनाद्वापरिहासात्॥ तस्मादशेषदन्यं॥ कं आश्रयेन्मुमुक्षुः॥ गिर्यादिसहितंभूगोलंसत्वानि प्राणिनःस
यन्नामश्रुतिकीर्तयेद नस्मादार्तोवायदिपतितः प्रलंभनाद्वा॥ हंत्यंहः सपदिनृणामशेषमन्यं कं शेषाद्भगवत आश्रये
न्मुमुक्षुः॥ ११॥ मूर्द्धन्यर्पितमणुवत्सहस्रमूर्ध्नोभूगोलंसगिरिसरित्समुद्रसत्वं॥ आनंत्यादविदित विक्रमस्यभूम्नः ८
कोवीर्याण्यधिगणयेत्सहस्रजिह्वः॥ १२॥ एवंप्रभावोभगवाननंतोदुरंतवीर्योरुगुणानुभावः॥ मूलेरसायाः स्थित आत्म ७८
तंत्रोयोलीलयाक्ष्मांस्थितयेबिभर्ति॥ १३॥ एताह्येवेहनृभिरुपगंतव्यागतयोयथाकर्मविनिर्मितायथोपदेशमनुवर्णिताः॥
कामान्कामयमानैरेतावतीर्हिराजन्पुंसः प्रवृत्तिलक्षणस्यधर्मस्यविपाकगतयः उच्चावचाविसदृशायथाप्रश्नंव्याचख्येकि
मन्यत्कथयामइति॥ १५॥ इतिश्री भागवतेमहापुराणेपंचमस्कंधेपंचविंशोध्यायः॥ २५॥

सहस्रजिह्वोपिकोगणयेत्॥ दुरंतवीर्यंबलंयस्यउरवोगुणाअनुभावश्चयस्यसतथा॥ रसायाभूमेर्मूलेस्थितःतिष्ठति॥ आत्म
तंत्रः॥ आत्माधारः॥ उक्तस्यलोकविभागस्योपयोगंवदन्नुपसंहरति॥ एताह्येवेहकामान्कामयमानैर्नृभिरुपगंतव्याइत्य
न्वयः॥ तस्यप्रपंचः॥ एतावंत्यः विपाकगतयफलभूतागतयः॥ ताव्याचख्येव्याख्यातवानस्मि॥ १२॥ इतिपंचमेपंचविंशः॥

चाद्विंशेनु ततोधस्तान्नरकास्तद्विनिरूप्यते। पापिनो यत्र दह्यंते यमदूतैर्यथायथं॥ ॥१॥ पुंसो गतय उच्चावचा विसदृशा इति नोग [illegible] वैचित्र्य
मुक्तं। तदेतत्कुत इति पृच्छति॥ महर्ष इति॥ कर्मणः समानत्वेपि॥ श्रद्धावैचित्र्यात्फलवैचित्र्यमिति परिहरति॥ त्रिगुणत्वादिति सा
त्विक्या श्रद्धया कर्तुः सुखित्वं। राजस्या सुखित्वं च तामस्या मूढत्वमिति॥ तत्रापि तासां श्रद्धानां तारतम्यात्सुखादितारतम्यं

श्री राजोवाच॥ ॥ ॥ महर्ष एतद्वैचित्र्यं जीवलोकस्य कथमिति॥ श्री शुक उवाच॥ ॥ त्रिगुणत्वात्कर्तुः श्रद्धया कर्मगतयः पृथ
ग्विधाः सर्वा एव सर्वस्य तारतम्येन भवंति॥ ॥२॥ अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात्क
र्मफलं विसदृशं भवति॥ या ह्यनाद्यविद्यया कृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणा
नुवर्णयिष्यामः॥ ॥३॥ राजोवाच॥ ॥ नरकानाम भगवन् किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदंतराल इति॥ ॥४॥ श्री शुक उवाच॥
अंतराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च जलात्। यस्यामग्निष्वात्तादयः पितृगणा दिशि
स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसंति॥ यत्र ह वाव भगवान्पितृराजो वैवस्वतः स्वविष
यं प्रापितेषु स्वपुरुषैर्जंतुषु संपरेतेषु यथाकर्मावद्यमेवानुल्लंघितभगवच्छासनः सगणो दमं धारयति॥ ॥५॥ ॥

सर्वेषामित्यर्थः॥२॥ प्रतिषिद्धं प्रतिषेधः स एव लक्षणं कारणं यस्य अधर्मकर्तुः श्रद्धावैसादृश्यं तमसस्तारतम्यात्तत्रापि कारणं दर्शयन्ना
ह॥ अनाद्यविद्याकृतानां कामानां सृतयो नरकास्तासां ताः॥ अथेदानीं ताः प्राचुर्येणानुवर्णयिष्याम इत्यन्वयः॥ किं भूमावेव देशवि
शेषाः त्रिलोक्याः बहिः ब्रह्मांडावरणेषु मध्ये अंतराले वा भूमिव्यतिरिक्ते॥ कर्मदोषमनतिक्रम्य दोषमेव दमं पापफलं दं
डं करोतीति॥ अनुल्लंघितं भगवच्छासनं येन॥ ॥५॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

...णाशविंशतिमाह॥ ...वेति॥ पापत्न्नेदेन तत्तन्नरकयातनात्नेदं प्रपंचयति॥ यास्त्विहेत्यादिना॥ यात्यमानः पीड्यमानः॥ एक
...तदेव॥ भुरयंपतिं ... ...शरीरमहमिति॥ इदं धनादिमिमेति॥ मत्वा स्वंव कुटुंबमेव प्रपुष्णाति तेनाशुभेनेनः॥

तत्रैके ... नरकानेको ... तिंगणयंति॥ अथ तां स्ते राजन्नामरूपलक्षणतोनुक्रमिष्यामः॥ ५॥ तामिस्रोंऽधतामि
स्रोरौरवो महारौरवः कुंभीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमंधकूपः कृमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकंटक- ७८ 74
शाल्मली वैतरणी पूयोदः प्राणरोधो विशसनो लालाभक्षः सारमेयादनं अवीचि रयः पानमिति॥ ६॥ किंच॥ क्षारकर्दमो र
क्षोगणः भोजनः शूलप्रोतो दंदशूको ऽवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशति नरका विविधयातनाभूमयः॥
॥७॥ तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते अ
नशनानुदकपानदंडताडनसंतर्जनादिभिर्यात्यमानो जंतुर्यत्र कश्मलमासादित एकदैव मूर्छामुपयाति तामिस्रप्राये॥
॥८॥ एवमेवांधतामिस्रे यस्तु वंचयित्वा पुरुषं दारादीनुपयुंक्ते यत्र शरीरी निपात्यमानो यातनावस्थो वेदनया नष्टमतिर्नष्टदृष्टि
श्च भवति यथा हि॥ वनस्पतिर्वृश्च्यमानमूलस्तस्मादंधतामिस्रं तमुपादिशंति॥ ॥९॥ यस्त्विह वा एतदहमिति ममेदमिति भू
तद्रोहेण केवलं कुटुंबमेवानुदिनं प्रपुष्णाति॥ स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति॥ ॥ ॥१०॥ कृष्ण॥ ॥

॥श्रीराम॥ ॥ ॥शुभं॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रुरवो भूत्वेति॥ कर्म्माण्येव तथा परिणामं प्राप्येत्यर्थः॥ अतिक्रूरस्य भारश्रृंगारव्यस्य सत्वस्यापदेशः संज्ञा॥ क्रव्येणानिमित्तेन मांसार्थ
मित्यर्थः॥ प्राणतः सजीवानुपरंधयति पंचयति॥ अपकरुणं निःकृपं॥ खलेसमदेशे॥ स्वधर्मत्यागी॥ स्वनयन्॥ रुदः॥ कश्मलं
ये त्विह यथैवामुना विहिंसिता जंतवः परत्र यम [illegible]नामुपगतं तथैव रुरवो भूत्वा तथा तमेव विहिंसंति॥ तस्मात्प्रोरवमित्याहुः
रुरुरिति सर्पादतिक्रूरसत्वापदेशः॥ १०॥ एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा रुरवस्तं क्रव्येण घातयंति॥ यः केवलं हिंद
हं नरः॥ ११॥ यास्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरंधयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुंभी
पाके तप्त तैले उपरंधयंति॥ १२॥ यास्त्विह पितृ विप्र ब्रह्मध्रुक् स कालसूत्र संज्ञके नरके अयुत योजन परिमंडले ताम्रमये तप्तख
ले उपर्यधस्तादग्न्यर्काभ्यामुपतप्यमाने [illegible]निवेशितः क्षुत्पिपासाभ्यां दह्यमानांतर्बहिः शरीर आस्ते शेते चेष्टते ऽवतिष्ठति परि
धावति यावंति [illegible]पशुरोमाणि तावद्वर्षसहस्राणि॥ १३॥ यास्त्विह वै निजवेदपथादनापद्यागतः पाखंडं चोपगतः तमसि
पत्रवनं प्रवेश्य कशया प्रहरंति। तत्र हासावितस्ततो धावमान उभयतो धारैस्तालवनासिपत्रैः छिद्यमान सर्वांगो हा हतोस्मी
ति परमया वेदनया मूर्छितः पदे पदे निपतति स्वधर्महा पाखंडानुगतं फलं भुक्ते॥ १४॥ यास्त्विह वै राजा राजपुरुषो वा दंड्ये दंडं
प्रणयति ब्राह्मणे वा शरीरं दंड स पापीयान्नरके सूकरमुखे निपतति। तत्रातिबलैर्निष्पिष्यमाणावयवो यथैवेह क्तादंडं आर्त
स्वरेण स्वनयन् [illegible]तः कश्मलमुपगतो यथैवेहादृष्टदोषा परुद्धाः॥ १५॥ ॥ ॥

[illegible]पगतो भवति॥ अदृष्ट[illegible]रयरुद्धाः॥ संतोयथाकश्मलमुपगताः तद्वत्॥ ॥ १५॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ईश्वरेणोपकल्पिता मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनां॥ न विविक्ता ज्ञाता परव्यथा यैरविवेकिभिस्तैर्भगवत्पुरुषेण ब्राह्म
णादिभावेन विधिनिषेधपूर्वकमुपकल्पिता वृत्तिर्यस्य॥ विविक्ता परव्यथा येन विवेकिना अभिद्रुग्धा हिंसिताः॥ विहिता निद्रारूपा निर्वृत्ति
र्यस्य न लब्धमवस्थानं येन सततमसि परिक्रामति॥ यत्किंचन भक्तादिकमुपपन्नं प्राप्तं तदसंविभज्य न निर्मिताः पंचयज्ञा येन॥ अत एव
यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति स
परत्रान्धकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जन्तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये केचनाभि ८.
द्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः॥१६॥ यस्त्विह वा असंवि
भज्याश्नाति यत्किंचनोपनतमनिर्मितपंचयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति तत्र सहस्रयोजने कृमिकुं
डे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते॥१७॥ यस्त्विह वै स्तेयेन
न बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरति अन्यस्य वा नापदि पुरुषस्तममुत्र राजन् यमपुरुषा अयस्मयैरग्निपिण्डैः
संदंशैस्त्वचि निष्कुषन्ति॥१८॥

वायसैः संस्तुतेन॥ सवर्णितः कृमिभोजनः कृमीन्भुंजानः यावत्तत्परिमाणं यावंति योजनानि तत्कृमिकुंडं तावंति वर्षाणि॥ ॥
यातयति पापमित्यर्थः॥ अप्रत्तमसंविभक्तं अप्रहुतमत्तीति तथा सः॥ अनिर्वेशं अकृतप्रायश्चित्तं॥ निष्कुषन्ति छिन्दन्ति॥१८॥

॥-

समानत्वेन २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तमातन्वथा॥ स्त्रम्यांप्रतिमया॥ सर्वाभिगमः पश्वाघुपगंता॥ ञ्नापारखंडः सत्कुलीनाः संतः क्षितीयां तपाठेसेतु विशेषणनंदी वि
ग्रस्त्विहवाऽग म्यंवापुरुषं योषिदभिगच्छति॥ तावमुत्र कशयाताऽयंतः स्तिग्मयास्त्रूर्म्यालोहमय्या पुरुषमालिंगयंतिस्त्रियं
चपुरुषरूपया स्त्रूर्म्यायात्विह देसर्वाभिगमः स्तमा मुत्र निरयेवर्त्तमानंवज्रकंटकशाल्मल्यामारोप्यनिःकर्षंति॥ १९॥ ये
त्विह वैराज राजपुरुषावापारवंडधर्मसेतून्भिंदंति ते संपरेत्यवेतरिण्यां निपतंति भिन्नमर्यादास्तस्यांनिरयपरिखाभूतायां
नद्यांयादोगणैरितस्ततोभक्ष्यमाणाआत्मनाअवियुज्यमानाः स्वासुभिरुह्यमाना स्वाघेन पापकर्मानुस्मरंतउपतप्यंति
विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिण्यामुपतप्यंते॥ २०॥ येत्विहवैवृषलीपतयोनष्टशौचाचारनियमास्त्य
क्तलज्जाः पशुचर्यांचरंति तेचापिप्रेत्यपूयविण्मूत्रश्लेष्ममलापूर्णार्णवेनिपतंति तदेवातिबीवत्सितमश्नंति॥ २१॥ येत्विहवैश्वग
र्दभपतयोब्राह्मणादयोमृगयाविहाराअतीर्थेचमृगान्निघ्नंति तानपिसंपरेतांल्लक्ष्यभूतान्यमपुरुषाइषुभिर्विध्यंति॥ २२॥ येत्वि
हवैदांभिकादंभयज्ञेषु पशून्विशसंति तानमुष्मिंल्लोकेवैशसेनरकेपतितान्निरयपतयोपातयित्वाविशसंति॥ २३॥
यस्त्विहवैसवर्णांभार्यांद्विजोरेतःपाययतिकाममोहितस्तंपापकृतममुत्ररेतःकुल्यायांपातयित्वारेतःपाययंति॥ २४॥
येत्विहवैदस्यवोग्निदागरदाग्रामान्सार्थान्वाविलुंपंति... [illegible]

[illegible]विप्रत्वेतिपशुचर्यास्थेच्छाचारां॥ अतीर्थांविहितादन्यत्र विध्यंतीप्राणनिरोधोदाशैतःनिरयपतयोयमपुरुषा॥ लालाभक्षमाह
यास्त्विहेतिरेतःपानंकारयंति॥ २५॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कृतायेश्वानः ॥ सरभसं ससंभ्रमं ॥ द्रव्यविनिमये क्रयविक्रियादौ ॥ निरवकाशे निरालंबे ॥ अवीचिशब्दार्थमाह ॥ यत्रेति ॥ वीचिस्त
रंगस्तद्रहितत्वात् ॥ अवीचिः ॥ यो विप्रस्तत्कलत्रं वा सुरां पिबति अन्यो पिबा व्रतस्थः सन् राजन्यो वैश्यो वा सोमपीथः कृतसोमपानः ॥
यस्त्विह वै दस्यवोऽग्नि दागरदा ग्रामान् सार्थान्वा विलुंपति राजानो राजभटा वा ॥ तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः
सप्तशतानि विंशतिश्च सरभसं खादंति ॥ २५ ॥ यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये वा ॥ कथं वित्से वै प्रेत्य नरके वीचि
मत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिसंपात्यते ॥ यत्र जलमिव स्थलमश्मपृष्ठमवभासते ॥ तदवीचिमत्तिलशो ८१
विशीर्यमाणशरीरोऽपि न म्रियमाणः पुनरारोपितो निपतति ॥ २६ ॥ यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कल
त्रं वा सुरां व्रतस्थो वा पिबति तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कालायसं निषिंचंति ॥ २७ ॥ अथ च य
स्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे
निरये अर्वाक्शिरा निपतति ततो दुरंतयातना ह्यश्नुते ॥ २८ ॥ ॥

...तयोः सोमस्थाने फलचमसविधानात् सोमपाननिषेधाच्च ॥ तथा च श्रुतिः ॥ न्यग्रोधस्तिभीः ...राहृत्य ताः संपिष्य
दधन्युपसृज्य तस्मै भक्षं प्रयच्छेन्न सोमामिति ॥ स पूर्वमपि मृतक एव मनुष्यत्वा ॥ २९ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

...ः ...नग दितः अंहतिः श्रेष्ठोहमिति मानी तिर्यक्प्रेक्षणं यस्य ॥ सर्वतः गुर्वादेरपि धनं चोरयिष्यंतीति विशंकमानः । परिभु
...दंवदनं यस्य ॥ ...वगतः ॥ अप्राप्तः तस्यार्थस्योत्पादनादिभिः शमलं गृह्णातीति तथा । परिवयंति ॥ इतरत्रास्व

स्विह वा आत्मानमिमतिरहं हतिस्तिर्यक्प्रेक्षणः सर्वतोभिविशंकी ह्यर्थविनाशचिंतया परिशुष्यमाणहृदयवदनो
...तमनवगतो ...ह्यर्थमभिरक्षति ॥ स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखेनरके निपतति ।
...ह विन्नग्रहं पापपुरुषं धर्मराजपुरुषा वाधकास्वसर्वतोंगेषु सूत्रैः परिवयंति ॥ ३४ ॥ एवंविधानरकाय मालयेसंति । शतशः
...स्वशः ॥ तेषु सर्वेषु च सर्व एवाधर्मवर्त्तिनो ये केचिदिहोदिता ...दितश्चावनिपते पर्यायेण विशंति । तथैव धर्मा
...र्मिन इतरत्र इह तु पुनर्भवे त उभयशेषाभ्यां निविशंति । निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः ॥ ३५ ॥ एतावाने वांड
...शो यश्च तुर्दशधा पुराणेषु विकल्पित उपगीयते ॥ यस्त्वेतद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्टं रूपं
...ल्म मायागुणमयमनुवर्णितं तमाद्दतः सन्पठति ॥ शृणोति श्रावयति ॥ स उपगेयं भगवतः परमात्मनो ग्राह्यमपि श्रद्धा
। भक्तिविशुद्धबुद्धिर्वेद ॥ ॥ ॥

...म् तर्लोके पुनर्भवे पुनर्जन्मनि निमित्तं ॥ उभयोर्धर्माधर्मयोः शेषाभ्यां ॥ आदावेव द्वितीयस्कंधे वैश्वानरं यातीत्यादिना । उप
गेयं पनिषदं श्रद्धानक्तिभ्यां विशुद्धा बुद्धिर्यस्य ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

[illegible] धेनाहिंसाया भैरवादीन्यजंते॥ यास्त्वास्त्रियश्च नानारूपाः रक्षोगणान्भूत्वा॥ यथेहैते पुरुषादाः संतः स्वमन्त्रसंततक्तं॥
[illegible] लेहवै पुरुषाः पुरुषमेधेन यजंते॥ यास्त्वास्त्रियो नरपशून्खादंति तांश्चते पशवइह निहता यमसदने यातयंतो रक्षो
[illegible]गणाः [illegible] स्वधितिनावदाया सृक्पिबंति नृत्यंति च रुष्यमाणा यथेह पुरुषादाः॥ २९॥ ये त्विह वा अनागसोरण्येग्रा
[illegible] वा वै श्रंभकै रुपविश्रंभमुपजिजीविषून्शूलसूत्रादिषूपप्रोतान्क्रीडनकतया यातयंति। तेपिच प्रेत्य यमयातनासु शूला दि
[illegible]प्रोतात्मानः क्षुत्तृड्भ्यां चाभिहताः कंककवटगृध्रादिभिश्चेतस्ततस्तिग्मतुंडैराहन्यमाना आत्मशमलं स्मरंति। ये त्विह वै भूतान्यु
[illegible] यंति नरा उल्वणस्वभावा यथा दंदशूकास्तेपि प्रेत्य नरके दंदशूकाख्ये निपतंति॥ यत्र नृप दंदशूकाः पंचमुखाः सप्तमुखा उप
विसृत्य ग्रसंति यथा बिलेशयान्॥ ३१॥ ये त्विह वा अंधावट कुसूलगुहादिषु भूतानि निरुंधंति। तथामुत्र तेष्वेवोपवेश्य सगरे
[illegible] वह्निना धूमेन निरुंधंति॥ ३२॥ यस्त्विह वा अतिथीनभ्यागतान्वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरी
क्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुंडा गृध्राः कंककाकवटादयः प्रसह्योरुबलादुत्पाटयंति॥ ३३॥

विश्वासोपायैः उपविश्रंभमया विश्वास्य॥ बिलेशयान्मूषकान्॥ सगरेण विषेण॥ अतिथयोऽज्ञातपूर्वास्तान्पापेन
[illegible] वक्रीकृतेन॥ ३३॥ ॥